(ii) The word द्राघीयसा is an adjective to the distant word अध्वना। This causes the rhetorical defect called दूरान्वय। वयोऽतीतोऽतिदीर्घेण may be proposed as an emendation.

Ch. of Voice.—वयोऽतीतं......परिक्रान्तं.. ...मुनिरूपम्...अनुरूपः सूनुः ...ददर्श।

Questions. द्राघीयसा—Derive. किल—Significance.

Discription of Indra : With matted locks spread over with white hair.

जटानां कीर्णया केशैः संहत्या परितः सितैः ।
पृक्तयेन्दुकरैरह्नः पर्यन्त इव सन्ध्यया ॥ ३ ॥

Eng. Equiv. संहति—collection. सित—white. पर्य्यन्त—end.

Prose.—परितः सितैः केशैः कीर्णया जटानां संहत्या [उपलक्षितः] [अतएव] इन्दुकरैः पृक्तया सन्ध्यया [उपलक्षितः] अह्नः पर्य्यन्त इव [स्थितः]। [ददृशे—from sl. 2].

Bengali.—চন্দ্রকিরণোদ্ভাসিত-সন্ধ্যা-শোভিত দিনান্তের ন্যায় সম্পূর্ণ শুভ্রকেশরচিত-জটা-মণ্ডিত [ইন্দ্র পুরোভাগে দৃষ্ট হইলেন]। ৩।

English.—Wearing matted locks clustered round by hairs white all over, like the end of day marked with dusk adorned with lunar rays, [Indra was seen by his son Arjuna]. 3.

Points of Comparison :—जटानां संहतिः with सन्ध्या, परितः सिताः केशाः with [सिताः] इन्दुकराः, इन्द्रः with अह्नः पर्य्यन्तः ।

Ghantapatha.—अथ चतुर्भिरिन्द्रं विशिनष्टि (1)। जटानामिति। 'परितः सितैः' 'केशैः' 'कीर्णया' व्याप्तया 'जटानां' 'संहत्या' समूहेन "उपलक्षितः", अतएव 'इन्दुकरैः' इन्दुकिरणैः 'पृक्तया' युक्तया 'सन्ध्यया' "उपलक्षितः" 'अह्नः पर्य्यन्तः' दिनान्तः 'इव' "स्थितः"। तस्यापि परिणतरूपत्वात् वृद्धोपमानत्वं, जटानां संहत्येत्युक्तत्वात् सन्ध्यासाम्यम् (2) ॥ ३ ॥

Malli. Explained.

1. अथ चतुर्भिः &c.—Now the poet describes Indra with four slokas.

2. तस्यापि &c.—[The end of day], too, being a full-grown thing has been put as the उपमान of an old person, and by the statement जटानां संहत्या comparison with सन्ध्या has been established.

Notes.

कीर्णया—कॄ + क्त—कर्म्मणि fem. ३या १व ; adj. to संहत्या ।
केशैः—अनुक्त-कर्त्तृ of कीर्णया ।

संहत्या—समस्या, समूहेन। सम्+हन्+क्ति। 'इत्थंभूतलक्षणे' इति उपलक्षणे ३या।

परितः—सर्व्वतः। परि+तस्। 'पर्य्यभिभ्यां च' इति तसिल्।

पृक्तया—पृच्+क्त—कर्म्मणि fem. ३या; adj. to सन्ध्यया।

इन्दुकरैः—इन्दोः कराः—६तत्, तैः। अनुक्ते कर्त्तरि ३या in connection with पृक्तया।

पर्य्यन्तः—अन्तं परिगतः इति पर्य्यन्तः—प्रादि-समासः।

सन्ध्यया—उपलक्षणे ३या। सम्यक् ध्यायन्ति अस्याम् इति सन्ध्या—सम्+ध्यै+अङ्—अधिकरणे, स्त्रियाम् आप्। अङ् प्रत्ययान्त words are fem.

Rhetoric.—The fig. of speech is उपमा। For the points of comparison, see above.

Ch. of Voice.—......संहत्या [उपलक्षित]......सन्ध्यया [उपलक्षित] ..... पर्य्यन्तमिव [ददृशे]।

Questions. संहत्या, सन्ध्यया—C. Explain the points of comparison.

With eyes hidden within the wrinkled corners and the white eye-brows,

विशद-भ्रूयुग-च्छन्न-वलिनापाङ्ग-लोचनः (क)।
प्रालेयावततिम्लानपलाशाब्ज इव ह्रदः ॥४॥

Eng. Equiv. विशद—gray. वलिन—wrinkled. अपाङ्ग—the outer corners of the eyes. प्रालेयावतति—frosts. पलाश—petal. अब्ज—lotus.

Prose.—विशदभ्रूयुगच्छन्नवलिनापाङ्गलोचनः प्रालेयावततिम्लानपलाशाब्जः ह्रद इव स्थितः [इन्द्रः ददृशे—from sl. 2].

Bengali.—হিমরাশি দ্বারা ম্লান দলযুক্ত পদ্ম বিশিষ্ট হ্রদের ন্যায়, শুভ্র (পলিত-পাণ্ডুর) ভ্রূযুগলাবৃত প্রান্তে লোলচর্ম্ম (বলি) যুক্ত নয়ন বিশিষ্ট [ইন্দ্র পুরোভাগে দৃষ্ট হইলেন]। ৪।

(क) For वलिन, all read (both in the text and the commentary) वलित which, though a possible form, is not supported by the derivation given by Malli.

English.—With eyes covered with gray-haired brows and possessed of folded skin at the outer corners, [looking] like a lake with lotuses having the petals faded by frost [Indra was seen by his son Arjnna] 4.

Points of comparison :—विशद-भ्रूयुग and प्रालेयावतति, छन्नता and म्लानता, वलिनापाङ्ग and पलाश, लोचन and अब्ज, इन्द्र and ह्रद ।

N. B. The विशदत्व of भ्रूयुग corresponds with the शुभ्रता of प्रालेयावतति, and the वलिन-त्व (i. e. वलिमत्-त्व) of the अपाङ्गs corresponds with the folds of the petals.

Ghantapatha.—विशदेति । पुनश्च ; 'विशदेन' पलितपाण्डुरेण (1) 'भ्रूयुगेण' 'छन्ने' 'वलिनापाङ्गे' वलिमत्प्रान्ते 'लोचने' यस्य स तथोक्तः । "अपाङ्गौ नेत्रयोरन्तौ" इत्यमरः । पामादित्वात् लोमादिसूत्रेण न-प्रत्ययः (क) (2) । 'प्रालेयावतत्या' हिमसंहत्या 'म्लानपलाशानि' क्लान्तदलानि 'अब्जानि' यस्मिन् सः 'ह्रद इव' "स्थितः" ॥ ४ ॥

Malli. Explained.

1. पलितपाण्डुर—White on account of having gray hair.

2. पामादित्वात् &c. [In वलिन] the affix is न by the rule 'लोमादि &c.', the word वलि belonging to पामादि-group. [The full rule is—"लोमादि-पामादि-पिच्छादिभ्यः शनेलचः' । The affixes are श, न and इलच् । लोमादिभ्यः शः, पामादिभ्यः न, and पिच्छादिभ्यः इलच् । Thus लोमशः, पामनः [similarly वलिनः], and पिच्छिलः ।

Notes.

विशदभ्रूयुग etc.—भ्रुवोर्युगम्—६तत्, विशदं भ्रूयुगम्—कर्मधा, विशदभ्रूयुगेण छन्ने—३तत् । वलिनौ अपाङ्गौ ययो ते वलिनापाङ्गे,—बहुव्रीहिः । विशदभ्रूयुगच्छन्ने वलिनापाङ्गे लोचने यस्य सः—बहुव्रीहिः ।

छन्न—छद (with or without णिच्) + क्त—कर्मणि । 'रदाभ्यां निष्ठातो नः, पूर्वस्य च दः' । With णिच, the optional form is छादित ।

(क) For न-प्रत्ययः all read वलच्-प्रत्ययः which is irrelevant and is not supported by the rule referred to by Malli.

वलिन—वलि + न – अस्त्यर्थे, पामादित्वात् । 'लोमादि-पामादि-पिच्छादिभ्यः शनेलचः' ।

N. B. The form वलित also is available by the rule 'तदस्य सञ्जातं तारकादिभ्य इतच्' । वलिभ is another form by the rule 'तुन्दिवलिवटिभ्यो भः' ।

प्रालेयावतति—&c. प्रालेयस्य अवततिः—६तत्, प्रालेयावतत्या म्लानानि—३तत्, प्रालेयावततिम्लानानि पलाशानि येषां तानि—बहुव्रीहिः । अपसु जायन्ते यानि तानि अब्जानि—उपपद-तत्, प्रालेयावततिम्लानपलाशानि अब्जानि यस्मिन् सः—बहुव्रीहिः ।

प्रालेय—प्रलीयन्ते पदार्थाः अत्र इति हिमादिः 'प्रलयः' (प्र – ली + अच्—अधिकरणे) । तत आगतम् इति प्रलय + अण् । य is changed into इय by the rule—'केकय-मित्रयु-प्रलयानां यादेरियः' ।

अवततिः—अव – तन + क्ति—भावे । संहतिः ।
म्लान—म्लै + क्त कर्त्तरि ।
पलाश—"पत्रं पलाशं छदनं दलं पर्णं छदः पुमान्"—अमरः ।
अब्ज—अप् – जन् + ड—कर्त्तरि । Rule—'सप्तम्यां जनेर्डः' ।

Rhetoric.—The fig. of speech is उपमा (Simile).

Ch. of Voice.—विशदभ्रूयुग......लोचनं प्रालेयावतति......पलाशाब्जं छदम् इव [स्थितम्] [ददर्श] ।

Questions.—Explain the points of comparison. वलिन and प्रालेय—D and M. अपाङ्ग and पलाश—M.

Supported by his stick like a glutton conducted by his wife.

आसक्तभरनीकाशैरङ्गैः परिकृशैरपि ।
आद्यूनः सद्गृहिण्येव प्रायो यष्ट्यावलम्बितः ॥५॥

Eng. Equiv. आसक्त—attached. आसक्त-भर—attached with burden, i. e. burdensome. आसक्तभरनीकाश—like burdensome things. परिकृश—extremely emaciated. आद्यून—a glutton.

Prose.—परिक्षीणः अपि आसन्नभरनीकाशैः अङ्गैः [उपलक्षितः], [अतएव] आद्यूनः सद्गृहिण्या इव, प्रायः यष्ट्या अवलम्बितः [मुनिरूपः (इन्द्रः) ददृशे— from sl. 2].

Bengali.—অতিক্ষীণ তথাপি ভারাক্রান্তবৎ অঙ্গযুক্ত, সাধ্বী পত্নী কর্তৃক (ধারিত) ঔদরিকের ন্যায়, প্রায় সম্পূর্ণরূপে যষ্টি কর্তৃক ধারিত অবস্থায় [ইন্দ্র পুরোভাগে দৃষ্ট হইলেন] । ৫ ।

English.—With limbs extremely emaciated, yet as heavy as burdensome things, being mostly supported by his stick, like a glutton supported by his good wife, [Indra was seen by his son Arjuna]. 5.

Elucidation.—Indra, while appearing before Arjuna as an old hermit, feigned so much incapacity that he could hardly keep himself up and walk on except with the help of his stick, and thus he looked like a glutton who though physically incapacitated (by diseases of his own making), is often found to be helped and conducted by his devoted wife towards a house where a feast has been announced.

Points of Comparison.—Indra and आद्यून, यष्टि and सद्गृहिणी ।

Ghantapatha.—आसन्नेति । पुनश्च ; 'परिक्षीणः' परिक्षीर्णः 'अपि' 'आसन्नभरनीकाशैः' भाराक्रान्तसदृशैः सभारवद्गुरुभवद्भिः (1) इत्यर्थः ["इकः काशे" इति दीर्घः (2) ।] 'अङ्गैः' "उपलक्षितः"—कार्श्यात् लघूनि अपि स्वाङ्गानि स्वयं वोढुम् असमर्थ इत्यर्थः ; अतएव 'आद्यूनः' औदरिकः ["आद्यूनः स्यादौदरिको विजिगीषाविवर्जिते" (3) इत्यमरः । आङ्पूर्वाद्दीव्यतेः क्तः । "च्छ्वोः शूडनुनासिके च" इति ऊठादेशः (4) । "दिवोऽविजिगीषायाम्" इति निष्ठा-नत्वम् (5) ।] 'सद्गृहिण्या' अनुकूल-कलत्रेण 'इव' 'प्रायः' प्राचुर्येण 'यष्ट्या' अवलम्बनदण्डेन 'अवलम्बितः' धारितः, न तु स्वशक्त्या इति भावः ॥ ५ ॥

Malli. Explained.

1. सभारवत् गुरुभवद्भिः—Appearing heavy like a weighty thing.

2. इकः काशे &c.—The इ of नि in नीकाश is lengthened by the rule 'इकः काशे' [meaning—The इ of an इकारान्त Upasarga is lengthened when the word काश (formed in कर्तृवाच्य) follows]. [Thus, नि - काश = नीकाश, प्रति-काश = प्रतीकाश].

3. आद्यूनः स्यात् &c.—When the sense is not one of विजिगीषा the word is आद्यून in the same sense as that of औदरिक। [In the sense of विजिगीषा the form is आद्यूत (आ + द्यूत)].

4. च्छ्वोः शूठ् अनुनासिके च—छ (which changes itself into च्छ) is changed into श, and व is changed into ऊठ् (i. e. ऊ) when an अनुनासिक affix (e. g. न), [or the affix क्विप्, or a कित् or ङित् affix beginning with झल्] follows. [Thus, प्रछ (= प्रच्छ) + न = प्रश्नः, दिव + क्त = द्यूत (in the sense of gambling) or द्यून]. For झल्, see Preliminary Information.

N. B. ऊढ + आदेशः gives the form ऊढादेशः and not ऊठादेशः as given by Malli. But in such cases strict grammar is often slackened so that the original form may be easily recognised.

5. दिवः अ-विजिगीषायाम्—[The त of the affix क्त] after the root दिव् is changed into न when the sense is not one of विजिगीषा।

Notes.

आसक्तभर-नीकाशैः—आसक्ताः भराः येषु तानि आसक्तभराणि.—बहुव्रीहिः; आसक्तभरैः सदृशानि इत्यर्थे आसक्तभरनीकाशानि—नित्यसमासः। तैः। Adj. to अङ्गैः।

आसक्त—आङ् - सञ्ज + क्त कर्त्तरि।

भरः—भृ + अप्—कर्म्मणि by the rule "ऋदोरप्"। [भार is—भृ (with short ऋ) + घञ्—कर्म्मणि]।

नीकाश—नि - काश + अच्—कर्त्तरि। 'इकः काशे' इति उपसर्गस्य दीर्घत्वम्।

अङ्गैः—'इत्थम्भूतलक्षणे' इति उपलक्षणे ३या।

परिक्लशैः—क्लिश + क्त—कर्त्तरि इति क्लिशः, निपातनात्, by the rule 'अनुपसर्गात् फुल्ल-क्षीव-कृशोल्लाघाः'। परिक्लेशेन क्लिष्टानि इति परिक्लिष्टानि—प्रादि-समासः। तैः। Adj. to अङ्गैः। परि – क्लिश् + क्त would give the form परिक्लिशित।

आद्यूनः—आ – दिव् + क्त। "च्छ्वोः शूडनुनासिके च' इति सूत्रेण ऊठ् इत्यादिशः। The त of क्त is changed into न by the rule 'दिवः अविजिगीषायाम्'। दिव + क्त—द्यून (अविजिगीषायाम्), द्यूत (विजिगीषायाम्)।

सद्गृहिण्या—गृहमस्ति अस्या इति गृहिणी। गृह + इनि। 'ऋन्नेभ्यः ङीप्' इति ङीप्। सती गृहिणी सद्गृहिणी—कर्मधा—तया। अनुक्तकर्त्रि' इया।

प्रायः—बाहुल्येन। अव्यय; adv. There is another प्राय which is masculine. 'प्रायश्चानशने मृत्यौ तुल्य-बाहुल्ययोरपि' – इति विश्वः।

यष्ट्या—अनुक्तकर्त्रा इया।

N. B. यष्टि being the analogue of गृहिणी, it has been put as the subject and not as the object of अवलम्बित।

Rhetoric.—The fig. of speech is उपमा।

Ch. of Voice.—...अङ्गैः [उपलक्षितम्]...आद्यूनम् अवलम्बितम् [ददृशे]।

Questions. आमक्तभस्मीकाशैः—S. नीकाश and परिक्लश—D. आद्यून—D and M.

Shining in spite of concealed identity.

गूढोऽपि वपुषा राजन् धाम्ना लोकाभिभाविना।
अंशुमानिव तन्वभ्रपटलच्छन्नविग्रहः॥ ६॥

Eng. Equiv. राजत्—shining. धामन्—lustre. लोकाभिभाविन्—pervading the world. अंशुमान्—the sun. अभ्रपटल—clouds. विग्रह—body.

Prose.—वपुषा गूढोऽपि, तन्वभ्रपटलच्छन्नविग्रहः अंशुमान् इव, लोकाभिभाविना धाम्ना राजन् [मुनिरूपः इन्द्रः ददृशे—from Sl. 2].

Bengali.—ছদ্মবেশদ্বারা প্রচ্ছন্ন হইলেও, অল্পমেঘাবৃতমূর্ত্তি সূর্য্যের ন্যায় লোকব্যাপি তেজোদ্বারা শোভমান অবস্থায় [ইন্দ্র পুরোভাগে দৃষ্ট হইলেন]। ৬।

English.—Though concealed by his disguise, yet shining by his lustre pervading the world, like the sun with the disc hidden under a light mass of clouds, [Indra was seen by his son Arjuna]. 6.

Points of Comparison.—वपुः and तन्वभ्रपटलम्, इन्द्रः and अंशुमान् ।

Ghantapatha.—गूढ इति । 'वपुषा गूढोऽपि' प्रच्छन्नरूपोऽपि इत्यर्थः । प्रकृत्यादिभ्य उपसङ्ख्यानात् तृतीया (1) । 'तन्वभ्रपटलच्छन्नबिम्बः' लोकाभ्र-वृन्दाच्छादितमूर्त्तिः 'अंशुमान् इव' 'लोकाभिभाविना' लोकव्यापिना 'धाम्ना' तेजसा ["धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोः इति हेमचन्द्रः (क) (2) ।] 'राजन्' दीप्यमानः—'ददृशे' इति पूर्वेण सम्बन्धः (3) ॥ ६ ॥

Malli. Explained.

1. प्रकृत्यादिभ्यः &c.—वपुषा is in तृतीया by the Várttika rule 'प्रकृत्यादिभ्यः उपसङ्ख्यानम्' [meaning—इया should be counted also after words प्रकृति, &c.].

2. धाम रश्मौ &c.—धाम (base—धामन) is used in the senses of रश्मि, गृह, देह, स्थान, जन्म and प्रभाव ।

3. ददृशे &c.—This and the preceding few slokas (Sl. 3-6) are connected with the word ददृशे occurring before (in Sl. 2].

N. B. Sl. 2—6 give one complete idea. One sentence consisting of more than four Slokas is called a कुलक—

द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकं विशेषकम् ।
कलापकं चतुर्भिः स्यात् तदूर्द्धं कुलकं स्मृतम् ॥

Notes.

गूढः—गुह + क्त—कर्मणि ।

वपुषा—इया । Neuter. इया by the Várttika 'प्रकृत्यादिभ्यः उपसंख्यानम्' । The base is वपुष्—neuter.

राजन्—राज + शतृ १मा विभक्ति १ वचन ।

(क) धाम रश्मौ &c.—Omitted in B.

धाम्ना—करणे ३या। धा+मनिन्। The bases is धामन्—neuter.

लोकाभिभावना—लोकम् अभिभवितुं शीलं यस्य तेन इति लोक-अभि-भू+णिनि—कर्त्तरि। 'लोकस्तु भुवने जने'—अमरः। लोकव्यापिना।

अंशुमान्—अंशुः (=किरणः) अस्ति अस्य इति अंशु+मतुप्। ततः प्रथमाया एकवचनम।

तन्वभ्रपटलच्छन्नविग्रहः—अभ्राणां पटलम् (समूहः)—६तत्, तनु (लोकम्) अभ्रपटलम्—कर्म्मधारयः। तन्वभ्रपटलेन छन्नः विग्रहः यस्य सः—बहुव्रीहिः।

अभ्र is variously derived. (i) अभति गच्छति इति अभ+अच्—कर्त्तरि; (ii) अपो बिभर्त्ति इति अप्-भ्र+क-कर्त्तरि; (iii) न भ्रश्यति जलम् अस्मात् इति नञ्-भ्रन्श+ड—अपादाने; (v) आपो भ्रश्यन्ति अस्मात् इति अप्+भ्रन्श+ड—कर्त्तरि।

छन्न—For derivation, see Sl. 4.

विग्रह—विविधं सुखादि गृह्णाति इति वि-ग्रह्+कर्त्तरि, विविधैः व्याध्यादिभिः गृह्यते वा इति वि-ग्रह्+अप्—कर्म्मणि। 'शरीरं वर्ष्म विग्रहः'—अमरः।

Rhetoric.—The fig. of speech is उपमा।

Ch. of Voice.—...गूढमपि...तन्वभ्र...विग्रहम् अंशुमन्तमिव...राजन्तम् [ददर्श]।

Questions. तन्वभ्रपटलच्छन्नविग्रहः—S. अभ्र and विग्रह—D and M.

Even with his infirm body he made the hermitage struck with his lustre.

जरतीमपि बिभ्राणस्तनुमप्राकृताकृतिः।
चकाराक्रान्तलक्ष्मीकः ससाध्वसमिवाश्रमम्॥ ७

Eng. Equiv. जरती—worn out. अप्राकृताकृतिः—of super-human appearance. आक्रान्तलक्ष्मीकः—one who has overcome the beauty of the hermitage. स-साध्वस—frightened.

Prose.—जरतीं तनुं बिभ्राणः अपि अप्राकृताकृतिः [इन्द्रः] आक्रान्तलक्ष्मीकः [सन्] आश्रमं ससाध्वसमिव चकार।

Bengali.—জীর্ণ শরীর ধারণ করিয়াও অলোকসামান্যমূর্তি ইন্দ্র [নিজ তেজে] আশ্রমের শোভা অভিভূত করিয়া আশ্রম খানিকে ভয়ে যেন বিচলিত করিয়াছিলেন। ৭।

English.—Indra, of super-human appearance, though possessed of a worn out body, having overcome [by his lustre] the beauty of the hermitage, made it alarmed as it were. 7.

Elucidation.—Indra presented himself in Arjuna's hermitage with an old and infirm body, but still his natural super-human appearance made the hermitage inspired with awe, the painful element of the fear caused by his majestic appearance being replaced by wonder.

Ghantapatha.—जरतीमिति। 'जरती' जीर्णाम्। "जीनो जीर्णो जरन्नपि" इत्यमरः। जीर्यतेः अतीतार्थे अतृन् प्रत्ययः। "उगितश्च" इति ङीप् (1)। 'तनु' शरीरं 'बिभ्राणः' दधत् 'अपि' 'अप्राकृता' अलौकसामान्या 'आकृतिः' मूर्त्तिः यस्य सः इन्द्रः 'आक्रान्ता' अभिभूता 'लक्ष्मीः' आश्रमशोभा येन स 'आक्रान्तलक्ष्मीकः' [अत एकवचनान्त-लक्ष्मीशब्दोत्तरपद-बहुव्रीहौ "उरःप्रभृतिभ्यः कप्" इति नित्य-कबाश्रयणम्, एकवचनोत्तरपदस्यैव लक्ष्मीशब्दस्य उरःप्रभृतिषु पाठात्। "शेषाद् विभाषा" इति विकल्पाश्रयणे तु बहुवचनोत्तरपद इति विवेकः (क) (2)।] आश्रमंससाध्वसमिव चकार। तेजस्विदर्शनात् भयं भवति, तत् तु न दुःखजनकं, तस्य अमानुषत्वादिति सूचयितुम् इव-शब्दः (3) ॥ ७ ॥

Malli. Explained.

1. जीर्यतेः &c.—In जरती (fem. of जरत्) the affix is अतृन् after the root जॄ in past tense. The fem. affix is ङीप् by the rule 'उगितश्च' [meaning—words with affixes having उक् (i. e. उ, ऋ and ऌ) as इत् take ङीप् in fem.]

2. उरःप्रभृतिभ्यः &c.—When आक्रान्तलक्ष्मीकः is expounded as आक्रान्ता लक्ष्मीः (singular) येन सः then—with the singular लक्ष्मी as the उत्तरपद of the बहुव्रीहि—we are to have recourse to compulsory (नित्य) कप् as समासान्त by the rule 'उरःप्रभृतिभ्यः कप्', because the *singular* लक्ष्मी is read in the उरःप्रभृति group. If we want to have optional कप् by the rule 'शेषाद् विभाषा'

(क) J reads नित्यं कप् for नित्य-कबाश्रयणम् and omits एकवचनोत्तर-पदस्यैव......विवेक।

then we should have *plural* लक्ष्मी, i. e. लक्ष्म्य:, as the उत्तरपद। This is the distinction (विवेक)।

3. तेजस्विदर्शनात् &c.—At the sight of a majestic person fear arises ; but [in the present case] it was not painful ; because, it was of super-human origin. To indicate this the word इव [has been used].

N. B. Although the fact that the stranger was a super-human being was *not* known to the inhabitants of the hermitage yet the natural result presented itself, and therefore, the appearance of such a person caused fear but *painless* fear. The fear was combined not with pain but with wonder.

Notes.

जरतीम्—जृ (जृष्) + अतृन्, भूते (अतीते)। 'जीर्य्यतेरतृन्'। 'उगितश्च' इति ङीप्। Adj. to तनुम्।

बिभ्राण:—भृ (जुहोत्यादि) + शानच्—कर्त्तरि। It is उभयपदी। Conj. लट्—बिभर्त्ति बिभृत: बिभ्रति ; बिभृते बिभ्राते बिभ्रते। लङ्—अबिभ:, अबिभृताम्, अबिभरु: ; अबिभृत, &c. लिट् बभार, बिभराञ्चकार, बिभराम्बभूव, बिभरामास ; बभ्रे, बिभराञ्चक्रे, &c. लुङ्—अभार्षीत् ; अभृत।

तनुम्—Obj. of बिभ्राण:। Also spelt (with long ऊ) तनूम्। 'स्त्रियां मूर्त्तिस्तनुस्तनू:'—अमर:।

अप्राकृताकृति:—प्रकृतौ भवा प्राकृता (प्रकृति + अण्)। 'प्राकृतश्च पृथग्जन:' —अमर:। न प्राकृता अप्राकृता—नञ्-तत्, अप्राकृता (= अलौकिकसामान्या) आकृति: (मूर्त्ति:) यस्य स:—बहुव्रीहि:।

आक्रान्तलक्ष्मीक:—आक्रान्ता (= अभिभूता) लक्ष्मी: (आश्रमशोभा) येन स: आक्रान्तलक्ष्मीक:—बहुव्रीहि:, 'उर:प्रभृतिभ्य: कप्' इति नित्य कप (समासान्त:)। लक्ष्मी: (first case-ending singular number) is read in the उर:प्रभृति list. Or आक्रान्ता लक्ष्म्य: (plural) येन स: (आक्रान्तलक्ष्मी: or) आक्रान्तलक्ष्मीक:—कप् (समासान्त) being optional here by the rule 'शेषाद्विभाषा'।

ससाध्वसम्—'साध्वसं भयम्'—अमरः। More properly speaking, साध्वस is भय and विस्मय combined. साध्वसेन सह वर्त्तमानम् इति ससाध्वसम्—बहुव्रीहिः। 'वोपसर्जनस्य' इति सहशब्दस्य वैकल्पिकः सकारादेशः। पक्षे—सहसाध्वसम्। Adj. to आश्रमम्।

आश्रमम्—Obj. of चकार। For derivation etc., see. Sl. 1.

Rhetoric.—The fig. of speech is उत्प्रेक्षा।

Ch. of Voice.—...बिभ्राणेन...अप्राकृताकृतिना [इन्द्रेण] आक्रान्तलक्ष्मीकेण [मता] आश्रमः (or आश्रमम्) ससाध्वसः (or ससाध्वसम्) चक्रे।

Questions. जरतीम् and बिभ्राणः—D and M. Discuss the कप् in आक्रान्तलक्ष्मीकः। ससाध्वसम्—S and M.

Arjuna was inclined towards him, though a stranger

अभितस्तं पृथासूनुः स्नेहेन परितस्तरे।
अविज्ञातेऽपि बन्धौ हि बलात् प्रह्लादते मनः॥८

Eng. Equiv. अभितः—towards. पृथासूनु—son of Prithá (Kunti); here Arjuna.

Prose.—पृथासूनुः तम् अभितः स्नेहेन परितस्तरे। हि (=यतः) बन्धौ अविज्ञाते अपि बलात् मनः प्रह्लादते।

Bengali.—কুন্তীতনয় অর্জুন ইন্দ্রের প্রতি স্নেহাভিষিক্ত হইলেন। [কারণ] বন্ধু অজ্ঞাত থাকিলেও মন বলপূর্ব্বক তৎপ্রতি [স্নেহবশতঃ] আহ্লাদিত হয়। ৮।

English.—Arjuna (lit. Pritha's son) was over head and ears in affection for him (Indra). Mind rejoices perforce in a relation [through affection] although he may be a stranger. 8.

Ghantapatha.—अभित इति। 'पृथासूनुः' अर्जुनः 'तम्' इन्द्रम् 'अभितः' तं प्रति 'स्नेहेन परितस्तरे' तद्गोचरेण प्रेम्णा (1) पर्य्यावृतः। स्तृणोतेः कर्म्मणि लिट् (2)। "ऋतश्च संयोगादेर्गुणः" इति गुणः (3)]। ननु अज्ञात-सम्बन्धविशेषस्य तस्य इन्द्रे (क) कथं स्नेहोदयः (4) इत्यत आह—अविज्ञात इति। 'बन्धौ' सुहृदि अविज्ञातेऽपि बन्धः अयमिति अज्ञातेऽपि—'बलात्' वासनासत्तावशात् एव 'मनः' 'प्रह्लादते हि' स्निह्यतीत्यर्थः॥ ८॥



(क) तस्य इन्द्रे—Omitted in J.

Malli. Explained.

1. तद्गोचर—With regard to him.

2. स्तृणोतेः &c.—तस्तरे is in the कर्मवाच्य (passive voice) of लिट् of the root स्तृ—स्वादिगणीय।

3. ऋतश्च &c.—Roots ending in short ऋ and beginning with conjunct constants undergo गुण in लिट्। N. B. If the root is स्तॄ (with long ॠ—क्र्यादि) then the गुण is to be had by the rule 'ऋच्छत्यृताम्'।

4. ननु &c.—Well, how could there arise his affection for Indra, as he was not yet aware of the relationship ?

Notes.

अभितः—अभि + तस् by the rule 'पर्यभिभ्यां च'।

तम्—अभितः-शब्दयोगे २या by the Várttika 'अभितः-परितः-समया-निकषा-हा-प्रतियोगेऽपि दृश्यते'।

पृथासूनुः—पृथायाः सूनुः—६तत्। पृथा is a name of कुन्ती। All the sons of पृथा may, no doubt, be styled पृथासूनु, but the designation is here applied to Arjuna. उक्ते कर्मणि १मा।

स्नेहेन—स्निह + घञ्—भावे। अनुक्तकर्त्तरि ३या।

परितस्तरे—परि – स्तृ or स्तॄ + लिट् ए—कर्मणि।

बन्धौ—अधिकरणे ७मी। बन्धु means 'a friend' as well as 'a relation.'

बलात्—बलमवलम्ब्य इति 'ल्यप् लोपे कर्मण्यधिकरणे च' इति ५मी।

प्रह्लादते—प्र – ह्लाद + लट् ते।

मनः—Nom. to प्रह्लादते।

Rhetoric.—The fig. of speech is अर्थान्तरन्यास which has thus been defined :—

सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।
यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा॥

Here, the particular case (विशेषः) stated in the first half is being supported by the general statement (सामान्यम्) contained in the second.

N. B. The 2nd half is the हेतु of the 1st half. But still the fig. of speech is not काव्यलिङ्ग but अर्थान्तरन्यास। Because the हेतु here is not a निष्पादक-हेतु but a समर्थक-हेतु। See Sa'hitya-darpana on काव्यलिङ्ग।

Ch. of Voice.—...पृथासूनुं स्म हः परितस्तार।...मनसा प्रह्वायते।

Questions. पृथासूनुं—C. परितस्तरे—D. बन्धौ—C.

Indra, received by his son, spoke as follows :—

आतिथेयीमथासाद्य सुतादपचितिं हरिः।
विश्रम्य विष्टरे नाम व्याजहारेति भारतीम् ॥९

Eng. Equiv. आतिथेय—due to a guest. अपचिति—worship. हरि—a name of Indra. विष्टर—a seat. भारती—speech.

Prose.—अथ हरिः सुतात् आतिथेयीम् अपचितिम् आसाद्य विष्टरे विश्रम्य नाम इति भारतीं व्याजहार।

Bengali.—অনন্তর, ইন্দ্র স্বপুত্র অর্জ্জুনের নিকট হইতে অতিথিযোগ্য সেবা গ্রহণ-পূর্ব্বক আসনে যেন বিশ্রাম করিয়া নিম্নলিখিত বাক্য বলিলেন। ৯।

English.—Then, Indra (Hari) receiving the rites of hospitality from his son and taking rest, as it were, on a seat spoke the following words. 9.

Ghantapatha.—आतिथेयीमिति। 'अथ' 'हरिः' इन्द्रः 'सुतात्' अर्जुनात् 'आतिथेयीम्' अतिथिषु साध्वीम् ["पथ्यतिथिवसतिस्वपतेर्ढञ्" (1)] 'अपचितिं' पूजाम् 'आसाद्य' प्राप्य ["पूजा नमस्यापचितिः" (2) इत्यमरः।] 'विष्टरे' आसने ["वृक्षासनयोर्विष्टरः" (3) इति स्तृणातेरप्-प्रत्ययः। "वृक्षासनयोर्विष्टरः" (4) इति षत्वम्।] 'विश्रम्य नाम विश्रम्य किल—श्रमम् अपनीयेत्यर्थः 'इति' वक्ष्यमाणप्रकारां 'भारतीं' 'व्याजहार' उक्तवान्। "व्याहार उक्तिर्लपितम्" (5) इत्यमरः॥ ९॥

Malli. Explained.

1. पथ्यतिथि &c.—The words पथिन्, अतिथि, वसति and स्वपति take the affix ढञ् (=एय) [in the sense of तत्र साधुः]. [Thus अतिथौ साधुः इति आतिथेयः, अतिथौ साध्वी इति आतिथेयी—the word अपचिति being fem.]

2. पूजा &c.—पूजा, नमस्या and अपचिति are synonymous.

3. ॠदोरप्—Roots ending in ॠ (long ॠ) and उ (i. e. short उ and long ऊ) take the affix अप्। [Thus, विष्टर is वि – स्तृ + अप्—कर्म्मणि].

4. वृक्षासनयोः विष्टरः—In the senses of वृक्ष and आसन the form is विष्टर [instead of विस्तर], i. e. the स of स्तृ is changed into ष।

5. व्याहार उक्तिः &c.—व्याहार, उक्ति and लपित are synonymous.

Notes.

आतिथेयीम्—'अतति' सततं गच्छति इति अत + इथिन्—कर्त्तरि, अतिथिः। यद्वा अविद्यमाना तिथि र्यस्य सः अतिथिः—बहुव्रीहिः।

Cf. यस्य न ज्ञायते नाम न च गोत्रं न च स्थितिः।
अकस्माद् गृहमायाति सोऽतिथिः कथ्यते बुधैः॥

Also, एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः।
अनित्यं हि स्थितो यस्मात् तस्मादतिथिरुच्यते॥

अतिथिषु साध्वीम् इति आतिथेयीम्—अतिथि + ढञ् by the rule "पथ्यतिथि-वसति-स्वपतेर्ढञ्"। [ढ = एय]।

आसाद्य—आङ् – सद् + णिच् + ल्यप्। = प्राप्य।

सुतात्—सु (षु प्रसवे) + क्त—कर्म्मणि। तस्मात्, अपादाने ५मी।

अपचितिम्—पूजाम्। अप – चाय + क्तिन्—भावे। चाय becomes चि by the Várttika 'चायतेः क्तिनि चि-भावो वाच्यः'। 'चायृ" पूजा-निशामनयोः इति धातुः। Derived from the root चि the word would mean अपचय (loss) and not पूजा।

हरिः—इन्द्रः। Different meanings of हरि—

'यमानिलेन्द्र-चन्द्रार्क-विष्णु-सिंहांशु-वाजिषु।
शुकाहि-कपि-भेकेषु हरिर्ना कपिले त्रिषु'॥—अमरः।

विष्टरे—अधिकरणे ७मी। वि – स्तृ + कर्म्मणि। "ॠदोरप्" इति अप् 'वृक्षासनयोः विष्टरः' इति षत्वम्। स् of स्तृ is changed into ष् in the senses of 'a tree' and 'a seat'. When स् is thus changed into ष्, त् is also changed into ट् by the rule 'ष्टुना ष्टुः'। In other senses, the forms are विस्तर and विस्तार।

नाम—an अव्यय used here in the sense of अलीक, a feigned or pretended action. Indra did not actually take rest but he pretended to do so. Cf. 'कात्तान्तिकी नाम भूत्वा'—Daśakumára-charita ; 'परिश्रमं नाम विनीय च क्षणम्'—Kumára V. 32.

व्याजहार—उक्तवान्। वि – आ – हृ + लिट् णल्। हृ, preceded by वि – आ, means 'uttering.' The presence of an उपसर्ग often alters the sense.—

Cf. उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
प्रहाराहार-संहार-विहार-परिहारवत्॥

भारतीम्—वाचम्। Obj. of व्याजहार। 'ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती।'—अमरः।

Ch. of Voice—......हरिणा......भारती......व्याजह्रे।

Questions. आतिथेयी and विष्टर—D and M. भारती—M.

You have done well by commencing penance early in life.

त्वया साधु समारम्भि नवे वयसि यत्तपः।
ह्रियते विषयैः प्रायो वर्षीयानपि मादृशः॥ १०

Eng. Equiv. ह्रियते—is attracted. विषयाः—pleasures of senses.

Prose.—त्वया साधु समारम्भि यत् नवे वयसि तपः [चर्य्यते]। मादृशः वर्षीयान् अपि प्रायः विषयैः ह्रियते।

Bengali.—তুমি ভালই আরম্ভ করিয়াছ, কেননা এই নবীন বয়সে তপশ্চর্য্যা করিতেছ। আমার মত বর্ষীয়ান্‌ও প্রায়ই বিষয়ের দ্বারা আকৃষ্ট হয়। ১০।

English.—You have begun well that you are practising penance in your youth. Even a very old man like me is very often attracted by pleasures of the senses. 10.

Gantapatha.—अथ प्रथमं तावन्मुनिवत् एनं मुमुक्षुं मत्वा आह (1)—त्वयेति। 'त्वया' 'साधु समारम्भि' सम्यक् उपक्रान्तं—रभेः कर्मणि लुङ् (2)। कुतः 'यद्' यस्मात् 'नवे वयसि' यौवने 'तपः' "चर्य्यते" इति शेषः। तथापि—अहमिव दृश्यतेऽसौ 'मादृशो' 'वर्षीयान्' अतिवृद्धः 'अपि'। ["प्रियस्थिर—" इत्यादिना वृद्धशब्दस्य वर्षादेशः (3)।] 'प्रायः' विषयैः' 'ह्रियते' आकृष्यते, किमु भवादृशो यवीयान् (4) इति भावः॥ १०॥

Malli. Explained.

1. अथ &c.—Now, first of all taking him as a मुमुक्षु, Indra speaks.—

2. रभ: कर्म्मणि लुङ्—समारम्भि is in लुङ् added to the root रभ् (preceded by सम्) in कर्म्मवाच्य (passive voice).

3. प्रियस्थिर &c.—In वर्षीयान् (वृद्ध + ईयसुन्), वृद्ध is changed into वर्ष् by the rule 'प्रिय-स्थिर &c.' [For the full rule, see द्राघीयसा—Sl. 2, Malli. Expl. 3].

4. किमु &c.—Not to speak of a youngster like you.

Notes.

त्वया—अनुक्त-कर्त्तृ of समारम्भि।

साधु—सुष्ठु। Well. An adv.

समारम्भि—सम् + आ – रभ + लुङ्—कर्म्मणि। नुम् is the augment (आगम) by the rule 'रभेरशब्लिटो:'।

तप:—तप् + असुन्—कर्म्मणि। उक्ते कर्म्मणि प्रथमा in connection with चर्य्यते to be understood.

विषयै:—वि – सि (षिञ्) + अच्—कर्त्तरि। 'पचाद्यच्'। 'परिनिविभ्य:—' इति षत्वम्, इति विषया:। तै:। अनुक्त-कर्त्तृ of क्रियते।

प्राय:—See Sl. 5.

वर्षीयान्—वृद्ध + ईयसु। वृद्धशब्दस्य वर्षादेश:। For the complete rule 'प्रिय-स्थिर—' etc. see Sl. 2.

मादृश:—अहमिव दृश्यते असौ इति मादृश:। अस्मद् – दृश् + कञ्—कर्म्मणि (Malli.). More accurately, the exposition should be अहमिव अयं पश्यति (= ज्ञानविषयी भवति) इति कञ्—कर्म्मकर्त्तरि। अस्मद् is changed into मत् to denote a single individual by the rule 'प्रत्ययोत्तरपदयोश्च'। This मत् is changed into मा by the rule 'आ सर्वनाम्न:'। There are three forms in this sense :—(1) मादृश with कञ्, (2) मादृश् with क्विन्, and (3) मादृक्ष with क्स।

N. B. On the word सदृश्, the author of the बालमनोरमा remarks—'समानो दृश्यते इति न विग्रह:, कर्त्तर्य्येव क्विन्-विधानात्; किन्तु कर्म्मकर्त्तरि क्विन्-कञौ। समान: पश्यति इति विग्रह:। समानत्वेन ज्ञानविषयी भवतीत्यर्थ: इति भाष्ये

-स्पष्टम्'। Elsewhere he gives an alternative view—'रूढ़शब्द एवायम् इत्यन्ये'।

Rhetoric.—The fig. of speech is वैधर्म्येण अर्थान्तरन्यासः (although the 2nd half is the हेतु of the 1st half—see under Sl. 8).

Ch. of Voice.—त्वं...समारब्धाः...तपः...[चरसि]। माट्टशम्...वर्षीयांसम्...विषयाः हरन्ति।

Questions. समारब्धि and माट्टशः—D.

You have a rare combination of merits—internal and external

श्रेयसीं तव सम्प्राप्ता गुणसम्पदमाकृतिः।
सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम् ॥११॥

Eng. Equiv. श्रेयस्—superior. गुण-सम्पद्—excellence of merits.

Prose.—तव [रम्या] आकृतिः श्रेयसीं गुणसम्पदं सम्प्राप्ता। लोके रम्यता सुलभा, गुणार्जनं हि दुर्लभम्।

Bengali.—তোমার [রম্য] আকৃতি শ্রেষ্ঠ গুণসম্পদের অধিকারী হইয়াছে। পৃথিবীতে রম্যতা সুলভ, কিন্তু গুণার্জ্জন দুর্লভ। ১১।

English—Your [charming] appearance has acquired a superior excellence of merits. Beauty (physical) is easily available in this world, but the acquisition of merits is rare 11.

Ghantapatha.—अथ एवम् अनारम्भे तव स्वाकारलाभोऽपि विफलः स्यादित्याशयेन (1) आह—श्रेयसीमिति। 'तव' 'आकृतिः' मूर्त्तिः, रम्या इति शेषः, 'श्रेयसीं' श्रेष्ठां 'गुणसम्पदम्' तपःसमारम्भरूपां 'सम्प्राप्ता', अतो न निष्फलेति भावः। न च स्वाकारा गुणाढ्याश्च कियन्तो न सन्तीति वाच्यमित्याह—लोक इति [सुलभेति ?] (2)। 'लोके 'रम्यता' रम्याकारता 'सुलभा' 'हि' (3) 'गुणार्जनं' गुणसम्पादनं 'दुर्लभं', त्वयि तु उभयं सम्पद्यते इति हेतः (क) परमामोदः (4) इति भावः ॥ ११ ॥

Malli. Explained.

1. एवम् अनारम्भे &c.—In the absence of such an act the acquisition of your good appearance (स्वाकार=सु+आकार) would be in vain.

(क) अस्माकं for हेतः, in J. This seems to be due to the obscurity of the expression हेतः परमामोदः।

2. न च &c.—And it should not be argued that "are there not some persons who are of beautiful appearance and, at the same time, possessed of good qualities?"—To this he says—लोके &c. (or rather सुलभा &c.)

3. हि—B. N. Malli. seems to have shifted हि to this *intermediate* position so that it may be connected with both the sentences.

4. हेम्नः परमामोदः—[This combination] is as beautiful as the presence of excellent smell in gold. (आमोदः = गन्धः) । Cf. the Bengali expression "सोनाय सुगन्ध" ।

Notes.

श्रेयसीम्—प्रशस्य + ईयस्. 'प्रशस्यस्य श्रः' इति आदेशः. ततः उगितश्च इति ङीप्, श्रेयसी, ताम् । Adj. to गुणसम्पदम् । The comparison is between Arjuna and other ordinary persons.

सम्प्राप्ता—सम् – प्र – आप् + क्त—कर्त्तरि, स्त्रियामाप् । Adj to आकृतिः ।

गुणसम्पदम्—गुणानां सम्पत् (६तत्) or गुणा एव सम्पत् (कर्मधारयः). ताम् । Obj. of सम्प्राप्ता । सम् – पद् + क्विप् (भावे) इति सम्पत् । Fem.

आकृतिः—Nom. to सम्प्राप्ता ।

सुलभा—सुखेन लभ्यते इति सु—लभ + खल्—कर्मणि by the rule 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' । स्त्रियामाप् । Adj. to रम्यता ।

रम्यता—रम् + यत्—अधिकरण-वाच्ये इति रम्यम् । रम्यस्य भावः इति रम्यता ।

दुर्लभम्—दुःखेन लभ्यते इति दुर् – लभ + खल्—कर्मणि ।

Rhetoric.—The fig. of speech in the sloka is वैधर्म्येण अर्थान्तरन्यासः । In the first half the fig. of speech is सम । "सम' योग्यतया योगो यदि सम्भावितः क्वचित्" । The former is based on the latter. So, there is a संकर (mixture) of the two अलंकारs.

Ch. of Voice.—···आकृत्या श्रेयसी···गुणसम्पत्···सम्प्राप्ता । ···रम्यतया सुलभया [भूयते]···गुणार्जनेन दुर्लभेन [भूयते] ।

Questions. गुणसम्पत्—S. श्रेयसी and सुलभा—D.

Youth is transitory, and the sensuous objects are bitter in the long run.

शरदम्बुधरच्छाया-गत्वर्यो (क) यौवनश्रिय: ।
आपातरम्या विषया: पर्य्यन्त-परितापिन: ॥ १२

Eng. Equiv. शरदम्बुधरच्छाया—the appearance of autumnal clouds. गत्वर्य्य:—passing ; transient. यौवनश्री—beauty of youth. आपातरम्य—pleased for the time being. पर्य्यन्तपरितापिन्—painful in the end.

Prose.—यौवनश्रिय: शरदम्बुधरच्छाया-गत्वर्य्य: । विषया: आपातरम्या: [किन्तु] पर्य्यन्तपरितापिन: ।

Bengali.—যৌবনের সৌন্দর্য্যরাশি শরৎকালীন মেঘের ন্যায় চঞ্চল। বিষয় সকল আপাত-রমণীয় কিন্তু পরিণামে দুঃখপ্রদ। ১২।

English.—Beauty of youth is as transient as the appearance of autumnal clouds The objects of senses are sweet for the time being but very bitter in the end. 12

Ghantapatha.—यदुक्त' "त्वया साधु समारम्भि" इति, तदेव साधुत्व' संसार-नि:सारता-ख्यापनया युग्मे न उपपादयति (1)—शरदिति । 'यौवनश्रिय:' 'तावत् 'शरदम्बुधरच्छाया' इव 'गत्वर्य्य:' चञ्चला: । ["गत्वरश्च" इति क्वरबन्तो निपात: । "टिड्ढाणञ—" इत्यादिना ङीप् (2)] । 'विषया:' शब्दादयस्तु 'आपातरम्या:' तत्काल-रमणीया: । ["तदात्वे पात आपात:" (3) इति वैजयन्ती ।] 'पर्य्यन्ते' अवसाने 'परितापयन्ति' दु:ख' कुर्वन्तीति तथोक्ता: ॥ १२ ॥

Malli. Explained.

1. यदुक्तं &c.—The साधुत्व (wisdom) referred to in the statement 'त्वया साधु समारम्भि' the poet sets forth by speaking of the transitoriness of the world with a couple (युग्म) of verses.

2. गत्वरश्च &c.—The form गत्वर is derived in निपातन with the affix क्वरप् [added to the word गम्] by the rule 'गत्वरश्च' ।

(क) All read शरदम्बुधरच्छाया गत्वर्य्य:—uncompounded. But that reading is not supported by the exposition given by our commentator.

[In fem. ङीप् is added by the rule 'टिड्ढाणञ् &c.' [and the form is गत्वरी ; plural—गत्वर्यः].

3. तदात्वे &c.—The words पात and आपात mean तदात्व—the time being.

Notes.

शरदम्बुधरच्छाया-गत्वर्यः—धरतीति धरः। धृ+अच्–कर्त्तरि। अम्बुनः (जलस्य) धरः इति अम्बुधरः (मेघः)। शरदः or शरदि अम्बुधरः शरदम्बुधरः—६तत् or ७तत्। शरदम्बुधरस्य छाया शरदम्बुधरच्छाया—६तत्। शरदम्बुधर+छाया=शरदम्बुधरच्छाया by the Sandhi rule 'छे च'। सा इव गत्वर्यः—उपमान-समासः। For शरदम्बुधरच्छायागत्वर्यः यौवनश्रियः,' cf. 'शरदभ्रचलाः .. श्रियः' in II. 39.

N. B. If this compound were taken as an उपमानपूर्वपद-बहुव्रीहि then the अन्वय would have been—शरदम्बुधरच्छायाः यौवनश्रियः गत्वर्यः। Malli. seems to have rejected that course on the ground that in that case शरदम्बुधरच्छायाः would ultimately mean the same thing as गत्वर्यः and would therefore be redundant.

गत्वर्यः—गम्+क्वरप्—कर्त्तरि gives the form गत्वर by the rule 'गत्वरश्च'। गत्वर+ङीप्=गत्वरी ; the complete rule is :—'टिड्-ढाण्-अञ्-द्वयसज्-दघ्नञ्-मात्रच्-तयप्-ठक्-ठञ्-कञ्-क्वरप्-ख्युनाम्'। १मा बहुवचने—गत्वर्यः। Adj. to श्रियः।

N. B. Bháravi takes delight in using such bombasts. Ka´lidasa would have used here चञ्चलाः which is certainly a sweeter and easier word.

श्रियः—श्रि+क्विप्—कर्म्मणि १मा बहुवचन। In १मा १ वचन the form is श्रीः। The विसर्ग is not elided. The dictum is—'अवी-लक्ष्मी-तरी-तन्त्री-ह्री-धी-श्रीणाम् उणादितः। स्त्रीलिङ्गानाम् अमीषां तु न सुलोपः कदाचन'। श्रीः or लक्ष्मीः is the कान्त्यभिमानिनी देवता,—the goddess of beauty.

आपातरम्याः—आ–पत+घञ्—भावे=इति आपातः=तदात्वम्। For lexicon, see घण्टापथ। आपाते (for the time being) रम्याः—७तत्।

पर्य्यन्तपरितापिनः—परितापयन्तीति परितापिनः—परि + तप्—णिनि – कर्त्तरि। पर्य्यन्ते (परिणामे—for derivation see Sl. 3) परितापिनः—७तत्।

For the second half of the stanza,

cf. विषयेन्द्रियसंयोगाद् यत्तदग्रे ऽमृतोपमम्।
परिणामे विषमिव (तत्सुखं राजसं स्मृतम्) ॥
गीता xviii. 38.

Ch. of Voice.—यौवनश्रीभिः ·शरदभ्रधरच्छाया-गत्वरीभिः [भूयते]। विषयैः आपातरम्यैः पर्य्यन्तपरितापिभिः [भूयते]।

Questions. गत्वर्य्यः—D. आपातरम्याः and पर्य्यन्तपरितापिनः—M.



Birth is a source of manifold evils Hence the necessity of emancipation.

अन्तकः पर्य्यवस्थाता जन्मिनः सन्ततापदः।
इति त्याज्ये भवे भव्यो मुक्तावुत्तिष्ठते जनः॥ १३

Eng. Equ!v. अन्तक—Death. पर्य्यवस्थाता—enemy. सन्ततापद—beset with constant dangers. भव—birth. भव्य—worthy. उत्तिष्ठते—strives.

Prose.—सन्ततापदः जन्मिनः अन्तकः पर्य्यवस्थाता। इति त्याज्ये भवे, भव्यः जनः मुक्तौ उत्तिष्ठते।

Bengali.—সতত (অনবচ্ছিন্ন) বিপৎসঙ্কুল প্রাণীর [আবার] মৃত্যু [চির] শত্রু। সংসার এই কারণে ত্যাজ্য হওয়ায় [তোমার মত] যোগ্য ব্যক্তি মুক্তির নিমিত্ত উদ্যুক্ত হয়।

English.—Death is the [permanent] enemy of a living being—a victim to constant dangers Therefore, birth being a thing to be avoided, a worthy man [like you] strives after salvation. 13.

Elucidation.—The life, surrounded as it is with multifarious dangers with death as the permanent one, is not worth living. A judicious person, therefore, seeks after salvation which is the real remedy.

Gantapatha.—अन्तक इति। किञ्च, 'सन्तताः' अनवच्छिन्नाः 'आपदः' यस्य तस्य 'जन्मिनः' प्राणिनः। "प्राणी तु चेतनो जन्मी" इत्यमरः। व्रीह्यादित्वात् इनिः (1)। 'अन्तको' मृत्युः 'पर्य्यवस्थाता' प्रतिरोद्धा। प्रथमं तावत् जन्मिनो जन्मदुःखमेव दुस्तरं, ततो जातस्य जीवनमपि सततं दुःखसम्भिन्नतया विषयुक्तान्नप्रायं,

तदपि मृत्युग्रस्तम् (2) 'इति' उक्तहेतोः (क)—'काकमांसं शुनोच्छिष्टं चण्डालस्य गृहे स्थितम्। म्लेच्छपक्वं सुरासिक्तं स्वल्पं तदपि दुर्लभम् ॥" (ख) इति न्यायादिति भावः (3)—'त्याज्यं' 'भवे' संसारे, भवतीति 'भव्यो' योग्यः 'जनः' भवादृश इति शेषः। ["भव्यं सुखे शुभे चापि भेद्यवद्योग्यभाविनोः" (4) इति विश्वः। "भव्य-गेय—" इत्यादिना कर्त्तरि निपातः (5)।] 'मुक्तौ' मोक्षे 'उत्तिष्ठते' उद्युक्तो भवति। "उदोऽनूर्ध्व-कर्मणि" इति आत्मनेपदम् (6) ॥ १३ ॥

Malli. Explained.

1. व्रीह्यादित्वात् इनिः—In जन्मिन् the affix इनि is by the rule 'व्रीह्यादिभ्यश्च'। [Thus, व्रीहयः सन्ति अस्य इति व्रीही; जन्म अस्ति अस्य इति जन्मी। The word जन्मन् being नकारान्त and not अकारान्त, the general rule 'अतः इनि-ठनौ' does not apply, and hence the necessity of this special rule].

2. प्रथमं तावत् &c.—First of all, the pain due to birth of the being is intolerable; thus, after birth, the life being always mixed with pain is like unto rice mixed with poison; and that life, too, is [always] under the jaws of death.

3. काकमांसं &c.—[The thing under discussion. viz. birth is like unto] the flesh of a crow, placed in the house of a Chandala, cooked by a Mlechchha, seasoned with wine, small in quantity and that even not easily available [and hence to be avoided at once].

4. भव्यं सुखे &c.—भव्य means सुख and शुभ, and, when an adjective (भेद्य), is used in the sense of योग्य and भाविन् (future).

5. भव्यगेय &c.—भव्य here is derived in निपातन with the affix यत्] in कर्तृवाच्य by the rule 'भव्य-गेय' &c.

(क) For इति उक्तहेतोः, all read सोऽयं and shift इत्युक्तहेतोः before त्याज्यं below.

(ख) J omits the 2nd and the 3rd feet of the verse quoted.

N. B. Under ordinary rules, यत् is used in भाववाच्य and कर्मवाच्य। But it is also used in कर्त्तृवाच्य in connection with the roots mentioned in the special rule 'भव्य-गेय &c.'

In कर्त्तृवाच्य, भव्य will mean 'befitting', 'good', 'happy', 'worthy' ; and गेय will mean 'singer'.

6. उदः अनूर्ध्वकर्म्मणि—The root स्था preceded by उत् takes आत्मनेपद when the sense is other than ऊर्द्ध्वकर्म्म (physical getting up).

Notes.

अन्तकः—अन्तं करोति इति अन्तयति, अन्त (शब्द) + णिच् by the rule 'तत्-करोति तदाचष्टे'। अन्ति (णिजन्त नाम धातु) + ण्वुल्—कर्त्तरि। The god of death.

पर्य्यवस्थाता—परितः (= सर्व्वतः) अवतिष्ठते इति परि – अव – स्था + तृच्—कर्त्तरि। That which surrounds ; hence, an enemy.

जन्मिनः—जन्म अस्ति अस्य इति जन्मन् + इनि—जन्मी, व्रीह्यादित्वात् इनिः ; तस्य। कर्म्मणि षष्ठी in connection with तृच् in पर्य्यवस्थाता by the rule—'कर्त्तृकर्म्मणोः कृति'।

For अन्तकः पर्य्यवस्थाता जन्मिनः, cf. 'जातस्य हि ध्रुवो मृत्युः'।

सन्ततापदः—सन्तताः (अनवच्छिन्नाः) आपदः यस्य सः सन्ततापद (or सन्ततापत्कः)—बहुव्रीहिः, तस्य। Adj. to जन्मिनः।

सन्तत—सम् – तन् + क्त (कर्म्मणि)। Opt. form—सतत। आपद् (fem.) —आ – पद् + क्विप्—भावे।

इति—For the said reason—उक्तहेतोः। अव्ययम्। 'इति हेतु-प्रकरण-प्रकाशादि-समाप्तिषु'—अमरः।

त्याज्ये—त्यज + ण्यत्—कर्म्मणि इति त्याज्यः, तस्मिन्, adj. to भवे।

भवे—भू + अप्—भावे, 'ऋदोरप्' इति भवः, तस्मिन् = संसारे, भावे ७मी। 'भवः क्षेमेश-संसारे सत्तायां प्राप्तिजन्मनोः' इति मेदिनी।

भव्यः—भू + यत्—कर्त्तरि by the rule 'भव्यगेय etc.' Adj. to जनः।

मुक्तौ—विषयाधिकरणे ७मी। Optional form—मुक्त्याम्।

उत्तिष्ठते—उत्—स्था + लट् ते। 'उदोऽनूर्ध्वकर्म्मणि' इति आत्मनेपदम्। उत् – स्था is आत्मनेपद when it does not mean physical rising.

Ch. of Voice.—अन्तकेन पर्य्यवस्थात्रा [भूयते]......भव्येन जनेन उत्थीयते।

Questions.—Give the substance of the sloka. पर्य्यवस्थाता —M. भवे—M and C. मुक्तौ—C. उत्तिष्ठते—Acc. for आत्मनेपद।

Your judgment is commendable, but your dress is incongruous.

चित्तवानसि, कल्याणी यत्त्वां मतिरुपस्थिता।
विरुद्धः केवलं वेषः सन्देहयति मे मनः॥१५॥

Eng. Equiv. चित्तवान्—judicious; wise. कल्याणी—salutary; good. मति—idea. विरुद्ध—iucongruous.

Prose.—चित्तवान् असि, यत् त्वां कल्याणी मतिः उपस्थिता। केवलं विरुद्धः वेषः (or विरुद्धः वेषः केवलम्) मे मनः सन्देहयति।

Bengali.—তুমি [অবশ্যই] বিবেকবান্, যেহেতু [এই] সাধু ইচ্ছা তোমাকে উপস্থিত হইয়াছে। কেবল তোমার বিরুদ্ধ বেশ আমার মনে সন্দেহ জন্মাইতেছে। ১৪।

English.—You are [evidently] judicious as [this] good idea has come upon you. Only your incongruous dress makes my mind doubtful. 14

Ghantapatha.—सम्प्रति प्रशंसापूर्वकं स्वाभिसन्धिं दर्शयति (1)—चित्तवानिति। 'चित्तवान्' प्रशस्तचित्तः 'असि'। प्रशंसायां मतुप् (2)। कुतः? यतः 'त्वां' 'कल्याणी' साध्वी ["बह्वादिभ्यश्च" इति ङीष् (3)।] 'मतिः' 'उपस्थिता' सङ्गता। किन्तु 'केवलम्' एकं यथा तथा 'विरुद्धः' वेषः' मे मनः' सन्देहयति' संशययुक्तं करोति। यद्वा, 'वेषः केवलं' वेष एव इत्यर्थः। "केवलः कृत्स्न एके च" "केवलं चावधारिते" इति उभयत्रापि शाश्वतः (4)॥१४॥

Malli. Explained.

1. सम्प्रति &c.—With an eulogium he (Indra) now gives out his own view [of Arjuna's personality].

2. प्रशंसायाम् &c.—In चित्तवान् the affix मतुप् is in the sense of प्रशंसा।

N.B. मतुप् and other अस्त्यर्थक affixes have the following different forces :—

[भूम-निन्दा-प्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः॥]

3. बह्वादिभ्यश्च &c.—In कल्याणी the [optional] affix ङीष् is by the rule 'बह्वादिभ्यश्च'। [Thus, बहुः—fem. बहुः, बह्वी ; कल्याणः —कल्याणा, कल्याणी].

4. केवलः &c.—केवलः (adj.) is used in the sense of कृत्स्न and एक, and केवलम् (adj.—always neuter) is used in the sense of अवधारित (definite). [Cf. 'निर्णीते केवलमिति त्रिलिङ्गं त्वेक-कृत्स्नयोः'—इत्यमरः].

Notes.

चित्तवान्—प्रशस्तं चित्तमस्ति अस्य इति चित्तवान्। चित्त + मतुप् (प्रशंसायाम्)

कल्याणी—Adj. to मतिः ; optional form is कल्याणा।

उपस्थिता—सङ्गता। उप – स्था + क्त (कर्त्तरि), स्त्रियामाप्। उप – स्था is आत्मनेपदी in this sense of सङ्गतिकरण by the rule 'उपाद्देवपूजासङ्गतिकरण-मित्रकरण-पथिष्विति वाच्यम्'—Várttika.

केवलम्—एकं यथा तथा, adv. modifying विरुद्धः। 'केवलः कृत्स्न एके च' इति शाश्वतः। केवल may also mean एव (अवधारित)। यथा, वेषः केवलम्—वेष एव इत्यर्थः। In this sense केवल, though adjective, is always neuter. Cf.—'केवलं राजपूर्वः'—S'akuntalá II ; 'केवलं जन्महेतवः'—Raghu I.

वेषः—विष् (विष्लृ व्याप्तौ) + अच् (कर्त्तरि)। वेशः with श is derived as विश + घञ्—अधिकरणे।

सन्देहयति—सम् – दिह + णिच् + लट् ति।

मनः—'गति-बुद्धि-प्रत्यवसानार्थ-शब्दकर्म्माकर्म्मकाणामणि-कर्त्ता स णौ' इति सूत्रेण कर्म्मणि द्वितीया। The changes from the अणिजन्त to the णिजन्त form may be traced thus :—(अणिजन्त) मनः सन्दिग्धे (the mind doubts—intrans. verb), (णिजन्त) वेषः मनः सन्देहयति (*causes* the mind to doubt).

Ch. of Voice.—चित्तवता भूयते त्वं मत्या उपस्थितः। विरुद्धेन··· वेषेण मनः (१मा) सन्देह्यते।

Questions. चित्तवान्—D and explain the formation. केवलम्—M and Parse. मनः—C.

The coat of arms put on by you suits a warrior and not a hermit.

युयुत्सुनेव कवचं किमामुक्तमिदं त्वया।
तपस्विनो हि वसते केवलाजिन-वल्कले ॥१५॥

Eng. Equiv. युयुत्सु—wishing to fight. कवच—armour. आमुक्त—put on ; worn. अजिन—hide. वल्कल—bark.

Prose.—युयुत्सुना इव त्वया किम् इदं कवचम् आमुक्तम्। हि (= यस्मात्) तपस्विनः केवलाजिन-वल्कले वसते।

Bengali.—যুদ্ধেচ্ছুর ন্যায় এই বর্ম্ম তুমি কেন ধারণ করিয়াছ ? তপস্বিগণ ত কেবল [মৃগাদির] চর্ম্ম ও বল্কলই পরিধান করিয়া থাকেন। ১৫।

English.—Why is this armour worn by you like one wishing to fight ? Hermits put on hides and barks alone. 15.

Ghantapatha.—वेशविरोधमेवाह—युयुत्सुनेति। 'युयुत्सुनेव' योद्धुम् इच्छुनेव 'त्वया' युधेः सन्नन्तात् उ-प्रत्ययः। (1) 'किमिदं' 'कवचं' वर्म्म 'आमुक्तम्' अर्पितम्। तव को विरोध इत्यवाह। 'हि' यस्मात् 'तपस्विनः' 'केवले' एके कवचाद्यसहचरिते इति यावत् (2) ते च ते 'अजिनवल्कले' च (3) ["निर्णीते केवलमिति त्रिलिङ्गं त्वेक-कृत्स्नयोः" (4) इत्यमरः] 'वसते' आच्छादयन्ति। अतः तपस्विनः ते कवचधारणं विरुद्धम् इत्यर्थः ॥१५॥

Malli. Explained.

1. युधेः सन्नन्तात् उ-प्रत्ययः—युयुत्सु is युध् + सन् + उ – कर्त्तरि।

2. कवचाद्यसहचरिते इति यावत्—That is to say, not accompanied with a coat of arms, &c.

3. ते च··ते—N. B. This is the manner in which a कर्म्मधारय compound is expounded.

4. निर्णीते केवलम् &c.—In the sense of निर्णीत (definite) the form is केवलम् (neuter), but the word is त्रिलिङ्ग (i. e. adjective) in the sense of एक and कृत्स्न (entire).

Notes.

युयुत्सुना—युध + सन् + उ (by the rule 'सानशंसभिक्ष उः'—meaning—the affix उ is added in कर्तृवाच्य to roots ending in सन् and also to the roots आ – शंस and भिक्ष) ; युयुत्सुः, तेन। Adj. to त्वया।

कवचम्—वर्म्म। उक्ते कर्म्मणि १मा। कवच is masculine or neuter. 'अथ तनत्रं वर्म्म दंशनम्।...कवचोऽस्त्रियाम्' ॥—अमरः।

N. B. The weapons referred to in this and the following few slokas are those that have been described in Canto III (Sl. 57-58) as being carried by Arjuna at the time of his departure for Mt. Indrakila for austerities.

आमुक्तम्—अर्पितं ; धृतम ; पिनद्धम्। आ-मुच्+क्त neuter. १मा —अमरः। For आमुक्त in this sense Cf.—'करोऽयमामुक्त विवाहकौतुकः' —Kumára, v. 66 ; 'आमुच्यतीवाभरणं द्वितीयम्'—Raghu xiii. 21 ; 'आमुक्तपूर्व्वं गुरुणा च यस्मात्'—Raghu xvi. 74.

तपस्विनः—तपस्+विनि (by the rule 'तपः-सहस्राभ्यां विनीनी') १मा बहुवचन ; Nom. to वसते। The base is तपस्विन्।

वसते—वस (अदादिः आत्मनेपदी—आच्छादने)+लट् अन्ते ; परिदधति। Conj.—वस्ते, वसाते, वसते ; etc.

कैवलाजिनवल्कले—अजिनञ्च वल्कलञ्च अजिनवल्कले (इतरेतर-द्वन्द्वः), केवले (एके—for lexicon see घण्टापथ) अजिनवल्कले—कर्म्मधारयः, २या, २वचन ; obj. of वसते।

Ch. of Voice.—युयुत्सुः इव त्वम् आमुक्तवान्।·· तपस्विभिः कैवलाजिनवल्कले (१मा २वचन) वस्यते।

Questions. युयुत्सुना—D. आमुक्तम्—M. वसते—Conj.

The formidable weapons on your person do not bespeak your mental tranquillity

प्रपित्सोः किञ्च ते मुक्तिं निस्पृहस्य कलेवरे।
महेषुधी धनुर्भीमं भूतानामनभिद्रुहः ॥१६॥

Eng. Equiv. प्रपित्सु—wishing to attain. निस्पृह—indifferent. महेषुधी—two great quivers. अनभिद्रुह्—abstaining from doing any harm.

Prose.—किञ्च, मुक्तिं प्रपित्सोः, [अतः] कलेवरे निस्पृहस्य, भूतानाम् अनभिद्रुहः ते महेषुधी भीमं धनुः [च] [शमं न समर्थयते—from sl. 17].

Bengali.—আর, মুক্তিলিপ্সু [অতএব] শরীরে বীতস্পৃহ ও প্রাণিগণের অহিংসক তোমার দুইটী মহাতূণীর ও ভীষণ ধনু [তোমার] শমগুণের সমর্থন করিতেছে না—from Sl. 17] ॥ ১৬ ॥

English.—Besides, the two great quivers and the dreadful bow of you who are wishing to attain salvation, and are [therefore] indifferent to the body and are abstaining from doing any harm to creatures [do not indicate the tranquillity of your mind]. 16.

Ghantapatha.—किञ्च 'युक्तो' "हितेन" इति शेषः, हितेन इष्टेन युक्तः सन् 'प्रमाद्यसि' प्रकर्षेण 'माद्यसि' हृष्यसि। 'हितात् अपेतः' 'परितप्यसे' परितप्तो भवसि। तपेर्दैवादिकात् कर्त्तरि लट् (1)। सत्यमेवं, ततः किम्? अत आह—यदीति। 'पीड़ा' आत्मनः स्वस्य च 'न इष्टा यदि' 'तर्हि' 'भवता' 'जने' परस्मिन्नपि 'मा सञ्जि' न सज्यताम्। सज्जतेर्ण्यन्तात् कर्मणि लुङ् (2)। आत्मदृष्टान्तेन परपीड़ातो निवर्त्तितव्यम् इत्यर्थः, पीड़ायाः परात्मनोः समत्वात् (3)॥ २९॥

Malli. Explained.

1. तपे &c.—परितप्यसे is from root तप of the दिवादि class—in लट् in कर्त्तृवाच्य ।

2. सञ्जि: &c.—सञ्जि (or rather असञ्जि) is सञ्ज + णिच + लुङ् in कर्म्मवाच्य । N. B. The synonym given is सञ्जयताम् ; without णिच् it would have been सज्यताम् ।

3. पीडाया: परात्मनो:—Because पीडा acts in the same way towards another as to one's own self.

Notes.

युक्त:—युज् + क्त (कर्म्मणि) १मा १वचन ; adj. to त्वम् understood.

प्रमाद्यसि—प्र – मद् (दिवादि) + लट् सि । N. B. The root मद्, preceded by प्र, generally means 'to be careless about' (cf. धर्म्मात् प्रमाद्यति) । But here it has been used in the original sense of 'to rejoice'.

हितात्—'ध्रुवमपायेऽपादानम्' इति अपादाने ५मी ।

अपेत:—अप – इ(ण्) + क्त (कर्त्तरि) १मा १वचन, adj. to त्वम् understood. अपेत means च्युत ।

परितप्यसे—परि – तप (दिवादि) + लट् से । The root is intransitive in this sense.

इष्टा—इष + क्त (कर्म्मणि, वर्त्तमानकाले) by the rule "मतिबुद्धिपूजार्थेभ्यश्च" ।

आत्मन:—'क्तस्य च वर्त्तमाने' इति सूत्रेण कर्त्तरि ६ष्ठी ।

पीडा—उक्ते कर्म्मणि, १मा in connection with मा सञ्जि ।

मा सञ्जि—मा (अ) सञ्जि । असञ्जि – सञ्ज + णिच् + लुङ् त—कर्म्मणि । असञ्जि is without its अ here owing to the presence of the particle मा । The rule is 'न माङ्योगे' (see मा पुष:—Sl. 20). The root सञ्ज (conj.—सजति, &c.) means 'to stick to'.

पीडा भवता जने मा सञ्जि—पीड़ा जने असाङ्क्षीत् ; भवान् जने पीडाम् अससञ्जत् ; भवता जने पीडा असञ्जि । For the second line, cf. 'आत्मन: प्रतिकूलानि न परेषां समाचरेत्' ।

Ch. of Voice.—युक्तन् [त्वया] प्रमाद्यते,...अपेतेन [त्वया] परितप्यते । पीड़या...इष्टया......[भूयते] भवान् जने [तां] मा ससञ्जत् ।

Questions. हितात्—D and C. मा सञ्जि—Expl. formation.

Your own existence is unstable. So, do not sacrifice justice.

जन्मिनोऽस्य स्थितिं विद्वाँल्लक्ष्मीमिव चलाचलाम् ।
भवान्मा स्म वधीन्न्याय्यं न्यायाधारा हि साधवः ॥३०॥

Eng. Equiv. विद्वान्—one who knows. चलाचल—restless ; transitory. मा वधीत्—do not destroy ; do not give up. न्याय्य—just conduct. न्यायाधार—abode of justice.

Prose.—अस्य जन्मिनः स्थितिं लक्ष्मीम् इव चलाचलां विद्वान् भवान् न्याय्यं मा स्म वधीत् । हि (= यस्मात्) साधवः न्यायाधाराः ।

Bengali.—এই প্রাণীর (অর্থাৎ প্রাণিমাত্রের) স্থিতি (অর্থাৎ জীবিতকাল) লক্ষ্মীর ন্যায়ই চঞ্চল জানিয়া তুমি ন্যায্যের বিনাশ (অর্থাৎ ত্যাগ) করিও না। কারণ, সাধুরা ন্যায়াবলম্বী। ৩০।

English.—Knowing the existence of these living beings as transitory as one's fortune, you should not sacrifice justice ; for, the good are the abode of justice. 30.

Ghantapatha.—अथ देहास्थैर्य्यशङ्कया च परपीडा न कार्य्या इत्याह (1) —जन्मिन इति । 'अस्य' 'जन्मिनः' उत्पत्तिधर्मिकस्य शरीरिणः [व्रीह्यादित्वादिनिः (2) ।] 'स्थितिं' लक्ष्मीम् इव 'चलाचलां' चञ्चलां अन्मिधर्मत्वात् एव चञ्चलाम् (क) अनित्याम् इत्यर्थः । [चलतेः पचाद्यच्, "चरि-चलि-पति-वदीनां वा द्वित्वम् अचि, आक् च अभ्यासस्येति वक्तव्यम्" इति द्विर्भावः, अभ्यासस्य आगागमश्च (ख) (3)] । 'विद्वान्' जानन् इत्यर्थः । ["विदेः शतुर्वसुः" इति वैकल्पिको वस्वादेशः (4)] । 'भवान्', न्यायात् अनपेतं 'न्याय्यम्' ["धर्म्मपथ्यर्थन्यायादनपेते" इति यत्-प्रत्ययः (5)] । 'मा स्म वधीत्' न नाशय इत्यर्थः । ["स्मोत्तरे लङ् च" इति लुङ् (6) । "लुङि च" इति हनो वधादेशः (7) । "शेषे प्रथमः" इति प्रथमपुरुषः (8)] । 'हि' यस्मात् साधवः 'न्यायाधाराः' न्यायावलम्बाः ।—बहुव्रीहिस्तत्पुरुषो वा (9) । न्यायत्यागे साधुत्वमेव न स्यादिति भावः (ग) । "न्यायाचाराः" इति पाठे न्यायमाचरन्तीति तथोक्ताः ; कर्म्मण्यण् (10) ॥ ३० ॥

Malli. Explained.

1. अथ &c.—Again, knowing full well that the physical body is transient, oppression of others should not be done.

(क) For चञ्चलाम् some read चलाम् ।

(ख) आगागमश्च has been misprinted in some as अगागमश्च ।

(ग) The न in न स्यात् has been dropped in some.

2. शैत्यादित्वात् इनिः—[See Sl. 13, Malli. Expl.].

3. चलतेः &c.—चलाचल is derived as चल + अच्—कर्त्तरि। The root is optionally reduplicated and the अभ्यास (1st half) takes the augment आक् (= आ) by the Várttika-rule—'चरि-चलि-पति-वदीनां वा द्वित्वम् अचि, आक् च अभ्यासस्य इति वक्तव्यम्'। [Therefore, चला is another form].

4. विदेः शतुः वसुः &c.—विद् + शतृ – विदत् ; (१मा, विदन्)। The शतृ is optionally changed into वसु giving the form विद्वस् (१मा—विद्वान्)।

5. धर्म्मपथ्यर्थन्यायात् अनपेते—The words धर्म्म, पथिन्, अर्थ and न्याय take the affix यत् in the sense of अनपेत। (Thus, धर्म्म्य, पथ्य, अर्थ्य, न्याय्य)।

6. स्मोत्तरे लङ् च &c.—In मा स्म वधीत् the लुङ् is by the rule 'स्मोत्तरे लङ् च'। [लुङ् is available on the strength of the word च in the rule]. [See Sl. 20, Malli. Expl. 4].

7. लुङि च &c.—The previous rule is—'हनो वध लिङि' [meaning—In आशीर्लिङ्, the root हन् takes the form वध]. The next rule is—'लुङि च'। [Thus, अवधीत् in लुङ्].

8. शेषे प्रथमः &c.—भवान् अवधीत् is in the 3rd person by the rule 'शेषे प्रथमः' [meaning—everything else but अस्मद् and युष्मद् is in the 3rd person].

9. बहुव्रीहिः तत्पुरुषो वा—न्यायाधाराः is in बहुव्रीहिः (न्यायः आधारः येषां ते), or in तत्पुरुष (न्यायस्य आधाराः)। [See Notes].

10. न्यायाचाराः &c.—In the reading न्यायाचाराः the exposition is न्यायम् आचरन्ति इति न्याय – आ – चर + अण्—कर्त्तरि by the rule 'कर्म्मण्यण्' [meaning—कर्म्मणि उपपदे सति धातोः अण्-प्रत्ययो भवति कर्त्तृवाच्ये ; e. g. कुम्भं करोति इति कुम्भकारः। कुम्भ – कृ + अण्].

N. B. The affix here should be ण (instead of अण्) by the Várttika 'शीलि-कामि-भक्ष्याचरिभ्यो णः'। The difference will be in fem. form. ण will bring आ whereas अण् would bring ई in fem.

Notes.

अग्मिन:—अग्मन् + इनि by the rule 'व्रीह्यादिभ्यश्च' ((see Sl. 13) ; ६ष्ठी १वचन—शेषे ६ष्ठी ।

अस्य—६ष्ठी १वचन of इदम् ; adj. to अग्मिन: । इदम् has been used here as it refers to every living being some of whom (Arjuna and others) were before the speaker. Cf. 'इदम: प्रत्यक्षरूपम्' ।

स्थितिम्—स्था + क्तिन् (भावे) २या १वचन, obj. of विद्वान् । 'न लोकाव्यय-निष्ठाखलर्थतृनाम्' इति सूत्रेण षष्ठीनिषेधात् कर्मणि २या ।

विद्वान्—विद + वस् (शतृस्थाने) by the rule 'विदे: शतुर्वसु:' । Opt. form is विदन् (with शतृ) ।

लक्ष्मीम्—लक्ष + ई (औणादिक) with the augment मुट् by the rule 'लक्षेर्मुट् च' । लक्ष्मी here means सम्पत्ति (fortune) ; 'सम्पत्ति: श्रीश्च लक्ष्मीश्च' —अमर: । १मा १वचन of लक्ष्मी is लक्ष्मी: । The Káriká is—'अवी-लक्ष्मी-तरी तन्त्री'—etc (see Sl. 12).

विद्वाल्ँलक्ष्मीम्—विद्वान् + लक्ष्मीम् । In Sandhi, the न्, being a nasal (अनुनासिक), is replaced by a nasal ल ।

चलाचलम्—चल् + अच् (कर्त्तरि) by the rule पचाद्यच् ; then चल् is reduplicated optionally and आ is added to the first चल् of चल्चल् by the rule 'चरि-चलि' etc. (For the complete rule and its expl., see अष्टाध्याय Explained 3). Opt. form—चलाम् ।

मा स्म वधीत्—मा स्म (अ)वधीत् । अवधीत् = हन + लुङ् द् । वध् is ordered for हन् in लुङ् by the rule 'लुङि च' । लङ् also may be used with मा स्म । Then the form will be मा स्म (अ)हन् । See मास्म पुष: in Sl. 20.

न्याय्यम्—न्यायात् अनपेतम् इति न्याय + यत् by the rule 'धर्मपथ्यर्थन्यायाद् अनपेते' । Obj. of मास्म वधीत् । Not deviating from justice.

न्यायाधारा:—न्यायस्य आधारा:—६तत् । Malli. (also suggested बहुव्रीहि here—न्याय: आधार: येषां ते इति न्यायाधारा: । The meaning in this case is—the good 'live, move and have their being' in justice.

न्याय—नि – इ(ण्) + घञ् भावे । इ(ण्) after नि takes घञ् in the sense of उचित । The rule is—'परिन्यो: नीणो: द्यूताभ्रेषयो:' । The root नी and इण्, preceded by परि and नि, take घञ् (instead of अच्) in

the sense of द्यूत (= gambling) and अभ्रेष (= उचित) । Thus, परिणयेन अयान् इन्ति ; अन्यत्र, परिणय: (= विवाह:) । एषोऽत्र न्याय: ; अन्यत्र, न्यय: (= विनाश:) ।

आधार:—आध्रियन्ते अस्मिन् इति, आ – धृ + घञ् (अधिकरणे) । Malli. discusses a different reading न्यायाचारा: in place of न्यायाधारा: ।

न्यायाचारा:—न्यायम् आचरन्ति इति न्यायाचारा:—उपपद-तत् । न्याय – आ – चर + ण (कर्त्तरि) ; adj. to साधव: । See the N. B. under Malli. Expl. 10.

Ch. of Voice—...विदुषा...भवता...न्याय्यम् (१मा) मा स्म घानि (or मा स्म वधि) । न्यायाधारैः साधुभि: (भूयते) ।

Questions. अस्य—Justify the use of इदम् here. चलाचलाम् —D and give opt. form. मा स्म वधीत्—Gram. Notes (with opt. form). न्याय्यम्—D. न्यायाधारा:—S and note variant.

Do, therefore, abandon your desire for fighting, and be tranquil.

विजहीहि रणोत्साहं मा तप: साधु नीनश: ।
उच्छेदं जन्मन: कर्त्तुमेधि शान्तस्तपोधन ! ॥३१॥

Eng. Equiv. विजहीहि—give up. रणोत्साह—a very strong desire for fighting. मा नीनश:—don't destroy. साधु—good ; proper. जन्मन: उच्छेद:—avoidance of re-birth. एधि—be.

Prose.—तपोधन ! रणोत्साहं विजहीहि, साधु तप: मा नीनश:, जन्मन: उच्छेदं कर्त्तुं शान्त: एधि ।

Bengali.—হে তপোধন ! রণোৎসাহ পরিত্যাগ কর, সমীচীন তপস্যা নষ্ট করিও না, পুনর্জন্ম উচ্ছেদ করিবার নিমিত্ত শান্ত হও [অর্থাৎ জিগীষা হইতে নিবৃত্ত হও] । ৩১ ।

English.—O hermit, give up your energy for fighting ; do not destroy your asceticism which is a meritorious thing. Be tranquil (free from your desire to conquer others) to avoid re-birth. 31.

Ghantapatha—तर्हि किं मे कर्त्तव्यं तत्राह—विजहीहीति । हे तपोधन ! 'रणोत्साह'' रणोद्योगम् । लोकोत्तरेषु कार्य्येषु स्थेयान् प्रयत्न: उत्साह:' (1), तं 'विजहीहि' त्यज । ["आ च हौ" इति ईकार: (2)] । 'साधु' समीचीनं' नि:श्रेयस-करत्वादिति भाव:, तप:' 'मा नीनश:' न नाशय । [नश्यतेर्ण्यन्तात् माङ्योगादाशिषि लुङ्, अडागमनिषेधश्च (3)] । किन्तु 'जन्मन:' 'उच्छेदं कर्त्तुं'' मोक्षं साधयितुम् इत्यर्थ:, 'शान्त एधि' विजिगीषानिवृत्तो भवेत्यर्थ: । ["हुझल्भ्यो हेर्धि:" इति धि:, "घ्वसोरेद् हौ, अभ्यासलोपश्च" इत्येकार इति (4) ॥] ३१ ॥

Malli. Explained.

1. लोकोत्तरेषु &c.—उत्साह means 'strong efforts (i. e. energy) for performing a super-human act.'

2. आ च हौ &c.—The आ of an आकारान्त root is changed into ई when हि (लोट् 2nd persan, sing.) follows.

3. नश्यते: &c.—नीनश: in मा नीनश: is—नश् + णिच् + लुङ् (स्) in the sense of आशिस्। The augment अट् (अ) is absent [owing to the presence of मा]. N. B. In आशिस् both लिङ् and लोट् are used. Therefore, मा नीनश: here = न नाशये:, or न नाशय।

4. हुझल्भ्य: &c.—In एधि (अस् + हि) the हि is changed into धि by the rule 'हुझल्भ्यो हेर्धि:' and the स of अस is changed into ए by the rule 'घ्वसोरेत् &c.' [The अ of अस् is elided by the rule 'श्नसोरल्लोप:']. N. B. The rule 'हुझल्भ्यो हेर्धि:' means—Of the root हु and of roots ending in झल्, हि [after an अनिट् root] is changed into धि ; e. g. हु—जुहुधि, छिद्—छिन्धि, अस्—एधि। [For झल् (प्रत्याहार), see Preliminary Information I]. The rule 'घ्वसोरेत् हौ अभ्यास-लोपश्च' means—Of the roots दा and धा (collectively called घु) and अस् the last letter is changed into ए, and the अभ्यास-portion [of दा and धा which are अभ्यस्त roots] is elided ; e. g. देहि, धेहि, एधि।

Notes.

विजहीहि—वि – हा (जुहोत्यादि:, ओ हाक् त्यागे इति धातु:) लोट् हि। Three forms in लोट् हि—जहीहि, जहिहि, add जहाहि।

रणोत्साहम्—रणे or रणस्य उत्साह:—७तत् or ६तत् ; तम्, २या १वचन ; obj. to विजहीहि। उत्साह—उत् – सह + घञ्—भावे। It means steady effort for a super-human undertaking as Malli. puts it in Sanskrit—'लोकोत्तरेषु कार्य्येषु स्थेयान् प्रयत्न उत्साह:'।

मा नीनश:—मा (अ) नीनश:। नीनश: = नश + णिच् + लुङ् स्, अत्र आशिषि लुङ् by the rule 'माङि लुङ्' (meaning—'लुङ् is always used in connection with माङ्)। This rule sets aside all other tense-affixes (सर्व्व-लकारापवाद:) ; hence it is used here in the

benedictive mood (लोट् or आशीर्लिङ्) । The अ of अनीनशः disappears in connection with माङ् by the rule 'न माङ्योगे' ।

साधु—adj. to तपः । It means here समीचीनम् (निःश्रेयसकरत्वात्) —proper (as it will lead to salvation).

उच्छेदम्—उत् - छिद् + घञ्—भावे, obj. of कर्त्तुम् ।

एधि—अस् + लोट् हि । For formation, see घण्टापथ Explained 4.

शान्तः—शम + क्त (कर्त्तरि) ; adj. to त्वम् understood.

Ch. of Voice.—रणोत्साहः विहायताम्, तपः (१मा) मा नाशि, शान्तेन भूयताम् ।

Questions. विजहीहि—opt. forms. मा नीनशः—Gram. Notes. एधि—Derive.

If you want to conquer, you may conquer your internal enemies.

जीयन्तां दुर्जया देहे रिपवश्चक्षुरादयः ।
जितेषु ननु लोकोऽयं तेषु कृत्स्नस्त्वया जितः ॥३२॥

Eng. Equiv. दुर्जय—unconquerable. ननु—certainly. कृत्स्न—entire.

Prose.—दुर्जयाः चक्षुरादयः देहे [वर्त्तमानाः] रिपवः जीयन्ताम् । तेषु जितेषु त्वया अयं कृत्स्नः लोकः जितः ननु ।

Bengali.—দেহে বর্ত্তমান চক্ষুঃপ্রভৃতি দুর্জয় রিপুগণ জয় কর। সেই রিপুসমূহ পরাজিত হইলে তোমাকর্ত্তৃক এই সমগ্র জগৎই নিশ্চয় বিজিত হইবে।

English.—Let the unconquerable enemies [existing] in your body, such as eyes, etc., be conquered. They being overcome, this entire world will surely be won by you. 32

Ghantapatha.—अथ सर्वथा मे विजयकाङ्क्षा तिरस्ति, न निवर्त्तते, इत्याशङ्क्य तर्हि अन्तःशत्रुविजयेन विधीयतां तदपनोद इत्याह (1)—जीयन्तामिति । 'दुर्जयाः' अजय्याः 'चक्षुरादयो' देहे वर्त्तमानाः 'रिपवो' जीयन्तां, यस्मात् 'तेषु' अन्तःशत्रुषु 'जितेषु' सत्सु 'त्वया' 'अयं कृत्स्नो लोको जितो ननु' किमुत अन्ये शत्रवः तदन्तर्गताः (2) इत्यर्थः । जितेन्द्रियस्य इन्द्रियार्थ-निस्पृहस्य निर्भर-वैराग्यदयात् (क) विजय-व्यपदेशः (3) ॥३२॥

(क) निर्भर—Omitted by some.

Malli. Explained.

1. अथ सर्वदा &c.—Well, I have an itching for conquest which does not subside. In anticipation of this the speaker says—'then satisfy that (itching) by the conquest of the internal enemies.'

2. किमुत &c.—Not to speak of the enemies falling within that (entire world).

3. जितेन्द्रियस्य &c.—Of a self-controlled person who is averse to the objects of senses, enmity can never arise, hence, it has been said that he achieves victory (—'कृत्स्नो लोको जितः']. [निर्भरम्—means नितान्तम् and qualifies अनुदय].

Notes.

जीयन्ताम्—जि + लोट अन्ताम्—कर्मणि ।

दुर्जयाः—दुःखेन जीयन्ते इति दुर् - जि + खल्—कर्मणि, adj. to रिपवः ।

चक्षुरादयः—चक्षुः आदिः येषां ते (बहुव्रीहिः), adj. to रिपवः ।

तेषु—भावे ७मी ।

ननु—अवधारणे ; certainly. 'प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु'—अमरः ।

लोकः—उक्ते कर्मणि १मा । लोक here means भुवन ।

जितः = जितः भवेत्, or जितः भविष्यति । The क्त denotes future tense here (by the rule 'धातुसम्बन्धे प्रत्ययाः') । We may also take the क्त here in past tense, जितः meaning 'already conquered' (so to say). The rule is—'आशंसायां भूतवत् च' ।

Ch. of Voice.—दुर्जयान् रिपून् चक्षुरादीन् जय । ......अनेन कृत्स्नेन लोकेन जितेन [भूयते ; or भविष्यते or भाविष्यते] (Or, इमं कृत्स्नं लोकं त्वं जितवान्) ।

Questions.—Ch. the voice. रिपवः and तेषु—C. जितः—tense.

One without self-control is destined to subordination.

परवानर्थसंसिद्धौ नीचवृत्तिरपत्रपः ।
अविधेयेन्द्रियः पुंसां गौरिवैति विधेयताम् ॥ ३३ ॥

Eng. Equiv. परवान्—dependent on others. अर्थसंसिद्धि—accomplishment of the end. नीचवृत्ति—rendering the meanest service. अपत्रप—shameless. विधेयता—subordination.

Prose.—अर्थसंसिद्धौ परवान् नीचवृत्तिः अपत्रपः अविधेयेन्द्रियः [पुमान्] गौः इव पुंसां विधेयताम् एति ।

Bengali.—স্বার্থসাধনে পরাধীন, নিকৃষ্টকর্ম্মকারী, নির্লজ্জ এবং অজিতেন্দ্রিয় পুরুষ বলীবর্দ্দের মত [অপর] পুরুষের বশ্যতাপন্ন হয় । ৩৩ ।

English.—A person dependent on others for the accomplishment of his own ends, rendering the humblest service, shameless and of uncontrolled passions, becomes subordinate to others like a bull. 33.

Ghantapatha.—अजितेन्द्रियस्य अनिष्टम् आचष्टे—परवानिति । 'अर्थ-संसिद्धौ' अभ्यवहारादि-स्वार्थसाधने (4) 'परवान्' पराधीनः । "पर-तन्त्रः पराधीनः परवान्—" इत्यमरः । 'नीचवृत्तिः' कर्षण-वहनादि-निकृष्टकर्मा 'अपत्रपः' निर्लज्जः 'अविधेयेन्द्रियः' अजितेन्द्रियः "पुमान्" 'गौः' वलीवर्दः 'इव' 'पुंसां' 'विधेयतां' यथोक्त-कारितां प्रेष्यताम (2) इति यावत् ["विधेयो विनयग्राही वचनेस्थित आश्रवः" इत्यमरः ।] 'एति' प्राप्नोति । "उपमालङ्कारोऽयम् प्रकृताप्रकृतयोरर्थसाधर्म्यात् ; श्लेषे तु (क) शब्दमात्र-साधर्म्यम्" इति ॥ ३३ ॥

Malli. Explained.

1. अभ्यवहारादि-स्वार्थसाधने—In performance of his own acts e. g. अभ्यवहार (eating), &c.

2. यथोक्तकारिता &c.—[यथोक्तकारिता = the state of doing as ordered प्रेष्यता = servitude].

3. उपमालङ्कारोऽयम् &c.—परवान्...पुमान्, गौः इव, विधेयताम् एति—The fig. of speech here is उपमा ; because, there is a similarity in *meaning* between the प्रकृत thing (the thing introduced for comparison). [It is not a case of श्लेष ; because,] in a श्लेष, the resemblance is in form (word) only.

Notes.

परवान्—परः अस्ति अस्य प्रभुत्वेन इति पर + मतुप् ; adj. to पुमान् under-stood. परवान् means पराधीनः । For lexicon, see घण्टापथ ।

(क) For श्लेषे, B reads शेषे which is evidently a mistake.

अर्थसंसिद्धौ—अर्थस्य संसिद्धिः—६तत्, तस्याम्, विषयाधिकरणे ७मी। Opt. form—अर्थसंसिद्धयाम्। संसिद्धि—सम् – सिध् + क्तिन्—भावे।

नीचवृत्तिः—नीचा वृत्तिः यस्य सः (बहुव्रीहिः); adj to पुमान् (understood). वृत्ति here means जीविका, 'आजीवो जीविका वार्त्ता वृत्तिर्वर्त्तन-जीवने'—अमरः।

अपत्रपः—अपगता त्रपा यस्य सः अपत्रपः (बहुव्रीहिः)। 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः'। Opt. form—अपगतत्रपः। त्रपा—त्रप (त्रपूष लज्जायामिति धातुः—भ्वादिः) + अङ्—भावे; स्त्रियामाप्। त्रपा means लज्जा। '......ह्रीस्त्रपा व्रीडा लज्जा' – अमरः।

अविधेयेन्द्रियः—न विधेयानि अविधेयानि (नञ्तत्), अविधेयानि इन्द्रियाणि यस्य सः (बहुव्रीहिः), adj. to पुमान् understood. विधेय—वि – धा + यत् (कर्म्मणि)।

पुंसाम्—६ष्ठी बहु of पुम्स्, कर्त्तरि ६ष्ठी in connection with the कृत्य in विधेय of विधेयताम्।

गौः—Nom. to एति। गौ here means a बलीवर्द्द; it is masc. in this sense. "गौः स्वर्गे च बलीवर्द्दे रश्मौ च कुलिशे पुमान्। स्त्री सौरभेयी-दृग्-बाण-दिग्-बाग्-भूष्वप्सु भूम्नि च"—इति मेदिनी।

विधेयताम्—विधेयस्य भाव इति विधेयता, ताम्। Obj. of एति। विधेय means 'obedient', 'subordinate'.

Ch. of Voice.—...परवता...नीचवृत्तिना अपत्रपेण अविधेयेन्द्रियेण [पुंसा] गवा इव विधेयता ईयते।

Questions.—Expl. the Sloka. परवान् and विधेयताम्—D and M. अपत्रपः—S. पुंसाम्—Decline the base.

Sensuous objects are like dreams

श्वस्त्वया सुखसंवित्तिः स्मरणीयाधुनातनी।
इति स्वप्नोपमान्मत्वा कामान्मा गास्तदङ्गताम् ॥३४

Eng. Equiv. सुखसंवित्ति—enjoyment of pleasures. अङ्ग—means. तदङ्गता—subordination to them.

Prose.—अधुनातनी सुखसंवित्तिः श्वः त्वया स्मरणीया। इति (हेतोः) कामान् स्वप्नोपमान् मत्वा तदङ्गतां मा गाः।

Bengali.—অদ্যকার সুখানুভব কলা তোমার স্মরণের বিষয় হইবে, (অর্থাৎ অদ্যকার সুখানুভব কলা আর সাক্ষাৎ অনুভূত হইবে না)। এই নিমিত্ত বিষয়সমূহকে স্বপ্নতুল্য (অলীক) মনে করিয়া তাহাদের অধীনতা স্বীকার করিও না। ৩৪ ।

English.—The enjoyment of pleasures will be a thing to be remembered by you to-morrow. So, considering the objects of desire like so many dreams do not undergo bondage to them. 34.

Ghantapatha.—न केवलं हिंसादिदोषमूलत्वात् विषयाणां हेयत्वं किन्तु अ-पारमार्थिकत्वात् अपि इत्याह (1)—श्व इति । अधुना भवा 'अधुनातनी' इदानीन्तनी । ["सायं चिरम्—" इत्यादिना ट्यु-प्रत्ययः (2)।] 'सुखमविचिः' सुखानुभवः 'श्वः' परेऽहनि 'त्वया' 'स्मरणीया', न तु अनुभवनीया, इति हेतोः,—काम्यन्ते इति 'कामाः' विषयाः तान् 'स्वप्नोपमान्' स्वप्नतुल्यान् 'मत्वा'—अतात्त्विकान् (क) निश्चित्य (3)—'तदङ्गतां' तच्छेषत्वं (4)—कामपरतन्त्रता—'मा गाः' न गच्छ । "इणो गा लुङि" इति गादेशः (5) ॥ ३४ ॥

Malli. Explained.

1. न केवलं &c.—विषयs are to be abandoned not only on account of their being the cause of faults like हिंसा, &c. but also on account of their being unreal (अ-पारमार्थिक)। To shew this the speaker says :—

2. सायं-चिरं &c.—अधुनातन (fem.—अधुनातनी) is with the affix ट्यु by the rule 'सायंचिर &c'. The full rule is—'साय-चिरं-प्राह्णे-प्रगेऽ-व्ययेभ्यः ट्यु-ट्युलौ तुट् च'। ट्यु = यु = अन। ट्यु or ट्युल् with the augument तुट् = तन। Thus सायंतन, अधुनातन, &c.

3. अ-तात्त्विकान्—अ-तात्त्विक means 'unreal'.

4. तदङ्गताम तच्छेषत्वम्—अङ्ग and शेष are synonymous words meaning 'means.' तेषां (कामानाम्) अङ्गानि = तदङ्गानि, तेषां भावः इति तदङ्गता = तच्छेषत्वम्। One who is subordinate may be handled as a means or instrument to the fulfilment of some purpose. Hence तदङ्गता or तच्छेषत्व means तत्-परतन्त्रता।

5. इणो गा लुङि &c.—In अगात् (इण् + लुङ्) the गा is by the rule 'इणः गा लुङि'।

(क) अतात्त्विकान्—Omitted in J.

Notes.

श्वः—अव्ययः, adv. modifying स्मरणीया। श्वः means 'to-morrow.' 'अनागतेऽह्नि श्वः'—अमरः। [ह्यः = yesterday].

सुखसंवित्तिः—सुखानां संवित्तिः—६तत्, उक्त कर्म of स्मरणीया। संवित्ति—सम् - विद् + क्तिन्—भावे। सम्यग् वेदनम् i. e. अनुभवः।

स्मरणीया—A thing to be remembered and not to be felt; because, the matter has become a thing of the past.

अधुनातनी—अधुना is an अव्यय। अधुना भवा इति अधुनातनी। अधुना + ट्यु with the augment तुट्; टित्वात् ङीप्। The rule for ट्यु is—'सायं चिरम् etc.' for which, see घण्टापथ explained 2.

इति—Here it denotes हेतु। Thus, इति is इति हेतोः। For the meanings of इति, see sl. 13

स्वप्नोपमान्—स्वप्नः उपमा येषां तान् (बहुव्रीहिः), adj. to कामान्। स्वप्नः—स्वप + नन्। उपमा—उप - मा - अङ्—करणे, स्त्रियामाप्।

कामान्—काम्यन्ते इति कम् + घञ् (कर्मणि) ; obj. of मत्वा।

मा गाः—मा (अ) गाः। अगाः = इण् + लुङ् स। 'माङि लुङ्' इति लुङ्, 'न माङ्योगे' इत्यडागमनिषेधः। गा is ordered for इण् in लुङ् by the rule "इणो गा लुङि"। The लुङ् here is in the sense of लोट्।

तदङ्गताम्—तेषाम् अङ्गं तदङ्गम्,—६तत्; तदङ्गस्य भावः तदङ्गता, ताम्; obj. of मा गाः। तदङ्गता means तत्-परतन्त्रता।

Ch. of Voice.—त्वम् अधुनातनीं सुखसंवित्तिं श्वः स्मर्तासि or स्मरिष्यसि or स्मरेः [or अधुनातन्या सुखसंवित्त्या स्मरणीयया भूयते],......तदङ्गता मा गायि।

Questions. अधुनातनी—D. तदङ्गताम्—M. मा गाः—Gram. Notes.

They are treacherous enemies.

अज्ञेया विप्रलब्धारः प्रिया विप्रियकारिणः।
सुदुस्त्यजास्त्यजन्तोऽपि कामाः कष्टा हि शत्रवः ॥३५॥

Eng. Equiv. विप्रलब्धारः—deceivers. कष्ट—troublesome.

Prose.—अज्ञेयाः विप्रलब्धारः, प्रियाः विप्रियकारिणः, त्यजन्तः अपि सुदुस्त्यजाः कामाः कष्टाः शत्रवः हि।

Bengali.—শ্রদ্ধেয় ও বঞ্চক, অপ্রিয় ও প্রিয়কারী, নিজেরা ত্যাগ করিতে প্রস্তুত হইলেও অত্যন্ত দুস্ত্যজ বিষয়সমূহ বাস্তবিকই কুৎসিত শত্রু। ৩৫।

English.—Objects of desire which are trustworthy and deceiving, agreeable and troublesome, forsaking and yet very difficult to be forsaken, are troublesome enemies indeed. 35.

Ghantapatha.—इतोऽपि (क) हेयाः कामा इत्याह—श्रद्धेया इति। श्रद्धातुमर्हाः 'श्रद्धेयाः' विश्वसनीयाः, तथा 'विप्रलब्धारः' प्रतारकाः विश्वासघातका इत्यर्थः; तथा, प्रीणयन्तीति 'प्रियाः' प्रीतिजनकाः ["इगुपध—" इत्यादिना (1) क-प्रत्ययः], तथापि 'विप्रियकारिणः' दुःखजननशीलाः; किञ्च 'त्यजन्तोऽपि' पुरुषं विहाय गच्छन्तोऽपि 'सुदुस्त्यजाः' स्वयं तेन त्यक्तुम् अशक्याः (ख) 'कामाः' विषयाः 'कष्टाः' कुत्सिताः शत्रवो हि, प्रसिद्धशत्रु-वैधर्म्यात् (ग) इति भावः (2)। [अत्र श्रद्धेयत्वादीनां विप्रलम्भकत्वादीनां च एकत्र विरोधो विषयस्वाभाव्येन समाधीयते इति विरोधाभासः अलङ्कारः (3)। तेन च कामानां प्रसिद्धशत्रुवैधर्म्यं व्यतिरेकेण व्यज्यते इत्यलङ्कारेण अलङ्कारध्वनिः (4)] ॥३६॥

Malli. Explained.

1. इतोऽपि &c.—The objects of desire are to be abandoned for this reason also (viz. that which will be set forth in the present sloka).

2. इगुपध &c.—प्रिय (प्री + क – कर्त्तरि) takes the affix क by the rule 'इगुपध-ज्ञा-प्री-किरः कः'। इगुपधः = इक् उपधा यस्य सः। For इक् (प्रत्याहार), see preliminary information—1.

3. प्रसिद्धशत्रुवैधर्म्यात् &c.—The कामs are *bad* enemies on account of their being different from open enemies.

4. अत्र श्रद्धेयत्वादीनां &c.—Here the opposite characters viz. श्रद्धेय and विप्रलम्भकत्व, &c., residing in the same place is to be accounted for by the very nature of the things concerned.

(क) For इतोऽपि J reads अतः। The former is preferable, because the present Sloka gives an *additional* ground.

(ख) For स्वयं तेन, J reads सुयत्नेन।

(ग) J reads प्रसिद्धशत्रवः वैधर्म्यात्। This gives no meaning. The actual expression has been repeated by Malli. a few lines below where there is no variant.

The fig. of speech, therefore, is विरोधाभास। [एकत्रविरोध: = एकत्रावस्थानविषयको विरोध:]।

5. तेन च &c.—And by that (विरोधाभास), difference from open enemies is indicated by means of व्यतिरेक (excess over the उपमान), and hence, an अलङ्कार is being suggested by another अलङ्कार। [व्यतिरेक is being suggested by विरोधाभास]।

Notes.

श्रद्धेया:—श्रत् - धा + यत्—कर्मणि by the rule 'अचो यत्', १मा बहु, adj. to कामा:। श्रद्धेया: means श्रद्धानुमर्हा: ; here the कृत्य-affix 'यत्' has been added in the sense of अर्ह by the rule 'अर्हे कृत्य-तृचश्च'। लिङ् and तृच् also are admissible. Thus, जनेन श्रद्धेया: or जन: श्रद्धध्यात् (or श्रद्धधीत), or जन: श्रद्धाता।

विप्रलम्भार:—वि - प्र - लभ + तृच्—कर्तरि। १मा बहु of विप्रलब्धृ ; adj. to कामा:।

विप्रियकारिण:—विप्रियं कर्तुं शीलमेषामिति विप्रिय - कृ + णिनि: (ताच्छील्ये) ; adj to कामा:।

सुदुस्त्यजा:—सु - दुर - त्यज + खल्—कर्मणि ; adj. to कामा:।

कष्टा: = कष्टदायका: ; hence कुत्सिता: ; adj. to शत्रव:।

Rhetoric.—The fig. of speech is विरोधाभास and by that विरोधाभास another fig. of speech viz. व्यतिरेक [over enemies] is being suggested.

Ch. of Voice.—श्रद्धेयै: विप्रलब्धृभि: प्रियै: विप्रियकारिभि: त्यजद्भि: अपि सुदुस्त्यजै: कामै: कष्टै: शत्रुभि: [भूयते]।

Questions. विप्रलम्भार:—D. and M. Discuss the figures of speech in the sloka.

This region is fit for penance leading to salvation.

विविक्तोऽस्मिन्नगो भूय: प्लाविते जह्नुकन्यया।
प्रत्यासीदति मुक्तिस्त्वां पुरा, मा भूरुदायुध: ॥३६

Eng. Equiv. विविक्त—lonely. भूय:—abundantly (or repeatedly). प्लावित—wetted ; (or, पावित—purified). प्रत्यासीदति—comes near. पुरा—in the near future. उदायुध—equipped with weapons.

Prose.—विविक्ते जह्नुकन्यया भूयः प्लाविते (V. R. पाविते) अस्मिन् नगे त्वां मुक्तिःपुरा प्रत्यासीदति । उदायुधः मा भूः ।

Bengali.—জাহ্নবী দ্বারা অত্যন্ত (অথবা পুনঃ পুনঃ) সিক্ত (পাঠান্তরে—পবিত্রীকৃত) এই বিজন (ইন্দ্রকীল) পর্ব্বতে মুক্তি অচিরেই তোমার নিকট উপস্থিত হইবে। তুমি উদ্যতাস্ত্র হইও না (অর্থাৎ অস্ত্রধারণ করিও না, অর্থাৎ অস্ত্র ত্যাগ কর)। ৩৬।

English. – Salvation will soon approach you in this lonely (Indraki'la) mountain abundantly (or, repeatedly) wetted (or, purified) by the Ganges (lit. daughter of Jahnu). Don't take up weapons. 36.

Ghantapatha.—तर्हि किं कर्त्तव्यमित्याशङ्क्य उपसंहरन् आह—विविक्त इति । 'विविक्ते' विजने । ["विविक्त-विजन-च्छन्न-निःशलाकास्तथा रहः" (1) इत्यमरः ।] 'जह्नुकन्यया' गङ्गया 'भूयः' भूयिष्ठं पुनः पुनः वा । ["भूयः पुनः पुनः स्यात् प्रभूतार्थे त्वनव्ययम्" (क) (2) इति विश्वः ।] 'प्लाविते' सिक्ते, "पाविते" इति पाठे पवित्रीकृते इत्यर्थः, 'अस्मिन्नगे' इन्द्रकीले 'त्वां' 'मुक्तिः' 'पुरा' निकटे 'प्रत्यासीदति' सन्निकृष्टा भविष्यति इत्यर्थः । ["पुरा पुराणे निकटे प्रबन्धातीत-भाविषु" (3) इति विश्वः] । 'उदायुधः' गृहीतशस्त्रो 'मा भूः' शस्त्रं विमुञ्च इत्यर्थः ॥ ३६ ॥

Malli. Explained.

1. विविक्त-विजन &c.—विविक्त, विजन, छन्न, निःशलाक and रहः—these are synonymous.

2. मुहुः पुनः पुनः &c.—भूयः (अव्यय) means पुनः पुनः, but to mean प्रभूत it is not an अव्यय ।

3. पुरा पुराणे &c.—पुरा means पुराण, निकट, प्रबन्ध (continued (i) action or (ii) narrative), अतीत and भाविन् (future).

Notes.

विविक्ते—विविच्यन्ति (पृथग् भवन्ति) जनाः अत्र इति वि – विच + क्त (अधिकरणे); adj. to नगे । विविक्ति means । For lexicon, see घण्टापथ ।

नगे—न गच्छति इति नञ् – गम् + ड—कर्त्तरि ; mountain. अधिकरणे ७मी । When not applying to a प्राणिन्, the word नग is an optional form of अग by the rule 'नगः अप्राणिषु अन्यतरस्याम्' ।

(क) For प्रभूतार्थे &c., all read 'भूतार्थे पुनरव्ययम्' which is evidently wrong. Our reading is based on verification.

अग: नग: वा (पर्वत: or वृक्ष:)। But अग: (and not नग:) पुरुष: शीतेन। Here, in the text, we might have either of the two forms—श्रमिन्नगे = श्रमिन् + अगे, or श्रमिन् + नगे।

The mountain here refers to mount Indrakila, (a peak favourite with Indra) of the Himalayas. For the description of this Indrakila, cf. Sl. 45 of canto V.

भूय:—adv. modifying प्राविते or पाविते। It may mean abundantly (बहुतरम्) by being derived as (बहु + ईयसु, 'बहो र्लोप: भू च बहो:' ; or, it may be an अव्यय meaning repeatedly (पुन: पुन:)। For lexicon, see घण्टापथ 2.

प्राविते—प्र + णिच् + क्त—कर्म्मणि। Malli. has discussed a different reading पाविते (पू + णिच् + क्त—कर्म्मणि) ; adj. to नगे।

जह्नुकन्यया—अनुक्त कर्त्तरि तृया। जाह्नव्या (in one word).

जह्नुकन्यका—The allusion is as follows :—While coming down to the earth from heaven, Gangá overflowed the sacrificial ground of the royal sage Jahnu who in a rage drank her up. His wrath was, however, appeased by Bhagiratha (at whose instance Gangá was descending) and Jahnu let out the stream through his ears. Gangá thenceforward came to be called by the epithets जह्नुकन्या, जह्नुतनया, जाह्नवी, &c.

प्रत्यासीदति—प्रति - आ - सद् + लट् ति। Here लट् is used in the sense of the future to indicate 'certainty' in connection with the अव्यय-word पुरा by the rule 'यावत्-पुरा-निपातयोर्लट्'। [Malli. has discussed this rule on 'व्रजति पुरा हि परासुतां त्वदर्थे—Sl. 50 Canto X]. Cf. 'पुरा सप्तद्वीपा जयति वसुधाम् अप्रतिरथ:' S'ak. vii 33 ; 'आलोके ते निपतति पुरा सा बलिव्याकुला वा' (मेघदूत II. 24) etc. etc. The root सद् is intransitive, but प्रत्यासीदति is transitive (उपसर्गवशात् सकर्म्मकत्वम्)।

पुरा—An अव्यय meaning—in the near future, in a short time, soon. 'स्यात् प्रबन्धे चिरातीते निकटागामिके पुरा'—अमर:। Also see lexicon cited in घण्टापथ 3.

मा भूः—मा (अ)भूः। अभूः = भू + लुङ् स्। मा भूः = न भव।

उद्यायुधः—उद्यतम् आयुधं येन सः (बहुव्रीहि)। Opt. form—उद्यतायुधः by the rule 'प्रादिभ्यः—' etc. आयुधम्—आयुध्यते अनेन इति आङ् - युध् + क—करणे। "घञर्थे क-विधानम्"।

Ch. of Voice.—......मुक्त्या त्वं प्रत्यासद्यसे। उद्यतायुधेन [त्वया] मा भावि।

Questions. विविक्ते—D and M. पुरा—M. जह्नुकन्यया—allusion. प्रत्यासीदति—Account for लट्।

Saying thus Indra stopped, and Arjuna began to speak.

व्याहृत्य मरुतां पत्याविति वाचमवस्थिते।
वचः प्रश्रयगम्भीरमथोवाच कपिध्वजः॥ ३७ ॥

Eng. Equiv. व्याहृत्य—having said. मरुताम्—of the gods. प्रश्रय—humility. कपिध्वज—Name of Arjuna.

Prose.—मरुतां पत्यौ इति वाचं व्याहृत्य अवस्थिते [सति] अथ कपिध्वजः प्रश्रयगम्भीरं वचः उवाच।

Bengali.—দেবরাজ ইন্দ্র এইরূপ বাক্য বলিয়া নির্ব্বাক হইলে তাহার পর অর্জ্জুন বিনয়-মধুর [নিম্নোক্ত] বাক্য বলিলেন। ৩৭।

English.—The chief of the gods having stopped after speaking thus, Arjuna spoke the following words marked with humility. 37.

Ghantapatha.—व्याहृत्येति। 'मरुतां पत्यौ' देवेन्द्रे 'इति वाचं' 'व्याहृत्य' उक्त्वा 'अवस्थिते' सति तूष्णीं स्थिते सति, 'अथ' 'कपिध्वजः' अर्जुनः 'प्रश्रयगम्भीरं' विनयमधुरम् ["विनय-प्रश्रयौ समौ" इति यादवः।] 'वचः' 'उवाच' उक्तवान्॥ ३७॥

Notes.

व्याहृत्य—वि - आङ् - हृ + ल्यप्। 'व्याहार उक्तिर्लपितम्'—इत्यमरः।

मरुतां पत्यौ—भावे ७मी। मरुत् here means देवता। 'मरुतौ पवनामरौ'—अमरः।

इति—अव्ययम्। Adj. to वाचम्।

प्रश्रयगम्भीरम्—प्रश्रयेण गम्भीरम्—३तत्। प्रश्रय means विनय। 'विनय-प्रश्रयौ समौ'।—यादवः। Marked (i. e. sweetened) with humility.

प्रश्रयगम्भीरम्—प्रश्रयेण गम्भीरम्—इतत्। प्रश्रय means विनय। 'विनय-प्रश्रयौ समौ'।—अमरः। Marked (i. e. sweetened) with humility.

वचः उवाच—The word वचः in connection witn उवाच is redundant. The explicit mention is held to be justified for the purpose of adding adjectives, and that justification too is denied when the adjective might be more shortly expressed as an adverb. Thus, instead of saying प्रश्रय-गम्भीरं वचः उवाच we should simply say प्रश्रय-गम्भीरम् (adv.) उवाच।

However, such uses as the present one are not rare. Cf. 'संप्रस्थितो वाचमुवाच कौत्सः'—Raghu V. 32. The काशिका says—'लौकिकशब्द-व्यवहारे लाघवं नाद्रियते'।

कपिध्वजः—Arjuna was called कपिध्वज, because his chariot was marked with a divine monkey. [This chariot along with his bow (गाण्डीव) and the quivers he received from Agni on the eve of his burning the Khándava forest. (See Mahá-Bhárata, A'di, Chap. 225)].

Hanumán, the monkey chief, was also actually present on Arjuna's chariot during the great battle. (See Mahá-Bh., Vána, Chap. 151).

Ch. of Voice.—...कपिध्वजेन···वचः (१मा) ऊचे।

Questions. वचः उवाच—Is there any tautology here? कपिध्वज—Expl allusion.

Indra's speech characterised :— An ideal speech containing lucidity, &c.

प्रसादरम्यमोजस्वि गरीयो लाघवान्वितम्।
साकाङ्क्षमनुपस्कारं विष्वग्गति निराकुलम् ॥३८॥

Eng. Equiv. प्रसाद—clearness; lucidity. ओजस्विन्—vigorous. गरीयस्—deep [in meaning]. लाघव—brevity; conciseness. उपस्कार—ellipsis. विष्वक्—all around. आकुल—confused.

Prose.—प्रसादरम्यम् ओजस्वि &c. (No change), [वाक्यं कः व्याकुर्य्यात्—from Sl. 41] । ३८ ।

Bengali.—প্রসাদগুণবশতঃ রমণীয়, ওজস্বি, অতিশয় সার্থক, অদীর্ঘ, পূর্ব্বাপর সম্পর্কযুক্ত, অধ্যাহারদোষরহিত, সম্পূর্ণার্থপ্রকাশক সুস্পষ্ট [এরূপ বাক্য আপনার ন্যায় বুদ্ধিমান্ ব্যক্তি ভিন্ন আর কে বলিতে পারে ?—from Sl. 41.] । ৩৮ ।

English.—Charming on account of lucidness, vigorous, significant, concise, well-connected, not elliptical, fully expressive, not confused [—who else but an intelligent person like you can make such a speech] ? 38.

Elucidation.—Sir, you have made an ideal speech. Not a single word has been used in an unusual sense and the sense intended is thus fully intelligible. Your words are vigorous but at the same time fully significant. They are not incoherent or ambiguous anywhere. The speech has not at all been lengthy and tiresome, but still it leaves nothing untouched. It is fully expressive and explicit.

Ghantapatha.—किमुवाच इत्यपेक्षायाम् (क) चतुर्भिः इन्द्रवाक्यम् उपश्लोकयन् (1) आह—प्रसादेति । 'प्रसादोऽत्र प्रसिद्धार्थपदत्वं (2), तेन 'रम्यम्'; "प्रसिद्धार्थपदत्वं यत् स प्रसादो निगद्यते" इति लक्षणात् (3) । 'ओजस्वि' समासभूयिष्ठम्; "ओजः समासभूयस्त्वम्" इति शासनात् (4) । 'गरीयः' अर्थभूयस्त्व-परिगतं न तु शब्दाडम्बरमात्रम् इत्यर्थः (5) । 'लाघवान्वितं' विस्तरदोष-रहितम् (6) । 'साकाङ्क्षम्' आकाङ्क्षावत्पदकदम्बात्मकं, न तु दशदाडिमादिवाक्यवत् अनाकाङ्क्षितम् इत्यर्थः (7) । 'अनुपस्कारम्' अध्याहारदोष-रहितम् (8) । 'विष्वग्गति' कृत्स्नार्थ-प्रतिपादकं, नतु सावशेषार्थम् (9) ; अतएव निराकुलम् असङ्कीर्णार्थम् (10) ॥ ३८ ॥

Malli. Explained.

1. उपश्लोकयन् = स्तुवन् ; eulogising. [श्लोकेन उपस्तौति इति उपश्लोकयति].

2. प्रसादोऽत्र &c.—प्रसाद here means प्रसिद्धार्थपदत्व (i. e. the state of being couched in words used in their usual sense).

(क) आह—Added here by some.

3. प्रसिद्धार्थपदत्वं यत् &c.—[This definition is from प्रतापरुद्रीय].

4. ओजः समासभूयस्त्वम् &c.—[This definition is from प्रतापरुद्रीय as well as from Dandin's काव्यादर्श। शासन = authoritative statement].

5. अर्थभूयस्त्वपरिगतम् &c.—Having abundance (i. e. richness) of meaning, i.e. not mere bombasts. N. B. शब्दाडम्बरमात्रम् is not an adjective but a noun. The proper expression therefore should have been शब्दडम्बरमात्रयुक्तम्। But this is practically equivalent to शब्दाडम्बरमात्रम्।

6. विस्तर &c.—Free from the fault of prolixity (विस्तर).

7. आकाङ्क्षावत् &c.—Couched in words having connection with one another, i.e. not composed of unconnected words like दश, दाडिम, &c. [N. B. A cluster of unconnected words, e. g. the following, is not a sentence :—दशदाडिमपुस्तकभक्तिहृदसर्व्व &c.]

8. अध्याहार—Ellipsis.

9. कृत्स्नार्थ &c.—Expressive of the entire meaning and not having something left to be understood.

10. असङ्कीर्णार्थम्—असङ्कीर्णः (not mixed up) अर्थः यस्य तत्।

Notes.

In Sl. 38—41 (which form a single sentence) Arjuna greatly eulogises Indra's speech simply to refute it later on on some different grounds. This is one of the secrets of success with many an able speaker who likes to win the audience over to his side *gradually* rather than run the risk of missing them by an attempt at an *abrupt* convincement. For a similar eulogistic reference with the same object in view, cf. Yudhishthir'as reply to Bhìma in Kiráta II. 26-28.

N. B. The गुणs of speech have been differently enumeraed by different rhetoricians. Sóme count as many as 24,

some 10, and some have condensed them into 3 only. Bhárravi has mentioned here about a dozen, not in compliance with any recognised authority nor perhaps on the basis of any strictly exhaustive calculation.

प्रसादरम्यम्—प्रसाद is derived as प्र – सद् + घञ्—भावे or करणे। For sense, see Malli. Expl. 2. [In the sense of 'building' the form is प्रासाद]. प्रसादेन रम्यम्—३तत्। Adj. to वाक्यम्—Sl. 41. रम्यम्—रम् + यत्—अधिकरणे, बाहुलकात्।

ओजस्वि—ओजः अस्ति अस्य इति ओजस्वि = समासबहुलम्। The base is ओजस्विन्।

गरीयः—गुरु + ईयसुन्। Neuter. For sense, see Malli. Expl. 3.

लाघवान्वितम्—लाघवेन अन्वितम्—३तत्।

साकाङ्क्षम्—आकाङ्क्षया सह वर्त्तमानम् इति बहुव्रीहिः।

अनुपस्कारम्—उपक्रियते इति उपस्कारः ; उप – कृ + घञ्—भावे। Then सुट् (स्) comes in by the rule 'उपात् प्रतियत्न-वैकृत-वाक्याध्याहारेषु च'। [अध्याहार means 'supplying of ellipsis']. न अस्ति उपस्कारः यत्र तत् अनुपस्कारम्।

विष्वग्गति—विषु (= नाना) अञ्चति इति विष्वक् ; विषु – अञ्च + क्विन्—कर्त्तरि। अव्ययम्। All around. विष्वक् गतिः यस्य तत्।

निराकुलम्—निर् (= न) आकुलम् (= सङ्कीर्णम्)—प्रादि-समासः। Or, निर् (= नास्ति) आकुलत्वं यत्र तत् निराकुलम्—बहुव्रीहिः ; the त्व of आकुलत्व is dropped as the sense is clear enough. 'त्व-प्रत्ययस्तु गतार्थत्वात् न प्रयुक्तः'—Vámana.

Ch. of Voice.—No change—all the expressions being adjectives to वाक्यम् in sl. 41 will take १मा (neuter) which, in the present case, necessitates no change.

Questions.—Fully explain the expressions used in the Sloka. What is Bhárravi's idea of an ideal speech? (See Sl. 38—41).

Supported by arguments and therefore unassailable.

न्यायनिर्णीतसारत्वान्निरपेक्षमिवागमे।
अप्रकम्प्यतयान्येषामाम्नायवचनोपमम् ॥३८॥

Eng. Equiv. न्याय—argument. निरपेक्ष—independent. आगम—(Shastra). आम्नाय—(Veda).

Prose.—न्याय-निर्णीत-सारत्वात् आगमे निरपेक्षम् इव, अन्येषाम् अप्रकम्प्यतया आम्नाय-वचनोपमम् [वाक्यं कः व्याकुर्य्यात् from Sl. 41].

Bengali.—[স্বাধীন] যুক্তি দ্বারা বিষয়সমূহ স্থিরীকৃত হওয়ায় প্রচলিত শাস্ত্রসমূহের যেন অনধীন, এবং অন্যকর্ত্তৃক প্রত্যাখ্যানযোগ্য না হওয়ায় বেদবাক্যবৎ [এরূপ বাক্য &c. from Sl. 41] । ৩৮ ।

English.—Independent, as it were, of Shastras on account of the facts being determined by [independent] arguments. and like a Vedic text on account of its being unassailable by others. 39.

Elucidation.—So strong and independent arguments have you made use of in your speech that it appears to be quite independent of the existing Shastras, and so unassailable is your speech that it stands unmoved like a Vedic text which inspires unflinching reverence in every mind.

Ghantapatha—न्यायेति । पुनः, 'न्यायेन' युक्त्या 'निर्णीतसारत्वात्' निश्चितार्थत्वात् हेतोः 'आगमे' शास्त्रे विषये 'निरपेक्ष' स्वतन्त्रम् 'इव',—युक्तिदार्ढ्यादेवं प्रतीयते, वस्तुतस्तु शास्त्रसिद्धार्थम् एवेति (क) इवशब्दार्थः (1) । किञ्च, 'अन्येषां' प्रतिवादिनाम् 'अप्रकम्प्यतया' अनुमानादिभिः अबाध्यत्वात् अप्रत्याख्याततया (2) 'आम्नाय-वचनोपमं' वेदवाक्यतुल्यम् इत्यर्थः ॥ ३९ ॥

Malli. Explained.

1. युक्तिदार्ढ्यात् &c.—On account of the strength of the arguments it appears to be so (viz. that it is independent of the existing Shastras), but, as a matter of fact, the statements made are based on those Shastras no doubt. This is the sense of the word इव । (शास्त्रसिद्धः अर्थः यस्य तत् शास्त्रसिद्धार्थम्) ।

2. अनुमानादिभिः &c.—Owing to its being irrefutable on account of its being not opposed to अनुमान, &c. (the various instruments (प्रमाणs) of knowledge—viz. प्रत्यक्ष, अनुमान, &c.). N. B. The statement which is opposed to प्रत्यक्ष or does not stand the tests of अनुमान, &c., is not acceptable.

(क) All read इव for एव here. But that is evidently wrong.

Notes.

न्यायनिर्णीतसारत्वात्—न्यायेन निर्णीतः—३तत्, न्यायनिर्णीतः सारः यस्य तत्—बहुव्रीहिः, तस्य भावः, तस्मात्।

निरपेक्षम्—निर् (= नास्ति) अपेक्षा यस्य तत्—बहुव्रीहिः। Adj. to वाक्यम् in Sl. 41. अपेक्षा—dependence.

आगमे निरपेक्षम् इव—Our Shastras are exhaustive. Nothing new can be said. Indra's speech, by its special excellence, *seemed* to be a new thing altogether ; but, as a matter of fact, it was not a new thing but was based on the existing Shastras.

आगमे—विषयाधिकरणे ७मी। On the Shastra. आगम्यते अनेन इति 'आगमः' शास्त्रम्। आङ्–गम+घञ्—करणे।

अप्रकम्प्यतया—प्रकम्पयितुं शक्यम् इति प्रकम्प्यम्, प्र–कम्पि+यत्। न प्रकम्प्यम्—नञ् तत्। तस्य भावः इति अप्रकम्प्यता, तया,। हेतौ ३या।

अन्येषाम्—अनुक्तकर्त्ता of प्रकम्पन। Opt.—३या by the rule—'कृत्यानां कर्त्तरि वा'।

आम्नाय-वचनोपमम्—आम्नायते (= अभ्यस्यते) इति आम्नायः (= वेदः)। आङ्–म्ना+घञ्—कर्म्मणि। आम्नायस्य वचनम्—६तत्, तत् उपमा यस्य तत्—बहुव्रीहिः। उपमा—उप–मा+अङ्—करणे।

Ch. of Voice.—No change. (See Sl. 38).

Questions.—Expl. the sloka. निरपेक्षमिव—Force ef इव।

Vigorous and peaceful at the same time.

अलङ्घ्यत्वाज्जनैरन्यैः क्षुभितोदन्वदूर्जितम्।
औदार्य्यादर्थसम्पत्तेः शान्तं चित्तमृषेरिव ॥४०॥

Eng. Equiv. उदन्वत्—sea. ऊर्जित—vigorous. औदार्य्य—grandeur.

Prose.—अन्यैः जनैः अलङ्घ्यत्वात् क्षुभितोदन्वदूर्जितम्, अर्थसम्पत्तेः औदार्य्यात् ऋषेः चित्तम् इव शान्तम् [वाक्यं कः व्याकुर्य्यात्—Sl. 41.]. N. B. Mallinátha has not disturbed the 3rd foot in his prose-order.

Bengali.—অপর কাহারও কর্ত্তৃক অনুল্লঙ্ঘনীয়তা বশতঃ উদ্বেল সমুদ্রের ন্যায় গম্ভীর, এবং অর্থসম্পদের বৈশিষ্ট্য বশতঃ ঋষিচিত্তের ন্যায় প্রশান্ত [এরূপ বাক্য &c.—Sl. 41] । ৪০ ।

English.—Vigorous like an agitated sea an account of its being inviolable by others, and peaceful like the mind of a sage on account of its grandeur of meaning (lit. of the property of mea ning). 40.

Substance.—Your speech combines in it opposite qualities. It is both vigorous and peaceful.

Ghantapatha.—अलङ्घ्यत्वादिति । 'अन्यैः जनैः' 'अलङ्घ्यत्वात्' अनुल्लङ्घनीयत्वात् 'क्षुभितोदन्वदूर्जितम्' उद्वेलाम्भोधिगम्भीरम् । 'औदार्य्यात्' उक्तिविशेषत्वात् (1), श्लाघ्यविशेषणाद्वा ; तदुक्तं दण्डिना—"उत्कर्षवान् गुणः कश्चिदुक्ते यस्मिन् प्रतीयते । तदुदाराह्वयं तेन सनाथा काव्यपद्धतिः ॥ श्लाघ्यैर्विशेषणैर्युक्तमुदारं कैश्चिदिष्यते ॥" (2) इति । "अग्राम्यार्थत्वात्" इति केचित् (3), अन्यत्र त्यागित्वात् (4) इत्यर्थः । 'अर्थसम्पत्तेः' प्रयोजनसम्पत्तेः, अन्यत्र अणिमादिसमृद्धेः (5) । 'ऋषेः' मुनेः 'चित्तमिव' 'शान्तं' सौम्यम् ॥ ४० ॥

Malli Explained.

1. उक्तिविशेषत्वात्—On account of the excellence of the speech.

2. तदुक्तं &c.—Dandin (author or Kávyádars'a) says—a speech which contains a peculiar qual ity of excellecnce is called उदार ; the Kávya literature looks upon that as her patron. Some hold that उदार is that composition which contains significant adjectives. [N. B. This latter definition has been given in प्रतापरुद्रीय not for उदारता but for उदात्तता].

3. अग्राम्यार्थत्वात् &c.—Some explain औदार्य्यात् as अग्राम्यार्थत्वात्, i. e., on account of having no vulgarity in meaning.

4. अन्यत्र &c.—In the other case [i. e.. in the case of a sage (ऋषि)] औदार्य्यात् means त्यागित्वात्. i. e., on account of benevolence.

5. अन्यत्र अणिमादिसमृद्धेः—In the case of a sage, अर्थसम्पत्तेः means अणिमादिसमृद्धेः i. e. of the properties of अणिमा, &c. (अणिमा, लघिमा, व्याप्ति, प्राकाम्य, गरिमा, ईशित्व, वशित्व and कामावसायिता—the अष्टसिद्धिs associated with sages).

Notes.

अलङ्घ्यत्वात्—अलङ्घ्य in the case of a speech may mean that which cannot be violated.

जनैः—Nom. of अलङ्घ्य। Opt. form—जनानाम्।

क्षुभितोदन्वदूर्जितम्—क्षुभितः उदन्वान्—कर्मधा, स इव उर्जितम्—उपमान। क्षुभितः—क्षुभ + क्त—कर्त्तरि।

[The form क्षुब्ध is grammatically not very accurate in this sense, it being the special form in the sense of मन्थनदण्ड].

उदन्वान्—उदक + मतुप्। See Sl. 21. ऊर्जितम्—ऊर्ज + क्त—कर्त्तरि।

औदार्य्यात्—औदार्य्य here has been variously explained by Malli.—(i) excellence; (ii) special significance; (iii) absence of vulgarism; and (in the case of a ऋषि) (iv) benevolence.

अर्थसम्पत्तेः—अर्थानां सम्पत्तिः, तस्याः।

Ch. of Voice.—No change (see Sl. 38).

Questions. क्षुभित—D. Is any other form possible with क्त? If so, in what sense? औदार्य्यात्—M.

Sweet and intelligent.

इदमीदृग्गुणोपेतं लब्धावसरसाधनम्
व्याकुर्य्यात्कः प्रियं वाक्यं यो वक्ता नेदृगाशयः ॥४१॥

Eng. Equiv. अवसर—occasion; opportunity. साधन—means. आशय—intellect.

Prose.—इदम् ईदृग्गुणोपेतं लब्धावसरसाधनं प्रियं वाक्य' कः [वक्ता] व्याकुर्य्यात् यो वक्ता ईदृगाशयः न [भवति]। ४१।

English.—এইরূপ গুণবিশিষ্ট উপযুক্তাবসর-প্রাপ্ত এবং উপযুক্ত উপায় প্রাপ্ত এইরূপ প্রিয় বাক্য আপনার ন্যায় এইরূপ বুদ্ধিমান্ ভিন্ন আর কে বলিতে পারেন ? । ৪১ ।

English.—What other speaker than one who is as intelligent as you are can make such an accomplished and charming speech as this which has seized the right occasion and the right means ? 41.

Elucidation.—Your speech is an exceptionally intelligent one, and it has been made with a plausible object very skil-

fully and at the right moment. Indeed, there were grounds for your speech, and they could not be more successfully impressed in one's mind.

Ghantapatha.—इदमिति । 'इदम्' 'ईदृग्गुणोपेतं' यथोक्तगुणयुक्तम् । [इदमुपपदात् दृशेः क्विन् । "इदं-किमोरीश्-की" इति ईशादेशः (1)] । 'लब्धे' (2) प्राप्ते 'अवसरसाधने' कालोपायौ येन तत् 'प्रियं' प्रीतिकरं वाक्यं' 'को वक्ता' 'व्याकुर्य्यात्' व्याहरेत्, 'यो वक्ता' 'न' ईदृगाशयः' ईदृग्विवक्षावान् न ईदृग् बुद्धिशाली न "भवति" इति शेषः । अस्य अर्थस्य वक्तुम् अशक्यत्वादिति भावः (क) ॥ ४१ ॥

Malli. Explained.

1. इदमुपपदात् &c.—ईदृश् is derived as—इदम्–दृश+क्विन् । इदम् is changed into ईदृश् and किम् into की [when क्विन् and allied affixes follow]. [Thus, ईदृश् and कीदृश्].

2. लब्धे—Neuter, १मा २ वचन ।

Notes.

ईदृग् गुणोपेतम्—Adj. to वाक्यम् । The base is ईदृश् । इमे इव पश्यन्ति (=ज्ञानविषया भवन्ति) इति इदम्–दृश्+क्विन्—कर्मकर्तृवाच्ये । (See notes on मादृशः—Sl. 10). ईदृशः गुणाः इति ईदृग् गुणाः—कर्मधा. तैः उपेतम्—३तत् ।

लब्धावसरसाधनम्—अवसरश्च साधनं च इति अवसर-साधने—द्वन्द्वः, लब्धे अवसरसाधने येन तत् लब्धावसरसाधनम्—बहुव्रीहिः । साधन (=उपाय) here probably means सौष्ठव (skill) and अभिसन्धान (purpose) ; cf. "उपायः पुनः त्रयाणां कारणादीनां (viz. कारण-करण-कार्य्याणां) सौष्ठवम् अभिधानं च सम्यक्"—Charaka, Vimána, 8. [सम्यक् अभिधानम् = अभिसन्धानम्] It is a pity that Mallinátha has not made the thing clear.

(क) Bombay reads—यो वक्ता सोऽतीदृगाशय ईदृग् विवक्षावान् न भवति । अबुद्धिरित्यर्थः । तस्यार्थस्य &c. The first part is unmeaning and, in the latter part, अस्य is more appropriate than तस्य ।

Bengal adds another भवति before ईदृग् बुद्धिशाली which is redundant.

व्याकुर्य्यात्—वि – आङ् – कृ + लिङ् यात्। 'शकि लिङ् च' इति शक्तौ लिङ्।

ईदृगाशयः—ईदृक् आशयः यस्य सः—बहुव्रीहिः।

Parallel Passage.—'इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः'—II. 24.

Ch. of Voice.—...गुणोपेतम् इदम्...साधनं प्रियं वाक्यं (१मा) केन वक्त्रा व्याक्रियेत येन वक्त्रा ईदृगाशयेन न [भूयते].

Question. लब्धावसरसाधनम्—Expl.

But, you do not know my real condition.

न ज्ञातं तात ! यत्नस्य पौर्वापर्य्यममुष्य ते ।
शासितुं येन मां धर्मं मुनिभिस्तुल्यमिच्छसि ॥४२

Eng. Equiv. पौर्वापर्य्य—antecedent and consequent; history.

Prose.—हे तात ! अमुष्य यत्नस्य पौर्व्वापर्य्यं ते न ज्ञातम्, येन मां मुनिभिस्तुल्यं धर्म्मं शासितुम् इच्छसि। ४२।

Bengali.—মহাশয়, আপনি আমার উদ্যমের পৌর্ব্বাপর্য্য (অর্থাৎ কারণ ও ফল) অবগত নহেন, এবং সেইজন্য আমাকে মুনিগণের উপযুক্ত ধর্ম্ম উপদেশ করিতে ইচ্ছা করিয়াছেন। ৪৩।

English.—Sir, you are not aware of the history of my attempt, and hence it is that you intend to preach to me Dharma suitable for sages. 42.

Ghantapatha.—एवम् इन्द्रवाक्यम् उपश्लोक्य (1) न अहम् अस्य उपदेशस्य अधिकारीति परिहरति (2)—नेति। हे 'तात' ! 'अमुष्य' 'यत्नस्य' तपोरूपस्य अस्य मदीयोद्योगस्य (क) पूर्वं च अपरञ्च 'पूर्वापरे', ते एव 'पौर्वापर्य्यं' कारणं फलञ्च। चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्प्रत्ययः (3)। 'ते' तव 'न ज्ञातं' त्वया न ज्ञायत इत्यर्थः। "मतिबुद्धि—" इत्यादिना वर्त्तमाने क्तः। तद्योगादेव षष्ठी (4)। कुतः ? येन कारणेन 'मां' मुनिभिः' 'तुल्यं' सदृशं 'धर्मं' मोक्षधर्मं 'शासितुम्' उपदेष्टुम् 'इच्छसि'। शासिरयं दुहादित्वात् द्विकर्म्मको ज्ञेयः (5) ॥ ४२ ॥

(क) मदीययागस्य for मदीयोद्योगस्य—J.

Malli. Explained.

1. उपश्लोक्य—स्तुत्वा ।

2. परिहरति—Refutes.

3. चातुर्वर्ण्यादित्यात् &c.—पूर्वापरे इव इति पूर्वापर+ष्यञ् = पौर्वापर्य्यम्—like चातुर्वर्ण्यम् (चतुर्वर्णाः एव इति चातुर्वर्ण्यम्—ष्यञ्) । The affix is added in स्वार्थ (i. e. without alteration of sense).

4. मतिबुद्धि &c.—In the expression तव न ज्ञातम्, the क्त in ज्ञात is in the sense of वर्त्तमान by the rule 'मति-बुद्धि-पूजार्थेभ्यश्च,' and the षष्ठी in तव is in connection with that वर्त्तमानविहित-क्त ।

5. शासितुम् &c.—This root शास is to be taken as द्विकर्म्मक, as it belongs to the दुहादि-group.

N. B. The Káriká is—"दुह्याच्-पच्-दण्ड्-रुधि-प्रच्छि-चि-ब्रू-शासु-जि-मन्थ्-मुषाम् । कर्म्मयुक् स्यादकथितं तथा स्यान्नी-हृ-कृष्-वहाम्" ॥

Notes.

ज्ञातम्—ज्ञा+क्त—कर्म्मणि, in the sense of वर्त्तमानकाल by the rule 'मतिबुद्धिपूजार्थेभ्यश्च' ।

तात = पूज्य । 'पुत्रे पितरि पूज्ये च तात-शब्दः प्रयुज्यते' ।

पौर्वापर्य्यम्—पूर्वं च अपरं च इति पूर्वापरे, ते एव पौर्व्वापर्य्यम् । पूर्वापर+ष्यञ् —स्वार्थे । [Cf. चतुर्वर्णाः इति चातुर्वर्ण्यम्].

ते—Nom. of ज्ञातम् । The षष्ठी is by the rule 'क्तस्य च वर्त्तमाने' ।

शासितुम्—The root शास is द्विकर्म्मक । The two objects are—(i) माम् (indirect) and (ii) धर्म्मम् (direct).

मुनिभिः तुल्यः धर्म्मः—Dharma becoming the sages. In the sense intended, मुनीनां योग्यः or simply मुनीनाम् would have been a more appropriate expression. In the present expression मुनि is to be taken (by लक्षणा) in the sense of मुनिधर्म्म । Thus, मुनिभिः तुल्यः धर्म्मः = मुनिधर्म्मेण तुल्यः धर्म्मः ।

Ch. of Voice.—पौर्वापर्य्येण ते न ज्ञातेन भूयते (or, त्वं न जानासि) ...अहं...इच्छे ।

N. B. शास् belongs to the दुहादि-class. Hence, the अप्रधान (indirect) object will be उक्त। "अप्रधाने दुहादीनां प्रधाने नी-ह्र-कृष्-वहाम्"।

Questions. पौर्वापर्य्यम्—S, M and D. ते—C. मुनिभिस्त्वं धर्म्मम्—comment on the expression.

Hence, your speech is destined to be useless.

अविज्ञात-प्रबन्धस्य वचो वाचस्पतेरपि ।
व्रजत्यफलतामेव नयद्रुह इवेहितम् ॥ ४३ ॥

Eng. Equiv. वाचस्पति—the lord of speech. नयद्रुह्—one who violates policy. ईहित—activity.

Prose.—अविज्ञात-प्रबन्धस्य वाचस्पतेरपि वचः, नयद्रुहः ईहितम् इव अफलतां व्रजति एव । ४३ ।

Bengali.—স্বয়ং বৃহস্পতিও যদি পূর্ব্বাপর ব্যাপার না জানিয়া কোনও কথা বলেন তাহা, নীতিবিরুদ্ধকারী ব্যক্তির উদ্যমের ন্যায়, নিষ্ফল হইবেই । ৪৩ ।

English.—The words uttered even by Brihaspati himself without knowing the full history, become certainly useless like the activities of one who violates [right] policy. 43.

Ghantapatha.—अथ पौर्वापर्य्यम् अज्ञात्वा अपि उपदेशे दोषमाह—अविज्ञातेति । 'अविज्ञातः' 'प्रबन्धः' पूर्वापरसङ्गतिः येन तस्य 'वाचस्पतेः' बृहस्पतेः अपि । [कस्कादित्वात् सः, अथवा "षष्ठ्याः पति-पुत्र-पृष्ठ-पार-पद-पयस्पोषेषु" इति सकारः ; एतस्मादेव ज्ञापकात् अलुक् इति केचित् (1) ।] 'वचः' उपदेशो 'नयद्रुहः' नीतिविरुद्धकारिणः पुरुषस्य 'ईहितम्' उद्योग 'इव' 'अफलतां' निष्फलत्वं 'व्रजत्येव' गच्छत्येव ॥ ४३ ॥

Malli. Explained.

1. कस्कादित्वात् सः &c.—In वाचस्पति (वाचः + पतिः) the स is by the rule, 'कस्कादिषु च' । Or, according to some, the सकार may be due to the rule 'षष्ठ्याः पतिपुत्र &c.' and the अलुक् [of the विभक्ति] is due to the above rule which serves as a ज्ञापक (indicator) [viz. of अलुक्].

The rule 'षष्ठ्याः पति-पुत्र &c.' means—The विसर्ग of षष्ठी विभक्ति [is changed into स] when the words पति, पुत्र, पृष्ठ, पार, पद, पयस् and पोष follow. This *indicates* that the षष्ठी विभक्ति is *not* elided.

Notes.

अविज्ञात-प्रबन्धस्य—अविज्ञात: प्रबन्ध: येन स:—बहुव्रीहि:, तस्य । The क्त in अविज्ञात is in the past tense ; hence the nom. येन is in ३या instead of ६ष्ठी ।

वाचस्पते:—वाच: (=वाक्यस्य) पति:—६तत् । Declined like मुनि and not like पति । The rule is 'पति: समासे एव' ।

Two points are to be noted in the formation of the word वाचस्पति :—(i) The ६ष्ठी has अलुक्, and (ii) the विसर्ग has been changed into स ।

For advanced students only :—

As to अलुक्—

(i) Malli.'s view seems to be that the word belongs to the कस्कादि group which is an आकृतिगण, and the word being recognised, the अलुक also in the compound must necessarily be admitted. [But it should be borne in mind that the कस्कादि group deals not only with *compounds* but also with *non*-compounds. In fact, कस्क: itself (=क: क:) is not a compound.

(ii) The अलुक् has therefore been explained by others (viz. Bhattoji, Haradatta, &c.) by the rule 'तत्पुरुषे कृति बहुलम्' where the use of the word बहुलम् gives *every* facility that may be required. The अलुक् will take place here although the case is not one of कृत् and of ७मी विभक्ति ।

[N. B. बहुलम् is of four kinds :—

(i) क्वचित् प्रवृत्ति:, (ii) क्वचिदप्रवृत्ति:, (iii) क्वचिद्विभाषा, (iv) क्वचिदन्यदेव ।

(i) Application, (ii) non-application. (iii) optional application, and (iv) violation—of the rule.]

As to स-त्व—

(i) The easiest course is to refer to the rule 'कस्कादिषु च' ।

(ii) Some refer to the rule 'पारस्कर-प्रभृतीनि च संज्ञायाम्' which makes it वाचस्पति। The विसर्ग is then optionally elided by the rule 'खर्परे शरि वा विसर्गलोपो वक्तव्यः'।

(iii) Some, again, propose to stretch the application of the Vedic rule 'षष्ठ्याः पति-पुत्र &c.' to लौकिक use also and account for the सत्व in वाचस्पति, &c., by that rule.

In other words, वाचस्पति is a वैदिक word and has gradually crept into the लौकिक vocabulary like some other वैदिक words as प्रभविष्णु, परिपन्थिन्, &c.

नयद्रुहः—नयाय द्रुह्यति इति नयध्रुक्, तस्य। नय – द्रुह् + क्विप्—कर्त्तरि by the rule 'सत्-सू-द्विष &c.' Declension :—ध्रुक्, ध्रुट्; द्रुहौ; द्रुहः। द्रुहम्; द्रुहौ; द्रुहः। द्रुहा; ध्रुग्भ्याम्, ध्रुड्भ्याम्; ध्रुग्भिः, ध्रुड्भिः। ध्रुक्षु; ध्रुट्त्सु। &c. The root द्रुह् governs the 4th case-ending by the rule 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः'।

ईहितम्—ईह + क्त – भावे। 'ईह चेष्टायाम्' इति धातुः।

Ch. of Voice.—...वचसा, ईहितेन इव अफलता व्रज्यते।

Questions. वाचस्पतेः—Expl. formation and decline. नयद्रुहः—D and expound.

Your advice is misplaced.

श्रेयसोऽप्यस्य ते तात! वचसो नास्मि भाजनम्।
नभसः स्फुटतारस्य रात्रेरिव विपर्ययः ॥४४॥

Eng. Equiv. भाजन—object. रात्रेः विपर्ययः—the opposite of night; i. e. day.

Prose.—तात, श्रेयसोऽपि अस्य ते वचसः, रात्रेः विपर्ययः (= दिवसः) स्फुटतारस्य नभसः इव, भाजनं न अस्मि ॥ ४४ ॥

Bengali.—মহাশয়, দিবস যেরূপ তারকাযুক্ত আকাশের পাত্র নহে, আমিও সেইরূপ আপনার এই হিতকর বাক্যের পাত্র নহি ॥ ৪৪ ॥

English.—Sir, I am not an object of these salutary words of yours, even as day is not the object of a starry sky. 44.

Gantapatha.—ननु सदुपदेशस्य कुतो वैफल्यम् इत्याशङ्क्य सोऽपि अस्मामि प्रत्युप्तश्चेत् ऊषरक्षेत्रे शालिबीजवत् (1) विफल एव इत्याशयेनाह—

श्रेयस इति। हे 'तात'! "पुत्रे पितरि पूज्ये च तातशब्दं प्रचक्षते" इति। 'श्रेयसोऽपि' हितार्थयोगात् प्रशस्ततरस्य अपि 'अस्य' 'ते' तव 'वचसो' हितोपदेशरूपस्य, 'रात्रेः विपर्य्ययो' दिवसः 'स्फुटतारस्य' व्यक्ततारकस्य 'नभसः' 'इव' 'भाजनं' पात्रं 'न अस्मि' अनधिकारित्वात् इति भावः। अत्र अह्नो नभोमात्रसम्बन्धसम्भवेऽपि तारासम्बन्धासम्भवात् तद्विशिष्टनभःसम्बन्धविरोधाद् युक्तं तारकितस्य नभसो न पात्रमहः इति (2) ॥ ४४ ॥

Malli. Explained.

1. ऊषरक्षेत्रे शालिबीजवत्—Like seeds of paddy on a barren land.

2. अत्र अह्नः &c.—Although day may have connection with sky, it can have no connection with stars and therefore with a starry sky, and hence it has been rightly said here that day **is** not the object of a starry sky.

Notes.

तात—See Sl. 42.

भाजनम्—Always neuter—अजहल्लिङ्गम् (न जहत् + लिङ्गम्, i. e. स्वकीयं लिङ्गं न जहाति)।

स्फुटतारस्य—स्फुटाः ताराः यस्य तत् स्फुटतारम्—बहुव्रीहिः, तस्य। Adj. to नभसः।

रात्रेः विपर्य्ययः—The opposite of night, i. e. day. This is a periphrasis for दिवसः।

Ch. of Voice.—...विपर्य्ययेण...भाजनेन न भूयेः।

Questions. तात—M. रात्रेरिव विपर्य्ययः—Expl. अत्र अह्नः......न पात्रमहः (Malli)—Translate into English.

Arjuna's history:

I am Arjuna, son of Pa'ndu, a Kshattriya by caste; &c. &c.

क्षत्रियस्तनयः पाण्डोरहं पार्थो धनञ्जयः।
स्थितः प्रास्तस्य दायादैर्भ्रातुर्ज्येष्ठस्य शासने॥४५॥

Eng. Equiv. प्रास्त—expelled; ousted. दायाद—kinsman.

Prose.—अहं क्षत्रियः पाण्डोः तनयः पार्थः धनञ्जयः, दायादैः (= ज्ञातिभिः) प्रास्तस्य (= निरस्तस्य) ज्येष्ठस्य भ्रातुः शासने स्थितः।

Bengali.—আমি ক্ষত্রিয়-কুলোৎপন্ন, পাণ্ডু ও কুন্তীর পুত্র, ধনঞ্জয়—জ্ঞাতিগণ কর্ত্তৃক নিরস্ত জ্যেষ্ঠ ভ্রাতার আদেশে বর্ত্তমান আছি (অর্থাৎ তাঁহারই আদেশে তপস্যা করিতেছি) ॥ ৪৫ ॥

English.—I am a Kshattriya—son of Pa'ndu and Pritha' (Kunti'), and Dhananjaya by name—at the command of my eldest brother ousted by the kinsmen. 45.

Elucidation.—I am not a peaceful Brahmin-hermit but a fiery Kshattriya born of worthy parents. I am the same person who only the other day earned a fabulously large mass of wealth by conquering the Uttara-Kurus and obtained the significant name Dhananjaya. I have preferred to be entirely at the command of my eldest brother who, being deprived of his kingdom by the kinsmen, asks me to practise austerities [for the purpose of earning some weapons with which we might oust the enemy]. I am thus practising austerities not as an all-bearing recluse but as a regular house-holder with the clear object of achieving some particular end.

Ghantapatha. ज्ञातस्ते मोक्षोपदेशानधिकारित्वम्, किन्तु ते तपसः पौर्वापर्य्यम् इत्यपेक्षायाम् (क) तत्सर्वं स्वजात्यादिकथनपूर्वकं निरूपयति (1)—क्षत्रिय इति। 'अहं' 'क्षत्रियः' क्षत्रियकुले जातः। तत्रापि महाकुले प्रसूतः वीरसन्तानश्च इत्याह—पाण्डोस्तनय इति। तत्रापि कौन्तेयोऽस्मि न माद्रेयः (2) इत्याह—पार्थ इति। 'पृथा' कुन्ती, तत्सुतः 'पार्थः'। "तस्यापत्यम्" इत्यण् (3)। अर्जुनोऽहं महावीरश्च इत्याह—धनञ्जय इति। उत्तरकुरून् विजित्य धनाहरणात् (4) धनञ्जयोऽस्मीत्यर्थः। "खचि मुमागमः" इत्युक्तं प्राक् (ख) (5)। धनञ्जय इत्युक्ते शरीरस्थो वायुः सर्पविशेषो वा स्यात् तदर्थं पार्थः। गन्धर्वोऽपि कश्चित् पृथासुतोऽस्ति तदर्थं पाण्डोः सुतः। नैमिषारण्ये पाण्डुः विप्रः, तत्पत्नी पृथा नाम काचित् ब्राह्मणी, तत्पुत्रोऽपि स्यात् तदर्थं क्षत्रियः

(क) For पौर्वापर्य्यम् &c., J reads—पौर्वापर्य्यं कथं न जाने इत्याशङ्क्य। G reads ज्ञातः for जाने। A makes a confusion of the two readings.

(ख) खचि मुमागमः &c.—Omitted in J.

इति (6)। अथ एवं चेत् किमर्थं तर्हि तपस्यसि, मोक्षार्थं वा किं न तपस्यसि तत्राह—स्थित इति। 'दायं' पैतृकं धनम् आददते इति 'दायादाः' ज्ञातयः। "दायादौ ज्ञातिपुत्रयोः" इति। "विभक्तव्यं पितृद्रव्यं (क) दायमाहुर्मनीषिणः" इति च विश्वः (7)। स्वामीश्वरादिसूत्रे ण सोपसर्गादपि दायादेति क-प्रत्ययान्तो निपातनात् माधः (8)। तैः 'प्राप्तस्य' राज्यात् निरस्तस्य वैरिनिर्यातनार्थिनं इत्यर्थः। 'ज्येष्ठस्य भ्रातुः' युधिष्ठिरस्य। वृद्धशब्दादिष्ठन्प्रत्ययः, वृद्धस्य च ज्यादेशः। 'शासने' निदेशे 'स्थितः'—तदाज्ञया तपस्यामि इत्यर्थः। अन्यथा मानहानिः सौभ्रात्रभङ्गः पूज्यपूजा-व्यतिक्रमदोषश्च स्यादिति भावः (ग) (9)। अत एव हिंसैकरसस्य रागद्वेष-कषायितचेतसः कुतो मे मोक्षाधिकार इति तात्पर्य्यम् (10)। साभिप्रायविशेषणत्वात् परिकरालङ्कारः (11) ॥ ४५ ॥

Malli. Explained.

1. स्वजात्यादि कथनपूर्वकं &c.—Sets forth after having stated his own birth, &c.

2. तत्रापि &c.—In that matter, too, I am son of **Kunti** and not of Mádri. [That is, I am a son of Pándu but **I** was born not in the womb of the less famous Mádri but of the great Kunti].

3. तस्यापत्यम् &c.—पार्थः = पृथा + अण् by the rule 'तस्य अपत्यम्'।

4. उत्तर-कुरुन् &c.—On account of my earning money by conquering the Northern Kurus (probably North Siberia).

5. खचि मुमागमः &c.—The word धनञ्जयः is with the affix खच् and with the augment मुम् ;—this has already been said (viz. under sloka 35, Canto I).

6. धनञ्जयः—&c.—The simple word धनञ्जयः might also mean a particular physical wind, or a particular serpent, so he adds पार्थः ; one of the गन्धर्वs was a son of पृथा, hence [i. e. to exclude him] he adds पाण्डोः सुतः ; in नैमिषारण्य there was a पाण्डु, a Brahmin by caste, whose wife was by the name of पृथा, hence, he adds क्षत्रियः।

(क) B reads—विभक्तपितृद्रव्यं च।

7. विभक्तव्यं &c.—The paternal wealth which is to be distributed [amongst the brothers] is called दाय by the learned.—This also (like the previous one on दायाद) is from the lexicon विश्व ।

8. स्वामीश्वराधिपति &c.—दायाद is derived as दाय – आ – दा + क—कर्त्तरि । The rule is 'आत: अनुपसर्गे क:' । But in दायाद there is the उपसर्ग – आ । However, this is sanctioned in निपातन as the word दायाद occurs in one of Pánini's own rules, viz. 'स्वामीश्वराधिपति-दायाद &c.' [Had दायाद been an ungrammatical form Pánini himself would not have used it].

9. अन्यथा &c.—Otherwise (i.e. if he did not obey his eldest brother), the respect [of his eldest brother] would be wounded, the cordial fraternity would be affected, and there would be a fault in the violation of showing respects to one to whom respect was due.

10. अत:—Thus, how can I, who am being actuated by हिंसा (injury) and whose mind is tinged (i.e. affected) with attachment and aversion, be entitled to salvation (मोक्ष) ?—This is the intended sense.

11. साभिप्रायविशेषणत्वात् &c.—The adjectives used being significant the fig. of speech is परिकर । [The definition is—'विशेषणैर्यत् साकूतैरुक्तिः परिकरस्तु स:'] । N. B. साकूतै: – साभिप्रायै: ; significant.

Notes.

क्षत्रिय:—क्षण् + क्विप् – भावे इति क्षत् ; wound. क्षत: त्रायते इति क्षत्त्र: । क्षत्त्रस्य अपत्यं पुमान् इति क्षत्त्रिय: । क्षत्त्र + घ by the rule 'क्षत्त्राद् घ:' । Also spelt with a single त्—पृषोदरादित्वात् ।

पार्थ:—पृथाया: अपत्यं पुमान् इति पार्थ: । पृथा + अण् । पृथा was a name of कुन्ती ।

धनञ्जय: – धनं जयति इति धन – जि + खच् = कर्त्तरि by the rule 'संज्ञायां

भृ-तृ-वृ-जि" &c. मुम् (= म्) is the augment by the rule 'अरुर्द्विषदजन्तस्य मुम्'। The history of the name is as follows :—

जित्वा च सकलान्सर्वान् वित्तमादाय केवलम्।
मध्ये धनस्य तिष्ठामि तेनाहुर्मां धनञ्जयम्॥—Mahá-Bhárata.

cf. 'विजित्य यः प्राज्यमयच्छदुत्तरान्
कुरूनकुप्यं वसु वासवोपमः'।—Kiráta I. 35.

प्रास्तस्य—प्र – अस् + क्त—कर्मणि इति प्रास्तः, तस्य। Adj. to भ्रातुः। 'असु क्षेपणे' इति धातुः।

दायादैः—दायम् आददते इति दायादाः। दाय – आङ् – दा + क – कर्त्तरि। [आददते is plural of आदत्ते].

ज्येष्ठस्य—प्रशस्य + इष्ठन् = ज्येष्ठः (or श्रेष्ठः), तस्य।

Rhetoric.—Most of the adjectives used in the sloka are *significant*. Hence, the fig. of speech is परिकर।

Ch. of Voice.—मया क्षत्रियेण पाण्डोस्तनयेन पार्थेन धनञ्जयेन...स्थितेन [भूयते]।

Questions. क्षत्रियः, पाण्डोः सुतः, पार्थः, धनञ्जय—Expl. the significance of these words. प्रास्तस्य—D and M. दायादैः—D and note the peculiarity. ज्येष्ठस्य—D.

I am observing the present vow in honour of Indra.

कृष्णद्वैपायनादेशाद् बिभर्मि व्रतमीदृशम्।
भृशमाराधने यत्तः स्वाराध्यस्य मरुत्वतः॥४६॥

Eng. Equiv. यत्त—one who is exerting himself. स्वाराध्य—one who is capable of being easily worshipped. मरुत्वत्—(Name of Indra).

Prose.—कृष्णद्वैपायनादेशात् ईदृशं व्रतं बिभर्मि। स्वाराध्यस्य मरुत्वतः आराधने भृशं यत्तः [अस्मि]। ४६।

N. B. If the second half is taken as an adjective to the first, then there will be a rhetorical defect called समाप्त-पुनरात्तता।

Bengali.—[মহর্ষি] কৃষ্ণ দ্বৈপায়নের আদেশে আমি এইরূপ [বিরুদ্ধ বেষবিশিষ্ট] ব্রত ধারণ করিয়াছি এবং সুখারাধনযোগ্য ইন্দ্রের সম্যক্ আরাধনায় যত্নবান আছি ॥ ৪৬ ॥

English.—Under instructions from Krishna-Dwaipa'yana I am observing this vow, and I am deeply engaged in the worship of god Marutwat (Indra) who is easily worshipped. 46.

Ghantapatha.—यदुक्तम् "विरुद्धः केवलं वेषः" इति तत्रोत्तरम् आह (1) —कृष्णेति। द्वीपः 'अयनं' जन्मभूमिः यस्य स द्वीपायनः, स एव द्वैपायनः—व्यासः। प्रज्ञादित्वात् स्वार्थे अण् प्रत्ययः। स एव कृष्णवर्णत्वात् 'कृष्णद्वैपायनः' (2) च। तस्य 'आदेशात्' उपदेशात् 'ईदृशं' विरुद्धवेषम् इत्यर्थः (3) 'व्रतं' तपोनियमं 'बिभर्मि' धारयामि, न तु स्वेच्छया इति भावः। अथ उपास्यां देवतामाह—भृशमिति। 'स्वाराध्यस्य' सुखम् आराध्यस्य,—प्रादिसमासः (4)। "स्वाराधस्य" इति पाठे उपसृष्टात् खल्प्रत्ययः (5)। 'मरुत्वतः' इन्द्रस्य। 'भृशं' सम्यक् 'आराधने' 'यत्तः' प्रयत्नवान्, इत्यर्थः ; तस्य क्षत्रियदैवतत्वात् (6) इति भावः॥ ४६ ॥

Malli. Explained.

1. यदुक्तम् &c.—To the statement 'विरुद्धः केवलं वेषः' (sl. 14) he replies.

2. द्वीपः &c.—द्वीपायन means one who has a द्वीप (island) as his birth place (अयन) ; द्वीपायन + अण् = द्वैपायनः—स्वार्थे। The स्वार्थिक affix अण् is by the rule 'प्रज्ञादिभ्यश्च' ; [Thus, प्रज्ञः एव इति प्राज्ञः, द्वीपायनः एव इति द्वैपायनः। The प्रज्ञादि class is regarded by commentators as an आकृतिगण].

3. विरुद्धवेषम् इत्यर्थः—विरुद्धः वेषः यत्र (बहुव्रीहिः) तत् व्रतं विरुद्धवेषम्।

4. स्वाराध्यस्य—सु (= सुखम्) आराध्यः इति स्वाराध्यः—प्रादिः। तस्य। If the reading is स्वाराधस्य then the exposition is—सु (= सुष्ठु) आ (= सम्यक्) राध्यते इति स्वाराधः, तस्य। सु – आ – राध् + खल्—कर्म्मणि [like सुलभ, सुगम, &c.].

6. तस्य क्षत्रियदैवतत्वात्—Because he (Indra) is a Kshattriya god. N. B. There is caste-distinction even among gods. Thus, Brahma is a Bráhmana, Indra (and other आदित्यs) are Kshattriyas, मरुत्s are वैश्यs, and so on. [See महाभारत, शान्ति, 208]. For a Kshattriya, the best deity to be worshipped was of course a Kshattriya deity.

Notes.

कृष्णद्वैपायनादेशात्—द्वीपः अयनं यस्य स द्वीपायनः—बहुव्रीहिः, द्वीपायन एव इति द्वैपायनः। द्वीपायन+अण्—स्वार्थे। कृष्णः द्वैपायनः—कर्म्मधा, तस्य आदेशः, तस्मात्। हेतौ ल्यब्लोपे वा ५मी। Vyása was called द्वैपायन because he was born in an island. He was of a dark complexion; hence he was called कृष्ण-द्वैपायन।

बिभर्मि—भृ+लट् मि। The बि here is a reduplication of the root, and not an उपसर्ग।

ईदृशम्=विरुद्धवेषम् (adj. to व्रतम्)।

यत्तः—यत्+क्त–कर्त्तरि।

स्वाराध्यस्य—सु+आराध्यस्य। If the reading is स्वाराधस्य the exposition is—सु–आ–राध्+खल्–कर्म्मणि।

मरुत्वतः—मरुतः (=देवाः) सन्ति अस्य सेवकत्वेन इति मरुत्वान् (=इन्द्रः), तस्य। मरुत्+मतुप्। The म of मतुप् is changed into व by the rule 'झयः'।

Ch. of Voice.—ईदृशं व्रतम् (१मा) भ्रियते। यत्तेन [भूयते]।

Questions. कृष्ण-द्वैपायन—Expl. the name. ईदृशम्—Expl. यत्तः—D. मरुत्वतः—D. Why was that god specially chosen for worship by Arjuna? (Ans.—see Malli. Expl. 6).

The king lost us as well as his own self at a dice-play.

दुरक्षान् दीव्यता राज्ञा राज्यमात्मा वयं वधूः।
नीतानि पणतां नूनमीदृशी भवितव्यता ॥४७॥

Eng. Equiv. दुरक्ष—foul game at dice. दीव्यत्—one who is playing. पण—stake; bet; wager. भवितव्यता—inevitable fate.

Prose.—दुरक्षान् दीव्यता राज्ञा राज्यम् आत्मा वयं वधूः पणतां नीतानि। ईदृशी भवितव्यता नूनम्। ४७।

Bengali.—কপট পাশায় খেলিয়া রাজা যুধিষ্ঠির রাজ্যকে, নিজকে, আমাদিগকে এবং তাঁহার স্ত্রীকে হারিয়াছেন। নিশ্চয়ই এইরূপ ভবিতব্যতা ছিল। ৪৭।

English.—At a foul game at dice the king lost his kingdom, his own self, his wife and us Certainly such was the inevitable fate. 47.

Ghantapatha.—ननु भवादृशभ्रातृसहायस्य महावीरस्य युधिष्ठिरस्य कथम् अरि-परिभव-प्राप्तिः इत्यत आह—दुरक्षानिति। 'दुरक्षान्' कपटपाशकैः इत्यर्थः। "दिवः कर्म्म च" इति करणे कर्म्मसंज्ञा (1)। 'दीव्यता' क्रीड़ता। "आहूतो न निवर्त्तेत द्यूतादपि रणादपि" इति शास्त्रात्; न तु व्यसनितया इति भावः (2)। 'राज्ञा' युधिष्ठिरेण 'राज्यं' राष्ट्रम् 'आत्मा' स्वयं 'वयं' चत्वारोऽनुजाः 'वधूः' जाया द्रौपदी च 'पणतां' ग्लहत्वम्। "पणोऽक्षेषु ग्लहोऽक्षास्तु देवनाः पाशकाश्च ते" (3) इत्यमरः। 'नीतानि',—सर्वे द्यूते राज्ञा हारितम् इत्यर्थः। नीतानीति नपुंसकैकशेषः (4)। नयतेर्द्विकर्म्मकत्वात् प्रधाने कर्म्मणि क्तः (5)। ननु सर्वज्ञस्य राज्ञः कथमियम् अविमृष्य-कारिता? तत्राह।—'भवितव्यता' अनर्थानाम् अवश्यम्भाविता 'ईदृशी' 'नूनं' निश्चितं, नात्र संशय इत्यर्थः। बुद्धिरपि भवितव्यतानुसारिणीव, न स्वतन्त्रा इत्यर्थः (6) ॥४७॥

Malli. Explained.

1. दिवः कर्म्म च &c.—In दुरक्षान् दीव्यता the word दुरक्ष has been put as the object by the rule 'दिवः कर्म्म च' [meaning—the करण of the root दिव् is used as the object also. Thus, अक्षैः दीव्यति or अक्षान् दीव्यति]।

2. आहूतः &c.—'When challenged in a battle or in a dice-play a Kshattriya should not back out.' [It was on account of this Shástra] and not on account of his vicious habit [that Yudhishthira played at dice.]

8. पणोऽक्षेषु &c.—ग्लह means अक्षेषु पणः; and अक्ष, देवन and पाशक are synonyms.

4. नीतानीति &c.—In नीतानि the neuter gender is the resultant survival. [राज्यं नीतं, आत्मा नीतः, वयं नीताः, वधूः नीता, तानि इमानि नीतानि, or तद् इदं नीतम्। The rule is—'नपुंसकम् अनपुंसकेन एकवत् च अस्य अन्यतरस्याम्']।

5. नयतेर्द्विकर्म्मकत्वात् &c. The root नी being द्विकर्म्मक, the

affix क्त speaks of the प्रधान-कर्म्म (i.e. the प्रधानकर्म्म becomes उक्त). [The dictum is—

प्रधान-कर्म्मण्याख्येये लादीनाहुर्द्वि कर्म्मणाम् ।
अप्रधाने दुहादीनां ण्यन्ते कर्त्तुश्च कर्म्मणः ॥].

6. बुद्धिरपि &c.—The intellect follows the inevitable fate ; it does not run independently. This is the sense.

Notes.

दुरचान्—दुष्टाः अक्षाः इति दुरक्षाः—प्रादिः । तान् । Obj. of दीव्यता । Opt. from—दुरक्षैः । The rule is—'दिवः कर्म्म च' ।

दीव्यता—दिव् + शतृ, श्यन् १ व । Adj. to राज्ञा ।

पणतां नीतानि—Or पणतां नीतम् । नीतं च नीतश्च नीता च इति—नीतानि or नीतम् by एकशेष । See Malli. Expl. 4.

भवितव्यता—भू + तव्य (भावे) = भवितव्यम्, तस्य भावः इति भवितव्यता ।

ईदृशी भवितव्यता—Cf. 'सर्व्वङ्कषा भगवती भवितव्यतैव'—Málati-Mádhava ; 'भवितव्यतेयमीदृशी'—S'akuntalá ;

Also cf. 'अवश्यम्भाविनो भावाः प्रतिकर्त्तुं क्षमा यदि ।
तदा दुःखै र्न लिप्यन्ते नल-राम-युधिष्ठिराः' ॥

Ch. of Voice.—...दीव्यन् राजा राज्यम् आत्मानम् भ्रातॄन् वधूं पणतां नीतवान् । ...ईदृश्या भवितव्यतया [अभूयत] ।

Questions. दुरक्षान्—Comment on the case-endings. पणतां नीतानि—Acc. for the neuter gender, and give opt. form. भवितव्यता—M.

My brothers and wife at home are pining for me.

तेनानुज-सहायेन द्रौपद्या च मया विना ।
भृशमायामि-यामासु यामिनीष्वभितप्यते ॥४८॥

Eng. Equiv. आयामि-यामा—(fem.) of which the hours are long. यामिनी—night.

Prose.—अनुज-सहायेन तेन द्रौपद्या च मया विना भृशम् आयामियामासु यामिनीषु अभितप्यते । ४८ ।

Bengali.—তিনি ও তাঁহার অনুজগণ এবং দ্রৌপদী আমার বিরহে অতিদীর্ঘপ্রহরযুক্তা রাত্রিতে অভিতপ্ত হইতেছেন । ৪৮ ।

English.—He, with his young brothers and Draupadi', in my separation, is feeling pain at night the periods of which seem to them very lengthy. 48.

Ghantapatha.—ननु तथापि तव एव तेषु आसङ्गो न तेषां त्वयि, तत्राह (1)—तेनेति। 'अनुजाः' 'सहायाः' यस्य तेन अनुजयुक्तेन इत्यर्थः। तुल्ययोगः सहायार्थः, (2) 'तेन' युधिष्ठिरेण 'द्रौपद्या च' 'मया विना' मद्विरहात् इत्यर्थः। 'भृशम्' 'आयामिनो' दीर्घाः 'यामाः' प्रहाराः यासां ताः, तासु। दुःखितस्य तथा भावात् (3) इति भावः। 'यामिनीषु' 'अभितप्यते'—भावे लट् (4)। तेषु मद्वत्, तेषाम् मय्यपि आसङ्गात् न वैराग्यावकाशः (5) इत्यर्थः ॥४८॥

Malli. Explained.

1. ननु तथापि &c.—Well, still you are attached to them, but not they to you. To this he says—.

2. तुल्ययोगः सहायार्थः—Here the sense of सहाय is तुल्ययोग (participation). [That is, Yudhishthira felt pain and his brothers participated with him. That is, Yudhishthira *and* his brothers felt pain].

4. दुःखितस्य तथा भावात्—Because, for a suffering person, the periods seem to be so (lengthy).

4. भावे लट्—अभितप्यते is in लट् in भाववाच्य। [Hence the य]।

5. तेषु मद्वत् &c.—They being attached to me as I am to them, there is no ground for my indifference.

Notes.

तेन = युधिष्ठिरेण। Nom. of अभितप्यते (which is in भाववाच्य).

अनुजसहायेन—अनु जायन्ते ये ते अनुजाः – उपपद-समासः। अनुजाः सहायाः यस्य – बहुव्रीहिः, तेन। Adj. to तेन।

द्रौपद्या—Nom. of अभितप्यते।

मया—'विना' शब्दयोगेन तृया।

आयामि-यामासु—आयाम means 'length'. आयामिनः is in plural of आयामिन् (आयाम + इनि); याम means 'प्रहर' (a period roughly equivalent to 3 hours). आयामिनः (long) यामाः (periods) यासां ताः आयामि-यामाः—बहुव्रीहिः, तासु। Adj. to यामिनीषु। Time, specially

the nigh-time, seems to be tiresome, and therefore lengthy, to one who is in suffering. Cf. 'गमयति रजनीं विषाद-दीर्घतराम्'—S'akuntalá.

अभितप्यते—अभि – तप + लट् ते – भावे । In कर्त्तृवाच्य the conjugation is—तपति, &c.

Ch of Voice.—अनुजसहाय: स: द्रौपदी च...अभितपति ।

Question.—Ch. the voice. आयामियामास् यामिनीषु—Expl.

Our enemies subjected us to great humiliations.

हृतोत्तरीयान् प्रसभं सभायामागतह्रियः ।
मर्मच्छिदा नो वचसा निरतक्षन्नरातयः ॥४८॥

Eng. Equiv. उत्तरीय—upper garment. प्रसभम्—perforce. आगतह्रिय: (plural)—ashamed. निरतक्षन्—[they] cut. अरातय:—enemies.

Prose.—अरातय: सभायां प्रसभं हृतोत्तरीयान् आगतह्रिय: न: मर्म्मच्छिदा वचसा निरतक्षन् । ४९ ।

Bengali.—সভাতে বলপূর্ব্বক হৃতবস্ত্র লজ্জাপ্রাপ্ত আমাদিগকে শত্রুগণ মর্ম্মচ্ছেদক বচনদ্বারা বাণিত করিয়াছিল ॥ ৪৯ ॥

English.—The enemies, with words touching our vital parts, cut us to the quick who were forcibly deprived of our clothes in the assembly and were therefore ashamed. 49.

Ghantapatha.—अथ वैरनिर्य्यातनस्य अवश्यम्भाव-द्योतनाय सतर्भि: पर-निकारान् वर्णयति (1)—हृतेत्यादि । 'अरातय:' शत्रव: 'सभायां' 'प्रसभं' बलात्कारेण 'हृतोत्तरीयान्' अतएव 'आगतह्रिय:' सम्प्राप्तलज्जान् । 'न:' अस्मान् 'मर्म्मच्छिदा' मर्म्मच्छेदिना 'वचसा' निरतक्षन्, अशातयन् । वस्त्राद्यपहारवाक्पारुष्याभ्यां (2) तथा व्यथयामासुरित्यर्थ: । तक्षणनाच्छसामर्थ्यात् वचसो वास्यौपम्यं (क) गम्यते इति वस्तुना अलङ्कारध्वनि: (3) ॥४९॥

Malli. Explained.

1. अथ &c.—Now, to indicate the certainly of revenging on the enemy he describes the insult by the enemy.

(क) J reads—वचसां वा अस्य औपम्यम् which is evidently due to a wrong exposition of the Sandhi in वास्यौपम्यम् ।

2. वस्त्राद्यपहार &c.—By taking off the clothes, &c., and by harsh words.

3. तक्षणशब्दसामर्थ्यात् &c.—On the strength of the word तक्षण (rather the root तक्ष) the comparison of words to a chisel (वासी) is indicated. Thus, there is a ध्वनि (suggestion) of an अलङ्कार (viz. उपमा) by the statement of a fact (वस्तु).

Notes.

हृतोत्तरीयान्—हृतम् उत्तरीयं येषां or येभ्यः ते हृतोत्तरीयाः—बहुव्रीहिः, तान्। Adj. to नः।

प्रसभम्—अव्ययम्।

सभायाम्—It is curious to note that, in addition to the ordinary meaning, सभा means also a gambling-house.

आगतह्रियः—आगता ह्रीः यैः ते – बहुव्रीहिः तान्। Adj. to नः।

मर्म्मच्छिदा—३या १व of मर्म्मच्छिद्। मर्म्म छिनत्ति यत् यत् – उपपद, तेन। Adj to वचसा। मर्म्म – छिद् + क्विप् – कर्त्तरि। The word मर्म्मन् is neuter.

वचसा—करणे ३या।

निरतक्षन्—निर् – तक्ष + लङ् अन्। 'तक्ष तनूकरणे' इति धातुः। तनूकरण means 'to chisel,' 'to cut'. The root is भ्वादि, but also स्वादि when actual 'chiselling' is meant. Rule—'तनूकरणे तक्षः'। Here, used in the secondary sense, the root is only भ्वादि।

वचसा निरतक्षन्—Here the words are evidently compared to a chisel (वासी).

Ch. of Voice.—अरातिभिः......हृतोत्तरीयाः आगतह्रियः वयम्... निरतक्ष्यामहि।

Questions. वचसा निरतक्षन्—Expl.

'The outrage on Draupadi' was the most offensive,

उपाधत्त सपत्नेषु कृष्णाया गुरुसन्निधौ।
भावमानयने सत्याः सत्यङ्कारमिवान्तकः॥५०॥

Eng. Equiv. उपाधत्त—placed. सपत्न—enemy. भाव—idea. सती—chaste. सत्यङ्कार—earnest money; advance. अन्तक—the god of death.

Prose.—अन्तकः गुरुसन्निधौ सत्याः कृष्णायाः आनयने भावं सत्यङ्कारम् इव सपत्नेषु उपाधत्त । ५० ।

Bengali.—ভীষ্মদ্রোণাদি গুরুজনের সমক্ষে পতিব্রতা দ্রৌপদীর আকর্ষণের অভিপ্রায়কে অগ্রিম মূল্যের ন্যায় যম আমাদের শত্রুগণে স্থাপিত করিয়াছিলেন ॥ ৫০ ॥

English.—Yama placed, in [the minds of] our enemies, the idea of outraging the caste Draupadi' before the superiors like an earnest money [for their purchase].

Elucidation.—The most offensive outrage made by the enemies was on Draupadi who was brutally dragged to the court before the eyes of such venerable persons as Bhishma, Drona and others. The said outrage must have sowed the seed of their own destruction. Yama roused in the minds of the wicked Duryodhana and Duhs´ásana the idea of outraging Draupadi's modesty and the said idea was like unto an earnest money paid by Yama for purchasing the wicked princes and carrying them to his own land. By the mean and inhuman outrage they invited their own ruin.

Ghantapatha.—अथ अतिदुःसहनिकारान्तरमाह—उपाधत्तेति । 'अन्तकः' मृत्युः 'गुरुसन्निधौ' भीष्मद्रोणादिसमक्षम् एव 'सत्याः' पतिव्रतायाः 'कृष्णायाः' द्रौपद्याः 'आनयने' केशाम्बरादिकर्षणे 'भावं' चित्ताभिप्रायम्—इतः परम् अनेन पाण्डवाभिभवेन एतान् स्वनगरं नेष्यामि इति एवम्भूतं—'सत्यङ्कारम्' 'इव' । क्रियतेऽनेन इति कारः ; करणे घञ् ; सत्यस्य कारः 'सत्यङ्कारः' सत्यापनं, चिकीर्षितस्य कार्य्यस्य अवश्य' क्रियास्थापनार्थं परहस्ते यत् दीयते स सत्यङ्कारः (2) । क्रियादौ सत्यदार्ढ्याय प्राग्दीयमानो मूल्यैकदेशश्च (3) । "क्लीवे सत्यापनं सत्यङ्कारः सत्याकृतिः स्त्रियाम्" इत्यमरः । "कारे सत्यागदस्य" इति मुमागमः (घ) । तम् इव 'सपत्नेषु' 'उपाधत्त' निहितवान् ।—तेषां विनाशकारि विपरीतबुद्धिम् उत्पादितवान् इत्यर्थः ॥ ५० ॥

Malli. Explained.

1. इतः परम् &c.—Now—after this outrage on the Pándavas—I will take these people to my own city ;—this is the form [of contract that Yama made with the wicked princes].

2. विक्रीषितस्य &c.—The money which is made over to the other party as a surety for the fulfilment of the contract. [क्रियास्थापन = क्रिया + आस्थापन। आस्थापन means 'the causing of आस्था'].

3. क्रियार्दौ &c.—A part of the price to be paid in advance for the confirm of the contract.

4. कारे सत्यागदस्य &c.—मुम् (= म्) is the augment after the सत्य and अगद when the कार follows. [Thus, सत्यङ्कार: (earnest money) and अगदङ्कार: (physician).

Notes.

उपाधत्त—उप – आङ् – धा + लङ् त।

सपत्नेषु—७मी बहुवचन of सपत्न। सपत्नी इव इति सपत्न:—निपातनात्। "व्यन् सपत्ने" इति निर्देशात् इकारस्य अकार:। 'रिपौ वैरि-सपत्नारि-द्विषद्द्वेषण-दुर्हृद:"—इत्यमर:।

कृष्णाया:—कृष्णा was a name of Draupadi. She was so called on account of her dark complexion.

गुरुसन्निधौ—The गुरुजनs referred to were Bhishma, Drona and others.

भावम्—भाव here means अभिप्राय। "भाव: सत्तास्वभावाभिप्राय-चेष्टात्म-जन्मसु। क्रिया-लीला-पदार्थेषु विभूति-बुध-जन्तुषु"।—इति मेदिनी।

सत्या:—६ष्ठी १व of सती।

सत्यङ्कारम्—सत्यङ्कार means 'advance money.'

अन्तक:—See sl. 13.

Ch. of Voice.—…अन्तकेन…भाव: सत्याङ्कार: इव…उपाधीयत।

Questions.—Explain the sloka. सत्यङ्कार:- Derive and Expl.

The courtiers could hardly witness the spectacle for long.

तामैक्षन्त क्षणं सभ्या दु:शासन-पुर:सराम्।
अभिसायार्कमावृत्तां छायामिव महातरो: ॥५१॥

Eng. Equiv. अभिसायार्कम्—in the direction of the evening (afternoon) sun. आवृत्त—retreating.

Prose.—दुःशासन-पुरःसरा ता सभ्याः, अभिसायार्कम् आवृत्तां महातरोः छायाम् इव, क्षणम् ऐक्षन्त ।

Bengali.—সভ্যগণ দুঃশাসনের পশ্চাৎ তাঁহাকে দিবাবসান সূর্যের অভিমুখে স্থিত মহাতরুর পরাবৃত্ত ছায়ার ন্যায়, অল্পকাল মাত্র নিরীক্ষণ করিয়াছিলেন (ঘৃণিত দৃশ্য বলিয়া অধিক কাল নিরীক্ষণ করিতে পারেন নাই) ॥ ৫১ ॥

English.—The courtiers for a short time only looked at her behind Duhs'a'sana like the retreating shadow of a great tree facing the sun in the afternoon. 51.

Elucidation—The courtiers, although servants to Duryodhana, could not eye the spectacle for long, so shocking it was. When Draupadi was being dragged to the court by Duhs'asana she turned away her face and thus resembled the retreating shadow of a tree facing the setting sun.

Points of comparison.—दुःशासन and महातरु, द्रौपदी and छाया, सभ्याः and अर्कः ।

Ghantapatha.—कैश्चेयम् आकृष्टा, सभ्यैः वा किं कृतं तत्राह—तामिति । 'दुःशासनः' पुरःसरो यस्याः तां तथोक्तां, दुःशासनेन सभां प्रति आकृष्यमाणाम् इत्यर्थः । "अनुपसर्जनात्" इति न ङीप् (1) । ता कृष्णाम् । सभायां साधवः सभ्याः । "सभाया यः" (2) इति य-प्रत्ययः (क) । 'अभिसायार्कं' दिनान्तसूर्याभिमुखं "स्थितस्य" इति शेषः । "सायो नाश-दिनान्तयोः" (3) इति विश्वः । "लक्षणेनाभिप्रती आभिमुख्ये" (4) इति अव्ययीभावः । 'महातरोः' सम्बन्धिनीम् 'आवृत्ता' 'छायाम् इव' 'तां' कृष्णां 'क्षणम् ऐक्षन्त'—न चिरं, जुगुप्सितत्वात् (5) । नापि किञ्चिद् व्याप्रियन्त, माध्यस्थभङ्गभयात्, तैं त्वर्कवदेव साक्षित्वमात्रम् आस्थितम् इत्यर्थः (6) । अत्र आकृष्यमाणायाः कृष्णायाः आकृष्टारं प्रति पराङ्मुखत्वात् आवृत्तच्छायोपम्यम्, तथापि तां न मुञ्चति इति दुःशासनस्य तद्-साम्यम् (7) ॥ ५१ ॥

Malli. Explained.

1. अनुपसर्जनात् &c.—[पुरःसर being with the affix ट takes ङीप् in fem. giving the form पुरःसरी] but in दुःशासन-पुरःसरा the fem. affix is टाप् (=आ) instead of ङीप् because in the latter case पुरःसर is an उपसर्जन (i.e. a *subordinate* expression)].

(क) For य, J reads यत् which is wrong.

The rule is—'अनुपसर्जनात्' [meaning—ङीप is to be used in the following cases when the words mentioned are not उपसर्जन].

2. सभायाः यः—य is the affix after the word सभा [in the sense of तत्र साधुः].

3. सायो नाश &c.—साय means नाश and दिनान्त ।

4. लक्षणेन &c.—The अव्ययs अभि and प्रति are compounded with words denoting लक्षण (aim) in the sense of आभिमुख्य (in the direction of). [Thus, सायार्कम् अभिलक्ष्य इति अभिसायार्कम्].

5. न चिरं, जुगुप्सितत्वात्—Not for long, because of its shockingness.

6. नापि किञ्चित् &c.—And they did not do (व्यापार) anything, lest their indifference should be affected. The sense is that they remained absolutely neutral like the sun [with reference to the tree and the shadow].

7. अत्र आकृष्यमाणायाः &c.—Here, Draupadī when being dragged turned her face away from the person dragging; hence the comparison with a retreating shadow. But still Duhśāsana would not leave her ; hence his comparison with a tree.

Notes.

ऐक्षन्त—ईक्ष + लङ् अन्त ।

क्षणम्—अत्यन्त-संयोगे (i.e. व्याप्तौ) २या । Q. Why क्षणम् and not चिरम् (long) ?—Ans. See Malli. Expl. 5.

सभ्याः—सभायां साधवः इति सभ्याः । सभा + यत् ।

दुःशासन-पुरःसराः—दुःखेन शिष्यते इति दुःशासनः ; दुस् – शास् + युच्—कर्मणि by the Vārttika—'भाषायां शासि-युधि &c.' पुरः सरति यः सः पुरःसरः ; पुरस् – सृ + ट—कर्त्तरि । दुःशासनः पुरःसरः यस्याः सा—बहुव्रीहिः, ताम् ।

अभिसायार्कम्—सायः means 'end' (here, of the day) ; सो + घञ् ; cf. the word अवसान (अव—सो + ल्युट्) । सायस्य अर्कः—६तत् ; सायार्कम् अभिलक्ष्य इति अभिसायार्कम्—अव्ययीभावः । See Malli. Expl. 3.

आवृत्ताम्—आङ् – वृत् + क्त—कर्त्तरि । स्त्रियाम् २या १व ।

महातरोः—महान् तरुः—कर्म्मधा। The त् of महत् is changed into आ by the rule 'आत् महतः &c.'

Ch. of Voice.—...पुरःसरा सा सभ्यैः...आवृत्ता...छाया इव, ऐक्ष्यत।

Questions.—Expl. the sloka. चणम्—why not चिरम्? दुःशासन-पुरःसराम्—what is the fem. affix to be added to पुरःसर? Is it the same as has been added to the compound? If not, why? [Ans. See Malli. Expl. 1]. अभिप्रायार्कम्—S. साय—D and M. अभिप्रायार्कम् &c.—Expl. the simple.

She was full of tears.

अयथार्थक्रियारम्भैः पतिभिः किं तवेक्षितैः ?।
अरुध्येतामितीवास्या नयने बाष्पवारिणा ॥५२॥

Eng. Equiv. अयथार्थ—false. क्रियारम्भ—arrangement of work. ईक्षित—looked to. अरुध्येताम्—[the two] were closed.

Prose.—अयथार्थक्रियारम्भैः तव पतिभिः ईक्षितैः किम्? इति इव बाष्पवारिणा अस्या नयने अरुध्येताम्।

Bengali.—"উপযুক্তকর্ম্ম-পরাঙ্মুখ তোমার পতিগণের প্রতি দৃষ্টিপাতে কি ফল" এই কারণেই যেন অশ্রু কর্ত্তৃক তাঁহার নয়নদ্বয় রুদ্ধ হইল ॥ ৫২ ॥

English.—What is the good of looking to your husbands whose acts are false [to their relationship]—as if on this ground her eyes were shut up with tears. 52

Elucidation.—The husbands of Draupadi were in duty bound to protect her, but they failed to do their duty. Hence, it was no good looking to them for help. As if on this ground tears appeared in her eyes and closed them up obstructing her vision.

Ghantapatha.——अथ अस्याः तादात्मिकतां (तादात्विकतां ?) (क) वर्णयति (1)—अयथार्थेति। 'अयथार्थाः' मिथ्याभूताः 'क्रियारम्भाः' पतिशब्द-

(क) For तादात्मिकताम्, B reads तादात्मिकमाययार्थाम् which gives no meaning.

प्रवृत्तिनिमित्तभूत-कर्मोद्योगाः (2) येषां तैः, त्वामरक्षद्भिः (ख) इत्यर्थः। 'तव' सम्बन्धिभिः, 'पान्ति' रक्षन्ति इति 'पतयः' भर्त्तारः। "पातेर्डतिः" इति औणादिको डति-प्रत्ययः। तैः 'ईक्षितैः' अवेक्षितैः 'किं'? न किञ्चित् फलम् अस्तीत्यर्थः। 'इति इव' इत्थं विचार्य्येव— इत्युत्प्रेक्षा। 'वाष्पवारिणा' 'अस्याः' कृष्णायाः 'नयने' 'अरुध्येताम्' आवृते। रुधेः कर्म्मणि लङ्। अश्रुणा रुरोदेत्यर्थः॥ ५२॥

Malli. Explained.

1. अथ अस्याः &c.—Now, he describes the sameness of her condition (i.e. describes that her condition was not at all improved). [Or, the reading may be तादात्विकता in which case the meaning is—Now, he describes the condition of Draupadi at that time].

2. पतिशब्द: &c.—The tendency for work based on the connotation of the word पति।

Notes.

अयथार्थ-क्रियारम्भैः—न यथार्थाः—नञ्-तत्; क्रियायाः आरम्भाः—६तत्; अयथार्थाः क्रियारम्भाः येषां ते अयथार्थ-क्रियारम्भाः—बहुव्रीहिः, तैः। Adj. to पतिभिः।

पतिभिः—पा + डति – कर्त्तरि। Here the derivative meaning of the word पति is being emphasised. कारणं इया—the verb is साध्यते to be understood.

अरुध्येताम्—रुध + लङ् – कर्म्मवाच्ये। Nom.—वाष्पवारिणा। Obj.—नयने।

Ch. of Voice.— ··· वाष्पवारि···नयने अरुणत्।

Questions. अयथार्थक्रियारम्भैः—Expl. पतिभिः—C.

We remained inactive only for the sake of our elder brother.

सोढवान्नो दशामन्त्यां ज्यायानेव गुणप्रियः।
सुलभो हि द्विषां भङ्गो दुर्लभा सत्स्ववाच्यता॥५३॥

Eng. Equiv. सोढवान्—tolerated. अन्त्या—low. अवाच्यता—unimpeachableness.

(क) For त्वाम्, all read ताम् which seems to be a corruption.

Prose.—गुणप्रियः ज्यायान् एव नः अन्त्यां दशां सोढ़वान्। द्विषां भङ्गः सुलभः हि, सत्सु अवाच्यता दुर्लभा । ५३ ।

Bengali.—গুণপ্রিয় (অর্থাৎ গুণবান্) জ্যেষ্ঠাগ্রজই আমাদের সেই নিকৃষ্ট অবস্থা সহ্য করিয়াছিলেন (আমরা সহ্য করিয়াছিলাম কেবল তাঁহার অনুরোধে)। কারণ, শত্রুনাশ সুলভ (অর্থাৎ সময়ান্তরেও করা যাইতে পারে), কিন্তু সাধুগণের মধ্যে অনিন্দনীয়তা দুর্লভ (কারণ, শপথভঙ্গে নিন্দা অনিবার্য্য) ॥ ৫৩ ॥

English.—Our eldest brother alone, endowed with merits, [not we really] tolerated the pitiable condition of ours [at that time]. For, the destruction of enemies is easily practicable, but unimpeachableness among the virtuous is rare. 53.

Ghantapatha.—ननु भवद्भिः किमर्थम् असमर्थैः इव उपेक्षितं ? तत्राह— सोढवानिति । गुणाः प्रिया यस्य स 'गुणप्रियः' । "वा प्रियस्य" (1) इति परनिपातः । 'ज्यायान्' अग्रजो युधिष्ठिरः 'एव' [वृद्धशब्दात् ईयसुनि "ज्यादादीयसः" इति आकारादेशः (2) ।] 'नः' अस्माकम्, अन्ते भवाम् 'अन्त्यां' निकृष्टां 'दशाम्' अवस्थां 'सोढवान्', न तु वयम्, किन्तु तदवरुद्धाः (3) इति भावः । ननु शत्रूपेक्षा सर्वानर्थकारिणी इत्याशङ्क्याह—सुलभ इति । 'द्विषां' विद्विषां 'भङ्गः' सुलभः, कालान्तरेऽपि इति शेषः । 'सत्सु' सज्जनेषु 'अवाच्यता' अनिन्द्यता 'दुर्लभा', न तु शत्रूपेक्षा । हि प्रसिद्धौ । शत्रूपेक्षातो लोकापवाद एव बलवान्, तस्य उत्पन्नस्य पुनः अप्रतिविधेयत्वात्, स च समयोल्लङ्घने स्यात् एव इति भावः (4) ॥ ५३ ॥

Malli. Explained.

1. वा प्रियस्य—The word प्रिय as a member of a बहुव्रीहि compound is optionally placed *after*. [Thus, गुणाः प्रियाः यस्य स गुणप्रियः or प्रियगुणः] ।

2. ज्यात् आत् ईयसः &c.—The ई of ईयस् after the word ज्य is changed into आ । [Thus, वृद्ध + ईयस् = ज्य + ईयस् = ज्य + आयस् — ज्यायस्].

3. किन्तु तदवरुद्धा &c.—But [we tolerated] as being checked by him.

4. शत्रूपेक्षातः &c.—लोकापवाद is a point weightier than शत्रूपेक्षा ; for, when once generated, it cannot be removed, and it is

bound to be generated by the violation of the contract (viz. 12 years' forest-life and 1 year's life *incognito*).

Notes.

सोढवान्—सह् + क्तवतु पुं १मा १व ।

अन्त्याम्—अन्ते भवा इति अन्त्या, ताम् । अन्त + यत् ।

ज्यायान्—वृद्ध + ईयसुन् । १मा १व । Here the parties are to be conceived as *two* only. Hence, ईयसुन् instead of इष्ठ ।

गुणप्रियः—गुणाः प्रियाः यस्य सः गुणप्रियः – बहुव्रीहिः । Opt. form—प्रियगुणः by the rule 'वा प्रियस्य' ।

अवाच्यता—वच + ण्यत् = वाच्यः (= निन्दनीयः), न वाच्यः इति अवाच्यः, तस्य भावः ।

Rhetoric.—The fig. of speech is अर्थान्तरन्यास as in Sl. 8.

Ch. of Voice.—गुणप्रियेण ज्यायसा·· अन्त्या दशा सोढा (with क्त)·· भङ्गेन सुलभेन [भूयते]···अवाच्यतया दुर्लभया [भूयते] ।

Questions.—ज्यायान्—D. गुणप्रियः—S, and note any peculiarity.

His heart is large like the sea.

स्थित्यतिक्रान्तिभीरूणि स्वच्छान्याकुलितान्यपि
तोयानि तोयराशीनां मनांसि च मनस्विनाम्॥५४

Eng. Equiv. स्थिति—(i) limit ; (ii) good order. आकुलित—disturbed.

Prose.—तोयराशीनां तोयानि मनस्विनां मनांसि च स्थित्यतिक्रान्तिभीरूणि अतएव आकुलितानि अपि स्वच्छानि ॥ ५४ ॥

Bengali.—সমুদ্রের জলরাশি এবং প্রশস্তচিত্ত ব্যক্তিগণের চিত্ত, মর্য্যাদাতিক্রমের ভয়ে আকুলিত হইলেও স্বচ্ছই থাকে। ৫৪ ॥

English.—The waters of the seas and the minds of the magnanimous, from fear of violating the order, remain pellucid even when disturbed. 54.

Elucidation.—The waters of the seas, even when disturbed, do not transgress their limit. The minds of the magnanimous persons likewise, even when disturbed by external circumstances, do not run into extremes but try to regain their normal condition quickly lest there should be any violation of law and order. Yudhishthira, therefore, even under the gravest provocation, did not like to have recourse to an extreme course which *we* would advise, lest there should be any commotion due to the violation of his promise at the game.

Ghantapatha.—ननु, शत्रुवधे राज्ञां को नाम अपवाद: ? प्रत्युत कीर्त्ति: एव इत्याशङ्क्य—सत्यं, स एव समयोल्लङ्घन-कलङ्कित-कीर्त्त्या महानिन्दानिदानम् इत्याशयेन आह (1)—स्थितीति । 'तोयराशीनां' समुद्राणां 'तोयानि' 'मनस्विनां' 'मनांसि च' (क) 'स्थित्यतिक्रान्ते:' मर्य्यादोल्लङ्घनात् हेतो: 'भीरूणि' अतएव 'आकुलितानि' सङ्क्षोभितानि 'अपि' स्वच्छानि 'अकलुषाणि'; न त्वरन्ते (2) इत्यर्थ: । मनस्वी अयं युधिष्ठिर इति भाव: । अत्र तोयाना सामान्यतो मनस्विनां च—अप्रकृतानाम् एव—गुणतौल्यात् औपम्यस्य गम्यतया तुल्ययोगितालङ्कार: (3), गुणश्च अत्र भीरुत्वं स्वच्छता च ॥ ५४ ॥

Malli. Explained.

1. ननु &c.—Well, what's the blame upon a king for killing the enemies? Rather, there is fame in it. Anticipating this [he says.]—true but that act (i.e. शत्रुवध) owing to the reputation being tarnished by the violation of the time-promise becomes a source of gross infamy. To shew this he says—.

2. न त्वरन्ते—They do not make [undue] haste.

3. अत्र तोयानां &c.—Here, of the two अप्राकृत things, viz.

(क) J and G add here—समानि भवति उभयं विशिनष्टि । But this would disturb the running prose-order which Mallinátha follows everywhere.

तौर्यs, and the magnanimous generally, the qualities being [intended to be] compared to each other, resemblance is to be understood, and therefore the fig. of speech is तुल्ययोगिता।

N. B. The definition is :—'प्रस्तुतानां तथान्येषां केवलं, तुल्यधर्मत: । औपम्यं गम्यते यत्र सा मता तुल्ययोगिता' ॥

In the present case, the प्रस्तुत (युधिष्ठिर) has not been mentioned at all. So, the तुल्ययोगिता here is to be held to have been based on अप्रस्तुत-प्रशंसा which will ultimately refer to युधिष्ठिर, the प्रस्तुत thing.

Notes.

स्थित्यतिक्रान्तिभीरूणि—स्थिते: (=मर्य्यादाया:) अतिक्रान्ति: (=अतिक्रम:)—६तत्, तस्या: भीरूणि—५तत्। Adj. to तौर्याणि and मनांसि।

मनस्विनाम्—प्रशस्तं मन: विद्यते एषाम् इति मनस्विन:, तेषाम्। मनस + विनि—in the sense of प्राशस्त्य।

Rhetoric.—The fig. of speech is तुल्ययोगिता based on अप्रस्तुत-प्रशंसा। See Malli. Expl. 3.

Ch. of Voice.—···तौर्यै:···मनोभि: च...भीरुभि:...आकुलितैरपि स्वच्छै: [भूयते]।

Questions.—Expl. the fig. of speech in the sloka. स्थिति—M. मनस्विनाम्—D.

But how has he made enemies at all?

धार्त्तराष्ट्रै: सह प्रीतिर्वैरमस्मास्वसूयत।
असन्मैत्री हि दोषाय कूलच्छायेव सेविता ॥५५॥

Eng. Equiv. असूयत—has created. कूलच्छाया—the shadow of a falling bank.

Prose—धार्त्तराष्ट्रै: सह प्रीति: अस्मासु वैरम् असूयत। हि (=यस्मात्), असन्मैत्री, कूलच्छाया इव, सेविता [सती] दोषाय भवति।

Bengali.—धृतराष्ट्रतनयगणेर सहित प्रणयई आमादिगेर प्रति शत्रुता प्रसव करियाछे। कारण, असाधुर सहित मित्रता सेवित हइले, [पतनोन्मुख-] नदीतटेर छायार न्याय, दोषेर जन्य हइया थाके (अर्थात् दोष घटाइया थाके) ॥ ५५ ॥

English.—Our friendship with the sons of Dhritara'shtra has created their enmity towards us. For, friendship with the wicked, like the shadow of a falling bank, when enjoyed, is for injury only. 55.

Elucidation.—The Shastras advise us to be at a safe distance from the falling bank of a river. For, if we frequent such a bank we endanger our own life. Similar is the case with friendship with the wicked. Such friendship is suicidal. The best course of conduct with reference to a wicked person is to avoid him by all means.

Ghantapatha.—नन्वजातशत्रोः स्वजनवैरे (क) किं कारणम् इत्याशङ्क्य, अस्मत्सौहार्दम् एव (1) इत्याह—धार्त्तराष्ट्रैरिति। 'धार्त्तराष्ट्रैः' धृतराष्ट्रपुत्रैः 'सह' 'प्रीतिः' सौहार्दमेव 'अस्मासु' विषये 'वैरम्' 'असूयत' सूतवती। सूयतेः दैवादिकात् कर्त्तरि लङ्। ननु सौहार्दं वैरजनकं चेत् विप्रतिषिद्धं, तत्राह (2)—असदिति। 'हि' यस्मात् 'असद्भिः' दुर्जनेन सङ्गतिः, 'कूलस्य' आसन्नपातस्य नदीतटस्य 'छाया इव', 'सेविता' श्रिता सती 'दोषाय' अनर्थाय भवति। न खलु दुर्जनः सुजनवत् मित्रद्रोहपातकं पश्यतीति भावः (3)। उपमाप्राणितोऽयम् अर्थान्तरन्यासोऽलङ्कारः॥ ५५॥

Malli. Explained.

1. नन्‌ &c.—Well, how is it that Yudhishthira who is called अजातशत्रु (on account of his having no enemy) is looked upon as an enemy by his kinsmen? In anticipation of such a query he says—our friendship is the cause.

2. ननु सौहार्द &c.—Well, सौहार्द (friendship) is the cause of वैर (enmity)—this is a contradiction [in terms]. To this he says—.

3. न खलु &c.—Because a wicked man does not care for the treachery to a friend like a good man.

Notes.

धार्त्तराष्ट्रैः—धृतराष्ट्रस्य अपत्यानि पुमांसः इति धार्त्तराष्ट्राः, इति। धृतराष्ट्र+अण्।

(क) स्वजने वैरे—All except B.

वैरम्—वीरस्य कर्म्म इति वैरम्। वीर+अण्, "—वैर-मैथुनिकयोः" इति पाणिनि-निर्द्देशात्। [Or, वीरस्य भावः इति वैरम्। वीर+अण् '—युवादिभ्यः अण्"। It should, however, be noted that the word वीर is not found to have been read in युवादि class].

अभ्यासु—विषये ७मी।

असूयत—सू+लङ् त—कर्त्तृवाच्ये। This सू is दिवादि, आत्मनेपदीय।

असम्मैत्री—असद्भिः [सह] मैत्री—सुप्सुपा। मित्रस्य भावः इति मैत्रम्। मित्र+ष्यञ् by the rule 'गुणवचन-ब्राह्मणादिभ्यः कर्म्मणि च'। Then, मैत्र+ङीप् (=मैत्री) by the rule 'षिद्गौरादिभ्यश्च'। The य of मैत्र्य is elided by the rule 'हलस्तद्धितस्य'।

दोषाय—४र्थी by the Várttika 'क्लृपि सम्पद्यमाने च'।

कूलच्छाया—कूलस्य (=नदीतटस्य) छाया—६तत्। The enjoyment of the bank from a safe distance is not so risky, but to advance so close to the river as to be able to see the reflection of such a bank in water is fraught with the gravest danger.

कूलच्छायेव दोषाय—Cf. 'कूलच्छायां नोपासीत' :—चरकसंहिता १।८

Rhetoric.—The fig. of speech is अर्थान्तरन्यास based on the उपमा in कूलच्छायेव।

Ch. of Voice.—...प्रीत्या...वैरम् असूयत (passive)...असम्मैत्र्या, कूलच्छायया इव, सेवितया सत्या...[भूयते]।

Questions. वैरम्—D. कूलच्छायेव &c.—Expl.

Mysterious is the conduct of the wicked.

अपवादादभीतस्य समस्य गुणदोषयोः।
असद्वृत्तेरहो वृत्तं दुर्विभावं विधेरिव ॥५६॥

Eng. Equiv. असद्वृत्ति—wicked. दुर्विभाव—mysterious; unintelligible.

Prose.—अपवादात् अभीतस्य, गुणदोषयोः समस्य असद्वृत्तेः वृत्तम्, अहो विधेः वृत्तम् इव, दुर्विभावम् (दुर्ज्ञेयम्)।

Bengali.—অপবাদে ভীত নহে, [যার] গুণদোষে তুল্যজ্ঞান—এইরূপ দুর্জনের চরিত্র, বিধির চরিত্রের ন্যায়, দুর্বিজ্ঞেয় ॥৫৬॥

English.—The conduct of a wicked person not caring for calumny and [therefore] remaining unchanged in his fault or otherwise, is mysterious like that of Fate. 56.

Ghantapatha.—ननु आदौ एव तेषां वृत्तम् अविज्ञाय कथं मैत्री कृता इत्याशङ्क्य, किं कुर्मः दुर्जनवृत्तं दुर्विज्ञेयम् इत्याह—अपवादादिति। 'अपवादात्' जनाक्रोशात् 'अभीतस्य' अजुगुप्समानस्य (1) इत्यर्थः। 'गुणदोषयोः' समस्य तुल्यबुद्धेः, निग्रहानुग्रहौ गुणदोषयोः अननुरूपतः (2) इत्यर्थः। विधौ अपि एतद्विशेषणं योज्यम्। 'असद्वृत्तेः' दुराचारस्य 'धूर्त्तस्य' 'वृत्तम्' ईहितम्, 'अहो' (क) 'विधेः' दैवस्य 'वृत्तम् इव', 'दुर्विभाव' विभावयितुम् अशक्यम्, किन्तु कार्य्यैक-समधिगम्यम् (3) इत्यर्थः। भवतेर्ण्यन्तात् कृच्छार्थे खल्प्रत्ययः (4) ॥ ५६ ॥

Malli. Explained.

1. अजुगुप्समान—Not caring for.

2. निग्रहानुग्रहौ &c.—Not caring for the निग्रह (blame) in case of his fault and अनुग्रह (praise) in case of his goodness.

3. कार्य्यैकसमधिगम्यम्—Determinable only by his acts.

4. भवतेः ण्यन्तात्—In दुर्विभावम् the affix is खल् added to भू + णिच् in the sense कृच्छ्र।

Notes.

अपवादात्—अपादान by the rule 'भीत्रार्थानां भयहेतुः'।

असद्वृत्तेः—न सती इति असती (= असाध्वी = bad)—नञ् तत्। असती वृत्तिः (conduct) यस्य सः असद्वृत्तिः तस्य—बहुव्रीहिः।

दुर्विभावम्—दुःखेन विभावयितुं शक्यम् इति दुर् – वि – भू + णिच् + खल्—कर्म्मणि।

Rhetoric.—The fig. of speech is उपमा based on श्लेष।

Ch. of Voice.—...वृत्तेन...दुर्विभावेन [भूयते]।

N. B. In दुर्विभावेन the dental न is obligatory by the rule 'पदव्यवायेऽपि।

Question. दुर्विभावम्—D.

(क) अहो—Dropped in all except B.

But how would you brook the insult ? ध्वंसेत हृदयं सद्यः परिभूतस्य मे परैः ।
यद्यमर्षः प्रतीकारं भुजालम्बं न लम्भयेत् ॥५७॥

Eng. Equiv. अमर्ष—wrath. भुजालम्ब—helping hand. न लम्भयेत्—would not make it have.

Prose.—परैः परिभूतस्य मे हृदयं सद्यः ध्वंसेत, अमर्षः प्रतीकारं भुजालम्बं न लम्भयेत् यदि [हृदयेन हृदयं वा] ।

Bengali.—শত্রুকর্তৃক নির্য্যাতিত আমার হৃদয় তৎক্ষণাৎ ধ্বংস প্রাপ্ত হইত, যদি ক্রোধ ইহাকে প্রতিকাররূপ হস্তালম্বন প্রাপ্ত না করাইত ॥৫৭॥

English.—I being defeated by the enemy my heart would have failed if wrath did not make it (my heart) have a helping hand in revenge. 57.

Elucidation.—I could not have brooked the insult of defeat at the hands of my enemies had it not been for the fact that I live for taking revenge on them in the near future. It is the prospect of revenge that enables me to endure the present insult.

Ghantapatha.—ननु, एवं मानी कथं परिभूतो जीवसि तत्राह—ध्वंसेतेति । 'परैः' शत्रुभिः 'परिभूतस्य' 'मे' 'हृदयं' 'सद्यो' 'ध्वंसेत' अश्येदित्यर्थः । 'अमर्षः' [कर्त्ता] (1) 'प्रतिक्रियारूप' 'भुजालम्बं' हस्तावलम्बनं 'न लम्भयेत्' न ग्राहयेद 'यदि' "हृदयेन" इति शेषः (2) । सत्यं जीवामि, प्रतिविधित्सया न तु निर्लज्जतया इति भावः (3) ॥ ५७ ॥

Malli. Explained.

1. अमर्षः कर्त्ता—[Malli. means that अमर्ष is the कर्त्ता of लम्भयेत्]

2. हृदयेन &c.—हृदयम् was the subject in the अणिजन्त stage. In णिच् that subject will take the 2nd or the 3rd case-ending according to विवक्षा । Thus,

हृदयं भुजालम्बं लभेत ।
अमर्षः हृदयेन „ लम्भयेत् ।
or अमर्षः हृदयं „ „

N. B. लभ्यति may be analysed into two parts—गति and प्राप्ति । When the sense of गति is prominent the विभक्ति in

अणि-कर्त्ता is २या (by the rule 'गतिबुद्धि &c.)' and when the sense of प्राप्ति is prominent, and thus गति is not prominent, the rule 'गति-बुद्धि'—does not apply, and the विभक्ति in the अणि-कर्त्ता is २या as in the present case. The prominence of the one sense or of the other is guided mostly by विवक्षा। [For the two kinds of uses, cf. Mágha I. 25 and Kiráta xiii. 67.].

3. सत्यं—True I live [still], but I live for revenge, not for (i.e. not on account of) shamelessness.

Notes.

ध्वंसेत—ध्वंस+लिङ् ईत। लृङ् would be a more proper tense here, but लिङ् also is sanctioned by usage.. 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ'। Here ध्वंसक्रिया has *not* been effected. Hence it was a case of लृङ्।

परै:=शत्रुभि:। 'पर: श्रेष्ठारिदूरान्योत्तरे क्लीवं तु केवले'—इति मेदिनी। अमर्ष: - कर्त्ता of लम्भयेत्।

प्रतीकारम्—प्रति - कृ + घञ् - भावे। The इ of प्रति is optionally lengthened by the rule 'उपसर्गस्य घञि अमनुष्ये बहुलम्'। There is अभेद between प्रतीकार and भुजालम्ब here.

भुजालम्बम्—भुजस्य आलम्ब:, तम्। आङ् - लम्ब + घञ् - भावे।

लम्भयेत्—लभ् + णिच + लिङ् यात्। The original subject (कर्त्तृ) was हृदय। In णिच् that subject will take the 2nd or the 3rd case-ending. See Malli. Expl. 3.

Ch. of Voice.—...हृदयेन (or हृदयं)...ध्वंसेत...अमर्षेण न लम्भ्येत।

Questions. ध्वंसेत—sense of लिङ्। लम्भयेत्—Find out the कर्त्तृ in the अणिजन्त stage. प्रतिकारं भुजालम्बं &c.—Expl.

We all five equally feel the insult keenly.

अवधूयारिभिर्नीता हरिणैस्तुल्यवृत्तिताम्।
अन्योन्यस्यापि जिह्रीम: किं पुन: सहवासिनाम् ॥५८

Eng. Equiv. अवधूय—being defeated. तुल्यवृत्तिता—the state of adopting a living similar to that of deer. जिह्रीम:—feel ashamed.

Parse.—अरिभिः अवधूय हरिणैः तुल्यवृत्तितां नीताः [वयम्] अन्योऽन्यस्यापि जिह्रीमः, सहवासिनां किं पुनः ?

Bengali.—শত্রুকর্ত্তৃক পরাস্ত হইয়া হরিণের তুল্যবৃত্তিত্ব প্রাপ্ত আমরা (পাঁচ ভাই) পরস্পরের নিকটেই লজ্জিত হই, সহবাসিগণের (পরিচিত ব্যক্তিগণের) নিকটে ত কথাই নাই ॥ ৫৮ ॥

English.—Defeated and reduced by enemies to the state of deer in respect of living we (the five brothers) feel ashamed even to one another, not to speak of companions (acquaintances). 58.

Ghantapatha.—ननु, तव कोऽयम् अभिमानः तत्राह—अवधूयेति । 'अरिभिः' 'अवधूय' परिभूय 'हरिणैः', मृगैः 'तुल्यवृत्तितां' तुल्य-जीवनत्वं वन्याहारताम् इत्यर्थः, 'नीताः' प्रापिताः "वयं पञ्च अपि" इति शेषः, 'अन्योन्यस्य अपि' 'जिह्रीमः' लज्जामहे ; 'सहवासिनां' सहचारिणां 'किं पुनः' ?—प्रागेव (1) जिह्रीम इति किम् वक्तव्यम् इत्यर्थः । क्रियायोगे सम्बन्धसामान्ये षष्ठी (2) । अत्र वयं पञ्च अपि तुल्याभिमाना एव (क), इदं तु मदेकसाध्यं कर्म इति मुनिशासनान्मया अनुष्ठीयते इति भावः (3) ॥५८॥

Malli. Explained.

1. प्रागेव—Even before we are ashamed among ourselves.

2. क्रियायोगे &c.—In अन्योऽन्यस्य the ६ष्ठी is in सम्बन्ध in general in the sense of क्रियायोग। (That is, क्रियायोगे ४र्थी would be the proper विभक्ति here).

3. अत्र वयं—In the present case, we all five have the same sense of self-respect ; but the present act is undertaken by me under instructions from the sage (Vyása) who says that the performance of the act is possible for me alone.

Notes.

अवधूय—अव - धू + ल्यप् । The nom. is अरिभिः ।

तुल्यवृत्तिताम्—तुल्या वृत्तिः येषां ते तुल्यवृत्तयः—बहुव्रीहिः । तेषां भावः इति तुल्यवृत्तिता, ताम् । 'आजीवो जीविका वार्त्ता वृत्तिर्वर्त्तन-जीवने—इत्यमरः ।

(क) For एव, J reads इव which is evidently a mistake.

अन्योऽन्यस्य—सम्बन्धसमान्ये ६ष्ठी as in मम प्रतिभाति। We might also have here क्रियायोगे ४र्थी।

अन्यस्य अन्यस्य इति अन्योऽन्यस्य। When reciprocity of action is meant a pronoun is reduplicated ('कर्मव्यतीहारे सर्वनाम्नो द्वे वाच्ये'), and the words are *often* compounded ('समासवत् च बहुलम्'). On the strength of the word बहुलम् (for which see notes on वाचस्पतेः—Sl. 43), grammarians limit this समासवत्त्व to words other than अन्य and पर। 'बहुल-ग्रहणात् अ-न्यपरयोः न समासवत्' इति भट्टोजिः। Then, there is the Várttika 'असमासवद्भावे पूर्वपदस्थस्य सुपः सुः वक्तव्यः'। Thus, अन्यस्य अन्यस्य = अन्यः अन्यस्य = अन्योऽन्यस्य। [The विसर्ग becomes स by the rule 'कस्कादिषु च'। कः + क = कस्कः].

जिह्रीमः—ह्री + लट् मस्। Conj—जिह्रेति; जिह्रीयात्, जिह्राय जिह्रयाञ्चकार, अह्रैषीत्; ह्रीतः, ह्रीणः।

सहवासिनाम्—सम्बन्धे ६ष्ठी as in अन्योऽन्यस्य above. सह वसन्ति ये ते इति सह-वस + णिनि—कर्त्तरि। Companions. Here it means acquaintances.

Ch. of Voice.—...नौतैः......ह्रीयते।

Questions. अन्योऽन्यस्य—C and formation. जिह्रीमः—conj.

Self-respect is indispensable.

शक्ति-वैकल्य-नम्रस्य निःसारत्वाल्लघीयसः।
जन्मिनो मानहीनस्य तृणस्य च समा गतिः॥५९॥

Prose.—शक्तिवैकल्यनम्रस्य, निःसारत्वात् लघीयसः, मानहीनस्य जन्मिनः तृणस्य च गतिः समा।

Bengali.—শক্তিহীনতা বশতঃ নম্র, অসার অতএব লঘুপ্রকৃতি, মানহীন প্রাণীর ও তৃণের গতি তুল্য ॥ ৫৯ ॥

English.—The condition of a grass and of a person having no sense of self-respect both prostrate on account of want of ability, unsubstantial and therefore light, and low is the same. 59.

Ghantapatha.—ननु, तर्हि दुःखैकनिदानम् अन्तःशत्रुः मान एव त्यज्यताम् इत्याशङ्क्य, तस्यापि दोषमाह (1)—शक्तीति। 'शक्तिवैकल्येन' उत्साहादिशक्ति-

वैधुर्येण अवष्टम्भसामर्थ्यविरहेण च (2) 'भस्मस्य' विधेयभूतस्य प्रश्नीभूतस्य च (क) (3), 'निःसारत्वाद्' दुर्बलत्वात् स्थिरांशरहितत्वात् च ["सारो बले स्थिरांशे च" इत्यमरः ।] "लघीयसी' गौरवहीनस्य नीचस्य च (4) इत्यर्थः, 'मानहीनस्य' 'जन्मिनः' जन्तोः [व्रीह्यादित्वादिनिः (5)] 'तृणस्य च' 'गतिः' अवस्था 'समा'—इति मानहीनस्य तृणादपि निकृष्टत्वात् (6) न त्याज्यो मान इति भावः । श्लेषालङ्कारोऽयं, तदनुप्राणितेयम् उपमा इत्यन्ये (ख) (7) । कदर्थनृणादपीति व्यज्यते (8) ॥ ५८ ॥

(क) प्रश्नीभूतस्य—Dropped in A and G, and wrongly placed before विधेयभूतस्य in B and J.

(ख) B and J read तदनुप्राणितेयम् उपमा इत्यनेकार्थदीपिकेति व्यजते। The addition of इति व्यज्यते after अनेकार्थदीपिका is nonsense. Besides, as the *Catalogus Catalogorum* informs us, this is the only reference to अनेकार्थदीपिका and no further existence of the work can be traced. A and G read तदनुप्राणितेयम्... इत्यनेकार्थदीपकेति व्यज्यते of which the latter part is equally unmeaning. The Sanskrit College Ms. reads 'तदनुप्राणितेयमुपमा इत्यन्येऽपि दीपिकेति व्यज्यते'। उपमा इत्यन्ये which is the accepted view (see Kávya prakás'a and Sáhitya-darpana on श्लेषविचार) must be the reading as is evident from Malli.'s own language in his commentary on Mágha II. 74. As for the latter part, the best reading we could suggest has been adopted by us in the body of the commentary. This must be the actual reading and this tallies very well with Malli. 6.

We explain the corruption as follows :—

कर्थं or कदर्थं has been corrupted into कार्थं, the preceding अन्ये has been changed into अने, and when the expression अनेकार्थं has been obtained, the clumsy letters नृणा have been sacrificed and दपीति has been changed into दीपिकेति—thus giving rise to a finished and pedantic name अनेकार्थदीपिका। It was very fortunate that the concluding expression इति व्यज्यते has survived the vagaries of the irresponsible interpolator.

Malli. Explained.

1. ननु &c.—Well, then, let मान (self-respect) the internal foe, be abandoned' being the sole cause of misery. In anticpation of this he (Arjuna) speaks of the evil in giving it up.

2. उत्साहादि &c.—(i) On account of the want of the power of energy &c. (in the case of जन्मिन्), and (ii) on account of the absence of the power of resistance or support (in the case of तृण).

3. विधेयभूतस्य &c.—(i) Obedient, and (ii) prostrate.

4. गौरवहीनस्य &c.—(i) Shorn of honour, and (ii) sapless (hence light).

5. श्रौत्यादित्वात् इति:—[See Sl. 13, Malli. Expl. 1.].

6. तृणादपि निकृष्टत्वात्—N. B. The निकृष्टत्व, though it does not follow from the अक्षरार्थ, is evidently the spirit of the simile which certainly does not mean to say that the उपमान and the उपमेय weigh exactly the same in the balance.

7. श्लेषालंकारोऽयं, तदनुप्राणिता &c.—The fig. of speech is श्लेष। According to others, it is an उपमा based on that (viz. श्लेष)।

8. कदर्थ &c.—The implication is that such a person is more useless even than a grass. (Cf. Malli. 6.)

N. B. कु + अर्थ = कदर्थः in तत्पुरुष and कर्थः in बहुव्रीहि। But कदर्थः is found in the sense of बहुव्रीहि also and there are means for obtaining the form. [Or, कर्थः may be the reading].

Notes.

शक्तिवैकल्यनम्रस्य—शक्तेः वैकल्यं—६ तत्, तेन नम्रः—३ तत्, तस्य।

N. B. Tne उपमेय being the principal subject, the gender of the adjectives should follow that of the उपमेय instead of that of the उपमान।

शक्तिवैकल्य &c.—"प्रकायसिद्धः, प्रभावोत्साहमन्त्रजाः"। वैकल्य means विकलत्व—imperfection; hence, absence.

2. निःसारत्वात्—निर् (= नास्ति) सारः यस्य, तस्मात्। सार means (i) बल (in the case of जन्मिन्), and (ii) स्थिरांश in the case of तृण। A grass has no स्थिरांश।

N. B. No such हेतु has been added to the other adjectives. निःसारस्य (instead of निःसारत्वात्) would be a better reading inasmuch it (i) will avoid प्रक्रमभङ्ग, (ii) will equally serve as the हेतु, and, being inexplicit as the हेतु, (iii) will give rise to the fig. of speech called काव्यलिङ्ग।

लघीयसः—लघु + ईयसुन्। ६ष्ठी १व।

जन्मिनः—'प्राणी तु चेतनो जन्मी' = इत्यमरः। जन्म + इनि ; see Malli. 5.

Ch. of Voice.— ..गत्या समया [भूयते].

Questions.—Expl. the double meanings of the adjectives.

Grounds for the above : Lofty position like that of peaks.

अलङ्घ्यं तत्तदुद्वीक्ष्य यद्यदुच्चैर्महीभृताम्।
प्रियतां ज्यायसीं मा गान्महतां केन तुङ्गता ॥६०

Eng. Equiv. उच्चैः—lofty. महीभृत्—mountain. ज्यायस्—very much. मा गात्—should not have. केन—what for. तुङ्गता—loftiness.

Prose.—महीभृतां यद् यद् उच्चैः तत् तत् अलङ्घ्यम् उद्वीक्ष्य महतां तुङ्गता केन ज्यायसीं प्रियतां मा गात् ?

Bengali.—পর্ব্বতসমূহের যাহা যাহা উচ্চ (অর্থাৎ শৃঙ্গাদি) তাহা তাহা অলঙ্ঘ্য দেখিয়া মহাপুরুষগণের মানোন্নতা কেন অত্যন্ত প্রীতি না পাইবে (অর্থাৎ মানোন্নতা কেন আমাদের সকলের চিত্তাকর্ষক না হইবে) ? ॥ ৬০ ॥

English.—Whatever is lofty in mountains is insurmountable. Seeing this why should not the loftiness of the great be very dear (to us all) ? 60.

Ghantapatha.—मानत्यागे दोषमुक्त्वा तत्सद्भावे षड्भिः गुणमाह (1)—अलङ्घ्यमिति। 'महीभृतां' पर्वतानां सम्बन्धि 'यद्यत्' शृङ्गादिकम् 'उच्चैः' उन्नतं 'तत्तत्' 'अलङ्घ्यम्' उद्वीक्ष्य' 'उत्प्रेक्ष्य, तर्कयित्वा इति यावत्, 'महतां' महात्मनां

'तुङ्गता' मानीत्रत्यं 'ज्यायसीं' 'प्रियतां' "प्रयत्व' 'केन' "हेतुना" मा गात्? न केन अपि (2);—प्रियत्वं गच्छत्येव इत्यर्थः (क)। आशिषि "माङि लुङ्"; अटोऽपवादः (3)। दैवात् अनिच्छतोऽपि इच्छाम् उत्पादयत्येव [उत्पादयत्विव ?] औषधवत् इति अस्मिन् अर्थे (ख) आशंसनार्थमाशीःप्रयोगः (4)। उद्वीक्ष्य इति असमानकर्तृकत्व-निर्देशः क्वचित् प्रयोगदर्शनात् सोढव्यः (5)। केचित् उद्वीक्ष्यम् इति पठन्ति। तत्र, यद्यत् उच्चैः तत् तत् अलङ्घ्यम् 'उद्वीक्ष्यम्' अवलोकनीयं न च उल्लङ्घनीयम् इति; अतो महताम्—इत्यादि योजयन्ति (6)॥ ६०॥

Malli. Explained.

1. मानत्यागे &c.—Having described the evils of the abandonment of मान (self-respect), he now describes the benefit of its presence (सद्भाव) with six [Slokas].

2. न केनापि—मा गात् इति शेषः।

3, आशिषि &c.—In मा गात् (मा + अगात्) the लुङ् is in the sense of आशिस्। The अ of अगात् does not come in. [The rule is—'न माङ्-योगे'].

4. दैवात् &c.—The lofty position of the peaks [should inspire a liking [for loftiness], like medicine, even in one who happens not to have had it before. In order to express a wish in this respect the optative (आशीः) has been used.

5. उद्वीक्ष्य &c.—[The nom. of the infinite verb उद्वीक्ष्य is जनाः and that of the finite verb मा गात् is तुङ्गता. But the two verbs should have had the same subject. For, the rule for क्त्वा is—'समान-कर्तृकयोः पूर्वकाले'। To this Malli. says—] The use of उद्वीक्ष्य here with reference to a different subject is to be allowed on the ground that such uses are sometimes met with. (Cf. 'जगन्नाथमुखं दृष्ट्वा पुनर्जन्म न विद्यते। N. B. The solution

(क) J reads here—किन्तु तुङ्गत्वेन इत्यर्थः which, if genuine, might be shifted just after न केनापि।

(ख) J reads—दैवम् अनिच्छन् अपि इच्छाम् उत्पादयति औषधवत अस्मिन् अर्थे इति। B reads इत्यर्थः for इत्यस्मिन्नर्थे।

in such cases is as follows :—जगन्नाथमुख' इत्र "स्थितस्य" जनस्य पुनर्जन्म न विद्यते)। [Evidently to avoid the above difficulty] some read उद्वीक्ष्यम् (in place of उद्वीक्ष्य). In that reading they construe as follows :—यद् यद् उर्ध्वं: तत् तत् अलङ्घ्यम् उद्वीक्ष्यम् ; अत: महतां &c. The meaning is—अलङ्घ्यम् उद्वीक्ष्यम् (= अवलोकनीयं), न च लङ्घ्यम् (उल्लङ्घनीयम्).

Notes.

उद्वीक्ष्य—उत् - वि - ईक्ष + ल्यप्। Nom.—जना: to be understood. For discussion, see Malli. Expl. 4.

उर्ध्वं:—अव्ययम्। Adjective.

महीभृताम् = महीं बिभर्ति इति महीभृत: ; मही - भृ + क्विप् - कर्त्तरि। ६ष्ठी बहु। Mountains are called महीभृत्, भूधर, गोत्र, &c., as they serve as bony tissues of the Earth.

ज्यायसीम्—प्रशस्य + ईयसुन्, स्त्रियां ङीप्। Opt. from—श्रेयसीम्।

मा गात् = मा + अगात् = न ईयात्। The लुङ् here is in the sense of आशी:। अगात् = इ(ण्) + लुङ् द्। The root इ (ण्) becomes गा in लुङ्। Rule 'इणो गा लुङि'।

केन = केन हेतुना। हेतौ ३या।

Ch. of Voice.—...तुङ्गतया...ज्यायसी प्रीति: मा गायि।

Questions.—Give the simple meaning of the Sloka. उद्वीक्ष्य—Find out the nom., and impugn or justify the use of ल्यप् here. Can you cite a similar example? उर्ध्वं:—Parse. मा गात्—Sense of लुङ् here ?

Prosperity, fame and manliness.

तावदाश्रीयते लक्ष्म्या तावदस्य स्थिरं यश:।
पुरुषस्तावदेवासौ यावन्मानान्न हीयते ॥६१॥

Prose.—तावत् [एव असौ] लक्ष्म्या आश्रीयते, तावत् [एव] अस्य यश: स्थिरं, तावदेव असौ पुरुष: यावत् मानात् न हीयते।

Bengali.—পুরুষ সেই পর্য্যন্তই লক্ষ্মীকর্ত্তৃক আশ্রিত হন, সেই পর্য্যন্তই তাহার যশঃ স্থির, এবং সেই পর্য্যন্তই তিনি পুরুষ, যে পর্য্যন্ত তিনি মান হইতে ভ্রষ্ট না হন। ৬১।

English.—Only so long is a man embraced by Lakshmi' (the goddess of prosperity) and only so long is his fame enduring and only so long is he a man, as long as he does not fail from self-respect. 81.

Ghantapatha.—तावदिति। किञ्च, 'तावदेव असौ लक्ष्म्या आश्रीयते 'तावत् अस्य पुंसो यशः स्थिरम्', 'तावदेव असौ पुरुषः'—पुरुषत्वेन गण्यत इत्यर्थः— 'यावत्' 'मानात्' अभिमानात् 'न हीयते' न भ्रश्यति। मानहीनस्य न किञ्चित् शुभम् अस्तीत्यर्थः ॥ ६१ ॥

Notes.

लक्ष्म्या—अनुक्त-कर्त्तृ of आश्रीयते। लक्ष्मी is the goddess of prosperity.

तावदेव असौ पुरुषः—ततः परं क्लीवः (impotent) इत्यर्थः।

यावत्, तावत्—Correlative अव्ययs in the sense of अवधि। 'यावत् तावच्च साकल्येऽवधौ मानेऽवधारणे'—इत्यमरः।

मानात्—अपादाने ५मी। It is really the nom. of the root हा। So, मानेन हीयते असौ was the original form ; cf. 'विरूपाक्षो जहे प्राणैः' —Bhatti 14. 35.

हीयते—The object (कर्म्म) असौ being put as the subject (कर्त्ता) the verb हीयते is to be taken in कर्म्मकर्त्तृवाच्य here.

Ch. of Voice.—...[अमुं] लक्ष्मीः आश्रयति...यशसा स्थिरेण [भूयते] ...अमुना पुरुषेण [भूयते]...[अमुना] न हीयते (भाववाच्ये)।

Questions. हीयते—Find out its nom. and discuss the voice.

Achievemet of the true object of birth.

स पुमानर्थवज्जन्मा यस्य नाम्नि पुरःस्थिते।
नान्यामङ्गुलिमभ्येति सङ्ख्यायामुद्यताङ्गुलिः ॥६२॥

Prose.—सः पुमान् अर्थवज्जन्मा यस्य नाम्नि पुरः स्थिते, संख्यायाम् उद्यता अङ्गुलिः अन्याम् अङ्गुलिं न अभ्येति।

Bengali.—সেই পুরুষই সার্থকজন্মা যাঁহার নাম সম্মুখে উপস্থিত থাকিলে, [মহাপুরুষগণের] সংখ্যাগণনোদ্যত অঙ্গুলি অন্য কোনও অঙ্গুলি প্রাপ্ত হয় না (অর্থাৎ প্রথমোক্ত অঙ্গুলির শ্রেণীতে আর কোনও অঙ্গুলি যোগ হয় না—অর্থাৎ প্রথমোক্ত অঙ্গুলি যাঁহাকে নির্দ্দেশ করিয়াছে তিনি অদ্বিতীয়) ॥৬২॥

English.—That man is of significant birth whose name being in the front (i. e. being taken note of), the finger engaged in counting the number [of great men] does not take in another finger [to its party]. 62.

Substance.—"यस्य नास्ति स्तुतीते अपरोऽपि तत्समः प्रतीयते तस्य निरर्थकं जन्म" ।—Sáràvali.

Ghantapatha.—स इति । 'स पुमान्' 'अर्थवज्जन्मा' सार्थकजन्मा 'यस्य' पुंसो 'नाम्नि' 'पुरः' अग्रे 'स्थिते' सति 'संख्यायां' पुरुषगणनाप्रस्तावे 'उद्यता' गुणम् अधिकृत्य उन्नमिता (1) 'अङ्गुलिः' अन्यां द्वितीयाम् अङ्गुलिम् "उद्यताम्" इति शेषः । 'न अभ्येति' न प्राप्नोति, अद्वितीयत्वात् अस्य इत्यर्थः (2)। एतत् मानरहितस्य न सम्भवतीति भावः ॥ ६२ ॥

Malli. Explained.

1. गुणमधिकृत्य उन्नमिता—Raised up [for classification] in order of merit. N. B. The counting here is intended to be done with fingers, not with finger-joint as we generally do.

2. अद्वितीयत्वात् अस्य—Because this man is without an equal. [That is, he forms a class by himself].

Notes.

अर्थवज्जन्मा—अर्थः विद्यते अस्य इति अर्थवत् (=सार्थकं) ; अर्थवत् जन्म यस्य सः अर्थवज्जन्मा—बहुव्रीहिः ।

नाम्नि—भावे ७मी ।

Ch. of Voice.—तेन पुंसा अर्थवज्जन्मना [भूयते] उद्यतया अङ्गुल्या । अन्या अङ्गुलिः न अभीयते ।

Question.—Expl. the Sloka.

Position loftier even than that of peaks.

दुरासदवन-ज्यायान् गम्यस्तुङ्गोऽपि भूधरः ।
न जहाति महौजस्कं मानप्रांशुमलङ्घ्यता ॥६३॥

Eng. Equiv. दुरासद—impenetrable. ज्यायान्—huge.

Prose.—दुरासदवनज्यायान् तुङ्गोऽपि भूधरः गम्यः । महौजस्कं मानप्रांशुम् [पुरुषम्] अलङ्घ्यता न जहाति ।

Bengali.—দুর্গম বন দ্বারা প্রবৃদ্ধ উচ্চ পর্ব্বতও লঙ্ঘনীয় হইতে পারে (অর্থাৎ অলঙ্ঘনীয় নহে), কিন্তু প্রতাপশালী মানোন্নত পুরুষকে অলঙ্ঘ্যতা ত্যাগ করে না (অর্থাৎ তাদৃশ পুরুষ কখনও লঙ্ঘনীয় হয় না) । ৬৩ ।

English.—Even a lofty mountain huge on account of impenetrable forest can be got over, but the insurmountable character never quits a man of prowess, lofty with a sense of self-respect. 63.

Ghantapatha.—दुरासदेति। 'दुरासदैः वनैः' 'ज्यायान्' प्रवृद्धः तथापि (1) 'तुङ्गेऽपि भूधरी' 'गम्यः' गन्तुं शक्य एव--प्रसिद्धं च एतदिति भावः। 'महौजस्कं' प्रतापसम्पन्नं 'मानप्रांशु'' मानोन्नतं "पुरुषम्" इति शेषः अलङ्घ्यता न जहाति, न कदाचित् मानी लङ्घयितुं शक्यते इत्यर्थः। गिरेः अपि गरीयान् मानाधिक इति भावः। अत्र उपमानात् भूधरात् उपमेयस्य मानिनो धर्मान्तरसाम्ये अलङ्घ्यत्वेन आधिक्य-कथनात् व्यतिरेकालङ्कारः (2) ॥ ६३ ॥

Malli. Explained.

1. तथापि—[This is connected with गम्यः below].

2. अत्र &c.—Here the उपमेय viz. मानिन् though similar to the उपमान viz. भूधर in all other qualities, has got the quality of अलङ्घ्यत्व in *excess*; hence, the fig. of speech is व्यतिरेक।

[The def. is—

"आधिक्यमुपमेयस्योपमानान्न्यूनताथवा।
व्यतिरेकः——"]

Notes.

दुरासदवनज्यायान्—दुःखेन आसद्यन्ते इति दुरासदानि—दुर् – आङ् – सद् + खल् —कर्मणि। दुरासादानि वनानि—कर्मधा, तैः (हेतुभिः) ज्यायान्—३तत्।

गम्यः—Surmountable.

महौजस्कम्—महत् ओजः यस्य सः = महौजस्कः (or महौजाः)—बहुव्रीहिः, तम्। कप् (समासान्त) is optional by the rule 'शेषाद् विभाषा'। Opt. form—महौजसम्।

मानप्रांशुम्—मानेन प्रांशुः—३तत्, तम्। प्रांशुः—प्रगताः अंशवः (= किरणाः) यस्य सः—बहुव्रीहिः; one having a lofty position.

Ch. of Voice.—......ज्यायसा तुङ्गतापि भूधरेण गम्येन [भूयते]। महौजस्को मानप्रांशुः [पुरुषः] अलङ्घ्यतया न हीयते।

Question. दुरासद &c.—S.

Fame giving a unique position.

गुरून् कुर्वन्ति ते वंश्यानन्वर्था तैर्वसुन्धरा।
येषां यशांसि शुभ्राणि ह्रेपयन्तीन्दुमण्डलम् ॥ ६४

Prose.—ते वंश्यान् गुरून् कुर्वन्ति। तैः वसुन्धरा अन्वर्था, येषां शुभ्राणि यशांसि इन्दुमण्डलं ह्रेपयन्ति।

Bengali.—তাঁহারা স্ববংশীয়গণের গৌরবসাধন করেন, [বসুস্বরূপ অর্থাৎ রত্নস্বরূপ] তাঁহাদের জন্য বসুন্ধরা নাম সার্থক, যাঁহাদের শুভ্র যশঃ ইন্দুমণ্ডলকেও লজ্জিত করে ॥৬৪॥

English.—Those make the people born in their clan great, and by them is the name বসুন্ধরা (applied to Earth) significant whose white fame puts even the lunar orb into shade. **64.**

Ghantapatha.—गुरूनिति । 'ते' नराः 'वंश्यान्' अन्वयभवान् 'गुरून् कुर्वन्ति' प्रथयन्ति,—स्वनाम्ना व्यपदेशयन्ति रघुदिलीपादिवत् (1) इत्यर्थः ; 'तैः' नरैः, 'वसूनि' धनानि धारयतीति (क) वसुन्धरा ["संज्ञायां भृतृवृजि—" इत्यादिना खच्-प्रत्यये "खचि ह्रस्वः" इति ह्रस्वात् नुमागमश्च [मुमागमश्च ?] (2) ।] 'अन्वर्था' अनुगतार्था, तेषां वसुभूतानां धारणादिति भावः (3) ; 'येषां शुभ्राणि यशांसि' इन्दुमण्डलं 'ह्रेपयन्ति' लज्जयन्ति, यशसो निष्कलङ्कत्वादिति भावः (4) । ईदृशं हि यशो मान-महतः (5) एव सम्भवतीति तात्पर्य्यार्थः । ह्रीधातोर्ण्यन्ताल्लट् । "अर्त्तिह्री—" इत्यादिना पुगागमः (6) । अत्र ह्रेपणस्य सादृश्य-पर्य्यवसानात् उपमालङ्कारः (7) ॥६४॥

Malli. Explained.

1. स्वनाम्ना &c.—Make them known by their own names like Raghu, Dilipa and others.

2. संज्ञायां &c.—[वसुन्धरा is वसु – धृ + णिच् + खच्] by the rule 'संज्ञायां भृ-तृ-वृ-जि-धारि-सहि-तपि-दमः' ।

The affix खच् following, the penult (उपधा) becomes ह्रस्व by the rule 'खचि ह्रस्वः', and the augment मुम् comes in [by the rule 'अरुर्द्विषदजन्तस्य मुम्']. [Thus—विश्वम्भरा, रथन्तरं साम, पतिंवरा, शत्रुञ्जयः, युगन्धरः, सर्वंसहा, शत्रुन्तपः, अरिन्दमः].

N. B. नुमागमश्च in Malli. is evidently a copyist's mistake for मुमागमश्च ।

3. तेषां वसुभूतानां &c.—Because she holds [in her bosom] those people who are like unto gems.

4. यशसः &c.—Because their fame is निष्कलङ्क [whereas

(क) धरति for धारयति—all except B. But the rule quoted demands णिच् ।

इन्दुमण्डल is tainted with a कलङ्क, viz. that of गुरुपत्नीगमन on the part of चन्द्र].

5. मानमहतः—मानेन महान् इति मानमहान्, तस्य ।

6. क्रीणाती: &c.—क्रापयति is—क्री+णिच्+लट् । The प comes in by the rule 'अर्ति-क्री' &c.

7. अत्र &c.—Here, क्रापण is tantamount to सादृश्य (resemblance). So, the fig. of speech is उपमा ।

N. B. We quote from दण्डिन् who gives a long list of expressions denoting resemblance :—

प्रतिपक्ष-प्रतिद्वन्द्वि-प्रत्यनीक-विरोधिनः ।
स्पर्द्धते जयति द्वेष्टि द्रुह्यति प्रतिगर्जति ॥
आक्रोशत्यवजानाति कदर्थयति निन्दति ।
विडम्बयति सन्धत्ते हसतीर्ष्यत्यसूयति ॥
तस्य मुष्णाति सौभाग्यं तस्य कान्तिं विलुम्पति ।
तेन सार्द्धं विगृह्णाति तुलां तेनाधिरोहति ।
तस्य चानुकरोतीति शब्दाः सादृश्यसूचकाः ॥

Notes.

गुरून् कुर्वन्ति—We might express it as गरयन्ति (with णिच् added to the word गुरु by the rule 'तत् करोति तदाचष्टे'). Some read—गुरुकुर्वन्ति (with च्वि).

वंश्यान्—वंशे भवाः, तान् । वंश+यत् in the sense of 'तत्र भवः' । Here both descendants and fore-fathers are meant.

अन्वर्था—अनुगतः अर्थः यस्याः सा—बहुव्रीहिः by the Vārttika 'प्रादिभ्यो धातुजस्य &c.'

तैः—हैतौ ३या ।

वसुन्धरा—वसूनि धारयति इति वसु+धृ+णिच्+खच्—कर्त्तरि । For rules and formation, see Malli. Expl. 2.

क्रापयन्ति—क्री+णिच्+लट् अन्ति ।

इन्दुमण्डलम्—इन्दोः मण्डलम्—६ तत् ।

Ch. of voice.—तैः वंश्याः गुरवः क्रियन्ते......वसुन्धरया अन्वर्थया भूयते शुभ्रैः यशोभिः इन्दुमण्डलं (१मा) क्राप्यते ।

Questions. गुरुन् कुर्वन्ति—Replace it by a single word. वसुन्धरा—D. कर्पयन्ति—Expl. and cite some other similar expressions.

Foremost position among respectable persons.

उदाहरणमाशीःषु प्रथमे ते मनस्विनाम् ।
शुष्केऽशनिरिवामर्षो यैरारातिषु पात्यते ॥६५॥

Eng. Equiv. आशिस्—desire; here, desirable conduct. प्रथम—foremost. अशनि—thunder-bolt. अमर्ष—wrath. अराति—enemy.

Prose.—यैः अमर्षः शुष्के [द्रव्ये] अशनिः इव अरातिषु पात्यते, मनस्विनां प्रथमे ते आशीःषु उदाहरणम् [भवन्ति] ।

Bengali.—যাঁহারা, শুষ্কদ্রব্যে বজ্রের ন্যায়, শত্রুগণের উপরি ক্রোধ নিক্ষেপ করেন মানিগণের অগ্রগণ্য তাঁহারা উৎকৃষ্ট চরিত্রের আদর্শ হইয়া থাকেন। ৬৫।

English.—Those who can let fall their wrath on their enemies, like thunder-bolt on a dry thing, become ideals of desirable conduct. 65.

Ghantapatha.—उदाहरणमिति । 'यैः' 'अमर्षः' क्रोधः 'शुष्के' नीरसे 'अशनिरिव' 'अरातिषु' विषये 'पात्यते' प्रक्षिप्यते 'मनस्विनां' मानिनां 'प्रथमे' अग्रेसराः 'ते' 'आशीःषु—पुरुषैरेवं भवितव्यमेवंरूपासु (1)—'उदाहरणं" निदर्शनं "भवन्ति" इति शेषः ।—रामादिवत् उपमानं भवन्तीत्यर्थः । अतो न त्याज्यो मान इति सन्दर्भार्थः (2) ॥ ६५ ॥

Malli. Explained.

1. आशीःषु &c.—"A man should be of such conduct"—this is the meaning of आशिस् here.

2. सन्दर्भार्थः—The meaning of the passage (here consisting of six slokas 60—65).

Notes.

आशीःषु—The base is आशिस् which means benediction, blessing. For the exact meaning here, see Malli. 1.

प्रथमे—Optionally सर्व्वनाम in जस् (१मा बहु) । So, प्रथमाः is another form.

शुष्के—द्रव्ये इति शेषः। The propriety of this adjective here is that a शुष्क thing is more readily consumed than an अशुष्क thing.

अरातिषु—विषये ७मी।

Ch. of Voice.—यै अमर्षं शुष्के अशनिमिव अरातिषु पातयन्ति,......प्रयत्नैः तैः उदाहरणेन [भूयते]।

Questions. उदाहरणमाशीःषु—Expl. आशिस्—M. & Decline.

I desire neither objects of sensual enjoyment, nor wealth, nor salvation,

न सुखं प्रार्थये नार्थमुदन्वद्वीचिचञ्चलम्।
नानित्यताशनेस्त्रस्यन् विविक्तं ब्रह्मणः पदम्॥६६

Eng. Equiv. उदन्वत्—sea. वीचि—wave. अनित्यताशनि—the thunder-bolt of transitoriness. विविक्त—pure; secluded: hence, (here) undisturbed.

Prose.—उदन्वद्वीचिचञ्चलं सुखं न प्रार्थये; अर्थं न [प्रार्थये]; अनित्यताशनेः त्रस्यन् विविक्तं ब्रह्मणः पदं [च] न [प्रार्थये]।

Bengali.—আমি সমুদ্রতরঙ্গবৎ চঞ্চল বিষয়-সুখ প্রার্থনা করি না, চঞ্চল অর্থও প্রার্থনা করি না, এবং অনিত্যতারূপ বজ্রপাতের ভয়ে ভীত হইয়া নির্ব্বাধ ব্রহ্মপ্রাপ্তিও প্রার্থনা করি না। ৬৬।

English.—I do not desire [the objects of sensual] enjoyment, unsteady like the waves of the sea, nor wealth [equally unsteady]. Nor do I desire the undisturbed goal of Brahman for fear of the thunder-bolt of transitoriness [of other things]. 66.

Elucidation.—Human ends (पुरुषार्थ) are four in number (चतुर्वर्ग)—धर्म्म, अर्थ, काम and मोक्ष। Arjuna says that he does not hanker after any of the last three. He wants to pursue only the first item—viz. धर्म्म (see next sloka). [Also see Notes on अनित्यताशनेस्त्रस्यन्]।

Ghantapatha.—यदुक्तम् "अभिद्रोहेण भूतानाम्" (Sl. 21) इत्यादि तत्र पुरुषार्थान्तरमाह (1)—नेत्यादि। 'उदन्वद्वीचिः' इव 'चञ्चलं' समुद्रतरङ्गवत् अस्थिरं 'सुखं' कामं 'न प्रार्थये' न इच्छामि, तथा (2) चञ्चलम् 'अर्थञ्च' 'न प्रार्थये'।

विश्व, 'अनित्यतो' विनाशिता सैव 'अशनिः' तस्मात् 'त्रसन्' बिभ्यत् ["वा भ्राश—" इत्यादिना श्यन्प्रत्ययः (3)], 'विविक्तं' निर्बाधं 'ब्रह्मणो' वेधसः—आत्मनः, पदमिति 'पदं' स्थानम् ऐक्यलक्षणं—मुक्तिञ्च—न प्रार्थये। एतेन यदुक्तम् "उच्छेदं जन्मनः कर्त्तुम्" (Sl 31) इत्यादिना तत् समाहितम् (4) ॥ ६६ ॥

Malli. Explained.

1. युग्मेन &c.—Gives the reply in a couple (युग्म) of slokas.

2. तथा—'Similarly'which may be construed here in two ways :—(i) similarly न प्रार्थये, and (ii) similarly चञ्चलम्।

3. वा भ्राश &c.—The roots भ्राश, भ्रम, &c. take श्यन् (= य) (like दिवादिगणीय roots) optionally. [Thus, भ्राशते, भ्राश्यते ; भ्रमति, भ्राम्यति ; क्रामति, क्राम्यति ; त्रसति, त्रस्यति ; &c.]

4. समाहितम्—Solved.

Notes.

उदन्वद्वीचिचञ्चलम्—उदकं विद्यते अस्य इति उदन्वान् (the base is उदन्वत्) by the rule 'उदन्वान् उदधौ च'। (See Sl. 21). उदन्वतः वीचयः (= तरङ्गाः)—६तत्, ताः इव चञ्चलम् (सुखं), and चञ्चलः (अर्थः), सम्—उपमान-समासः। Adj. to सुखम् and अर्थम्। चञ्चल is derived as—चञ्च + अलच्—कर्त्तरि(औणादिकः)। (N. B. The root चल with यङ् gives the form चाचल्यते and not चञ्चल्यते)।

अनित्यताशनेः—अनित्यता एव अशनिः—रूपक, तस्मात्। ५मी in अपादान by the rule 'भीत्रार्थानां भयहेतुः'।

अनित्यताशनेस्त्रसन् &c.—हरिदास, the author of the commentary called सारावली, puts the sense very cleary as follows :—'य हि अनित्यताशनेर्भीतो भवति स हि मुक्तिं याचते, अहं च तस्मान्न भीतः, अविरतत्वात्'।

N. B. There are 5 kinds of मुक्ति :—सार्ष्टिता सालोक्य, सारूप्य, सायुज्य, and निर्वाण। The last of these, viz. निर्वाण, is enternal मुक्ति, and the former ones are अनित्यमुक्ति.

A reference to निर्वाण occurs a few Slokas later (viz. in Sl. 69). It is not clear whether by ब्रह्मणः पदम् in the present Sloka the poet means सालोक्यम् (or सार्ष्टिता) (viz. with चतुर्मुख-ब्रह्म)

or निर्वाणम्। In the former case, the charge of अनित्यता falls on ब्रह्मणः पदम्, and, in the latter, on things *other than* ब्रह्मणः पदम्। Even Mallinátha's language is ambiguous throughout (cf. ब्रह्मणः वेधसः आत्मनः and स्थानम् ऐकान्तिकं मुक्तिम्) except in the last sentence where he says that the present Sloka is a reply to the advice for annihilation of birth contained in Sl. 31. This makes him clearly refer to निर्वाण in which case Mallinátha's use of the words वेधस् (In the sense of परमात्मन्) and स्थान (which generally means 'region' or 'rank') has not at all been happy.

A more natural course perhaps would be to make the expression ब्रह्मणः पदम् in the present Sloka refer to अनित्यमुक्ति (i. e. सार्ष्टिता or सालोक्य) reaching the climax in Sl. 69 which refers to निर्वाण or नित्यमुक्ति।

विविक्तम्—वि – विच + क्त—कर्म्मणि। 'विविक्तौ पूत-विजनौ'—इत्यमरः। Hence, undisturbed.

पदम्—पद्यते यत् तत् पदम्। पद + घञ् – कर्म्मणि। 'संज्ञापूर्व्वकत्वात् वृद्ध्यभावः' इति भानुजिः। Or, we may add घ (instead of घञ्) in अधिकरणवाच्य by the rule 'पुंसि संज्ञायां घः प्रायेण' [करणाधिकरणयोः वाच्ययोः]। Though घञन्त or घान्त, the word is neuter by a special rule of लिङ्गानुशासन। 'पदं व्यवसित-त्राण-स्थान-लक्ष्माङ्घ्रि-वस्तुषु'—इत्यमरः।

Ch. of Voice.—चञ्चलं सुखं (१मा) [मया] न प्रार्थ्यते, [चञ्चलः] अर्थश्च न।...नश्यता विविक्तं...पदं [च न प्राथ्यते]।

Questions. नानित्यताशनेः &c.—Expl. विविक्तम्—M.

but virtue (धर्म) (prescribed for a Kshattriya).

प्रमार्ष्टुमयशःपङ्कमिच्छेयं छद्मना कृतम्।
वैधव्यतापितारातिवनितालोचनाम्बुभिः ॥६७॥

Eng. Equiv. छद्म—craft ; art ; deception.

Prose.—[किन्तु], [शत्रुभिः] छद्मना कृतम् अयशःपङ्कं वैधव्यतापितारातिवनितालोचनाम्बुभिः प्रमार्ष्टुम् इच्छेयम्।

Bengali.—[কিন্তু], [শত্রুগণকর্তৃক] ছলপূর্ব্বক কৃত অযশঃপঙ্ক, বৈধব্যতাপিত শত্রুবনিতাগণের অশ্রু দ্বারা ক্ষালন করিতে চাহি। ৬৭।

English.—But I want to wash away the mud of infamy thrown at us craftily [by the ennemies] with the tears of their wives afflicted by widowhood. 67.

Elucidation.—I will have nothing but Dharma which prescribes for me, a Kshattriya, the complete destruction of enemies. I must, therefore, kill my enemies and see that their widowed wives are crying impatiently with tears in their eyes. The enemies have thrown much mud at our person by making us subjected craftily to various discomfitures. The tears of their wives may be expected to wash it.

Ghantapatha.—प्रमार्ष्टुमिति। किन्तु 'छद्मना' कपटेन 'कृत'' अरिभिः इति शेषः, 'अयशः' एव 'पङ्कम्' इति रूपकालङ्कारः, 'वैधव्येन' 'तापितानां' दुःखीकृतानाम् (1) 'अरातिवनितानां' 'लोचनाम्बुभिः' 'प्रमार्ष्टुं'' क्षालयितुम् 'इच्छेयम्' अभिलषेयम्। इच्छिधातोर्लिङि रूपम्।—वैरिनिर्यातनातिरिक्तं न किञ्चित् इच्छामीत्यर्थः॥ ६७॥

Malli. Explained.

1. दुःखीकृतानाम्—दुःखिन् + च्वि + कृ + क्त।

Notes.

In the preceding sloka Arjuna said that he would have none of अर्थ, काम and मोक्ष। In the present sloka he says that he will have धर्म alone. The action proposed is in full conformity with the rules of conduct prescribed for a Kshattriya.

प्रमार्ष्टुम् – प्र – मृज + तुमुन्। Opt. from—प्रमष्टुम्। Conj—मार्ष्टि; मृष्टः; मृजन्ति, मार्जन्ति; अमार्ट्; अमार्क्षीत्; ममार्ज।

छद्मना—३या १व of छद्मन्। 'कपटोऽस्त्री व्याजदम्भोपधयश्छद्म-कैतवे'—इत्यमरः।

वैधव्यतापितारातिवनितालोचनाम्बुभिः—विधवायाः भावः इति वैधव्यम्। वैधव्येन तापिताः—३तत्। अरातीनां वनिताः—६तत्। वैधव्यतापिताः अरातिवनिताः—

कर्म्मधा। लोचनस्य अम्बुनि—६ तत्। वैधव्यतापिताराति वनितानां लोचनाम्बुनि—६तत्, तैः। करणे ३या।

Ch. of Voice—...पङ्कम् (१मा)...इयेत।

Question.—Give the simple meaning of the Sloka.

I am prepared to face the ridicule of the world.

अपहस्येऽथ वा सद्भिः प्रमादो वास्तु मे धियः।
अस्थानविहितायासः कामं जिह्रेतु वा भवान्॥६८

Eng. Equiv. प्रमाद—carelessness.

Prose.—अथ [अहं] सद्भिः अपहस्ये वा। मे (= मम) धियः प्रमादः वा अस्तु, अस्थानविहितायासः भवान् कामं जिह्रेतु।

N. B. Regarding the expression of अथवा we have differed a little from Mallinátha.

Bengali.—তাহাতে, আমি সাধুগণ কর্ত্তৃক উপহসিত হই হইব, আমার বুদ্ধির অনবধানতা হইতেছে হউক, এবং আপনি অস্থানে [হিতোপদেশ] প্রয়াস করায় লজ্জিত হইতে হইলে হইবেন। ৬৮।

English.—As a result, let me be ridiculed by the good, and let there be [a charge of] carelessness on the part of my intellect, and let you be ashamed on account of your efforts placed in a wrong object. 68.

Ghantapatha—एवं तर्हि "यः करोति वधोदर्काः" (Sl. 19) इत्युक्तदोषः स्यात् इत्याशङ्काम् अङ्गीकृत्य "ग्लानिर्न दोषाय" इति न्यायमाश्रित्य युग्मेनोत्तरमाह (1)—अपहस्य इत्यादि। 'अथ वा' 'सद्भिः' पण्डितैः 'अपहस्ये' अपहसिष्ये इत्यर्थः। ["वर्त्तमानसामीप्ये वर्त्तमानवद्वा" इति भविष्यति कर्म्मणि (क) लट्; यगन्तस्तु भ्रान्तः पाठः (3)। 'मे धियः' 'प्रमादः' अनवधानत्वं 'वा अस्तु'। 'भवान्' अपि [वा ?] 'अस्थाने' अयोग्यविषये 'विहितः' 'आयासः' हितोपदेशप्रयासो येन स तथोक्तः विफलप्रयत्नः सन् इत्यर्थः 'कामं' 'जिह्रेतु' लज्जताम् ॥६८॥

Malli. Explained.

1. एवं तर्हि &c.—If so, (i. e. if you insist on having the destruction of your enemies as the fruit of your austerities)

(क) भविष्यति &c.—Omitted in J.

then the objection mentioned in Sl. 19—viz. यः करोति वधोदर्काः &c.—would come in. Prepared to shoulder this objection he gives the following reply couched in a couple of Slokas giving out the view that infamy will not be objectionable to him.

N. B. We would be induced to suggest the following reading—उत्तदोषः स्यात् इत्याशङ्क्य "अङ्गीकृत्य ग्लानिं न दोषाय" इति न्यायम् आश्रित्य &c. But the Sloka does not contain any explicit reference to अङ्गीकार।

2. वर्त्तमानसामीप्ये - अपहस्ये is in कर्मवाच्य of the root हस्, not णिजन्त, in लट्। The present tense is used [here in the sense of the near future] by the rule 'वर्त्तमानसामीप्ये वर्त्तमानवत् वा'।

3. अपहस्ये &c.—The णिजन्त reading (viz.—अपहास्ये) [in place of अपहस्ये] is erroneous.

N. B. Instead oi characterising it (अपहास्ये) as erroneous Malli. should have made out a very good sense by deriving it from the root—हा + लृट् सेः—कर्मवाच्य ;—let me be abandoned by the good.

Notes.

अपहस्ये = अपहसिष्ये । अप - हस + लट् ए—कर्मवाच्ये in the sense of लृट्। If the reading be अपहास्ये then the derivation should be—अप - हा + लृट् स्ये —कर्मवाच्ये ।

अथवा—As the present Sloka does not give the *other* side of the case dealt with in the previous one, but dilates on the result of the action propcsed in the same, we split the expression अथवा into two parts—अथ and वा—instead of taking it in the ordinary sense.

अथ—अनन्तरम् ; hence, *as a result.*

वा—These वाs are better taken here in the sense of च।

N. B. When more than one case is considered, the words च and वा may be used only once, or they may be

repeated (as in the present instance) as many times as the number of cases under consideration.

प्रमादः—'प्रमादोऽनवधानता'—इत्यमरः ।

अस्थानविहितायासः—अस्थाने विहितः—७तत्, अस्थानविहितः आयासः यस्य सः—बहुव्रीहिः । Adj. to भवान् ।

कामम् – 'कामं प्रकामेऽनुमतौ'—इत्यमरः । Here अनुमतौ ।

जिह्रीतु—ह्री + लोट् तु ।

Ch. of Voice.—...सन्तः मां अपहसन्ति,...प्रमादेन भूयताम्,..... विहितायासेन भवता ह्रीयताम् ।

Questions. अपहस्ये—Grammar, and discuss the reading. प्रमाद—M.

Victory is my only end. Even salvation will be an obstacle.

वंशलक्ष्मीमनुद्धृत्य समुच्छेदेन विद्विषाम् ।
निर्वाणमपि मन्येऽहमन्तरायं जयश्रियः ॥६९॥

Prose.—विद्विषां समुच्छेदेन वंशलक्ष्मीम् अनुद्धृत्य निर्वाणम् अपि अहं जयश्रियः अन्तरायं मन्ये ।

Bengali.—শত্রুগণের সম্যক্ বিনাশ দ্বারা বংশলক্ষ্মীর উদ্ধার না করা পর্য্যন্ত আমি মুক্তিকেও জয়শ্রীর বিঘ্ন বলিয়া মনে করি । ৬৯ ।

Bengali.—Before I have delivered up the goddess of Prosperity of my family I regard even salvation as a hindrance to (the achievement of) the goddess of Victory. 69

Ghantapatha.—वंशेति । 'अहं' तु 'विद्विषां' शत्रूणां 'समुच्छेदेन' विनाशेन कारणेन 'वंशलक्ष्मीम्' अनुद्धृत्य' पुनरावर्त्य 'निर्वाणं' मोक्षम् 'अपि' 'जयश्रियः', 'अन्तरायं विघ्नं' 'मन्ये' न तु पुरुषार्थम् इत्यर्थः । किमुत अन्योत्सवादिकम् इति भावः ॥६९॥

Malli. Explained.

1. विघ्नं न तु पुरुषार्थम्—I regard it as a hindrance to victory and not as a human end [fit to be pursued.].

2. किमुत &c.—Not to speak of other jubilations.

Notes.

वंशलक्ष्मीम्—वंशस्य लक्ष्मीः, ताम् ।

जयश्रियः—जयस्य श्रीः, तस्याः । Another form—जयश्रियाः ।

निर्वाणम्—'निर्वाण' निर्वृतौ मोक्षे विनाशे गजमज्जने'—इति यादवः।
अन्तरायम्—अन्तरम् [मध्ये] एति इति अन्तर – अय + अच्—कर्त्तरि।
Ch. of voice.—...निर्व्वाणमपि मया...अन्तरायेण मन्यते।

A man who cannot kill his enemies is good for nothing.

अजन्मा पुरुषस्तावत् गतासुस्तृणमेव वा
यावन्नेषुभिरादत्ते विलुप्तमरिभिर्यशः ॥ ७० ॥

Prose.—पुरुषो यावत् अरिभिः विलुप्तं यशः इषुभिः न आदत्ते तावत् अजन्मा, गतासुः [वा], तृणमेव वा।

Bengali.—পুরুষ যে পর্য্যন্ত না শত্রু কর্ত্তৃক বিলুপ্ত যশ বাণ দ্বারা পুনরানয়ন করে সে পর্য্যন্ত অজাতপ্রায়, অথবা মৃতপ্রায়, অথবা তৃণতুল্য। ৭০।

English—A man, until he can bring back with his arrows the fame destroyed by his enemies, is as good as yet unborn, or dead or a grass. 70.

Ghantapatha.—ननु अयं ते दुराग्रहः (1) इत्यत आह—अजन्मेति। 'पुरुषो' 'यावत्' 'अरिभिः' 'विलुप्त'' संहृतं 'यशः' 'इषुभिः न आदत्ते' अचिरेण न आहरति इत्यर्थः। 'तावत्' 'अजन्मा' अजातप्राय इत्यर्थः। ननु अजातोऽपि जननानन्तरम् उपयुज्यत एवेति अरुच्या पक्षान्तरमाह (2)—'गतासुः' मृतो मृततुल्य इत्यर्थः। मृतोऽपि प्राक् उपयुक्तवान् इति अरुच्याह (3)—तृणमेवेति। तृणतुल्य इत्यर्थः। अकिञ्चित्करस्तु त्रैकाल्यानुपयोगात् जीवन्मृत इत्यर्थः (4)। अतो न अहमाग्रहात् ब्रवीमि, वीरधर्मम् अनुपालयामि इति भावः ॥७०॥

Malli. Explained.

1. अजातोऽपि &c.—One who is yet unborn may be of some good after birth. [But thts is not true in the present case. For, he is really born already]. Hence, the previous statement being not satisfactory he makes a different statement. [उपयुज्यते = उपयुक्तो भवति.]

2. जातोऽपि &c.—One who is dead was of some good before. So, this being unsatisfactory, he says—.

3. अकिञ्चित्करस्तु &c.—An insignificant fellow being of no good at all the three times (past, present, future) is like unto a dead man though alive.

अजन्मा—अविद्यमानं जन्म यस्य स अजन्मा—बहुव्रीहि: ।

गतासु:—गता: असव: (= प्राणा:) यस्य स:—बहुव्रीहि: । The word असु is पुं and always plural. 'पुंसि भूम्न्यसव: प्राणा:'—इत्यमर: ।

Ch. of Voice.—पुरुषेण...न आद्रीयते...अजन्मना [भूयते] गतासुना तृणेन वा [भूयते] ।

Question. ननु अजातोऽपि (Malli.)—Translate.

Such a being is not a man at all.

अनिर्जयेन द्विषतां यस्यामर्ष: प्रशाम्यति ।
पुरुषोक्ति: कथं तस्मिन् ब्रूहि त्वं हि तपोधन ॥७१

Prose.—यस्य अमर्ष: द्विषताम् अनिर्जयेन प्रशाम्यति तस्मिन् पुरुषोक्ति: कथं [प्रवर्त्तते] हे तपोधन ! त्वं हि ब्रूहि ।

Bengali.—শত্রুজয় বিনা যাহার ক্রোধ শান্ত হয় তাহাতে 'পুরুষ' শব্দ কিরূপে প্রযুক্ত হইতে পারে, হে তপোধন, আপনিই বলুন । ৭১ ।

English.—To one whose wrath subsides before subduing the enemy how can the epithet পুরুষ (man) be applied, I would request *you* to tell me. 71.

Ghantapatha.—सर्व्वथा वैरनिर्य्यातनं कर्त्तव्यम् इत्युक्तं, तदकरणे पुरुषगुणानां हानिदोषमाह (1)—अनिर्जयेनेति । 'यस्य' 'अमर्ष:' क्रोधो 'द्विषतां' शत्रूणाम् 'अनिर्जयेन' निर्जयं विना एव 'प्रशाम्यति' [उपलक्षणे तृतीया ।] 'तस्मिन्' 'पुरुष इत्युक्ति:' पुरुषशब्द: 'कथं' न कथञ्चित् इत्यर्थ: । "प्रवर्त्तते" इति शेष:, प्रवृत्तिनिमित्तस्य पुरुषकारस्य अभावात् (2) इति भाव: । 'हे तपोधन' 'त्वं हि' त्वमेव 'ब्रूहि' कथय' न च ते किञ्चित् अविदितम् अस्तीति भाव: । "हि हेताववधारणे" इत्यमर: ॥ ७१ ॥

Malli. Explained.

1. हानिदोष—The fault of defect ; i.e. the defect.

2. प्रवृत्तिनिमित्तस्य पुरुषकारस्य अभावात्—Because the connotation [of the word पुरुष—man, viz. पुरुषकार (manliness)] is absent.

Notes.

अनिर्जयेन—न निर्णयः—नञ् तत्, तेन। करणे ३या।

द्विषताम्—कर्मणि ६ष्ठी।

Ch. of Voice.—......अमर्षेण...प्रशाम्यते...पुरुषोक्त्या [प्रवृत्यते]......त्वया हि उच्यताम्।

Questions. प्रवृत्तिनिमित्तस्य &c. (Malli.)—Translate into English.

A true man is one who is admired by the good.

कृतं पुरुषशब्देन जातिमात्रावलम्बिना।
योऽङ्गीकृतगुणैः श्लाघ्यः सविस्मयमुदाहृतः ॥७२॥

Eng. Equiv. कृतम्—enough ; no more of. अङ्गीकृतगुणाः (बहुव्रीहि)—adj.—supporters of merits. उदाहृत—mentioned.

Prose.—जातिमात्रावलम्बिना पुरुषशब्देन कृतम्। अङ्गीकृतगुणैः (=गुणपक्षपातिभिः) [जनैः] यः श्लाघ्यः [सन्] सविस्मयम् उदाहृतः [स पुमान् पुमान्—from Sl. 73]

Bengali.—জাতিমাত্র-প্রকাশক পুরুষ শব্দ অকিঞ্চিৎকর। গুণপক্ষপাতী সাধুগণ কর্তৃক যিনি সম্মানের সহিত কথিত হইয়া থাকেন, সেই পুরুষই [প্রকৃত] পুরুষ। ৭২।

English.—The word पुरुष as expressive of the class is insignificant. A man who is honourably mentioned with admiration by the supporters of merit is a [true] man. 72.

Ghantapatha.—ननु पुरुषत्वजात्यैव पुरुषोक्तिप्रवृत्तेः किं पुरुषकारेण ? तत्राह (1)—कृतमित्यादिना द्वयेन। 'जातिमात्रावलम्बिना' जातिमात्राभिधायिना 'पुरुषशब्देन' 'कृतम्' अलं—न तेन किञ्चित् साध्यते इत्यर्थः। [अत्र गम्यमानसाधनक्रियापेक्षया करणत्वात् तृतीया इत्युक्तं प्राक् (2)। कृतमिति निषेधार्थम् अव्ययं चादिषु पठ्यते (3)]।—सत्यं जातिमात्रेऽपि पुरुषशब्दः प्रवर्त्तते, परन्तु न असौ पुंसाम् आशास्यः पश्वादिसाधारण्यात् इति तात्पर्य्यार्थः (4)। तर्हि कीदृक् श्लाघ्य इत्याशङ्क्याह —य इत्यादिना अर्धद्वयेन (5)। 'अङ्गीकृतगुणैः' गुणपक्षपातिभिः 'यः पुमान्' इति 'श्लाघ्यः' स्तुत्यः सन् 'सविस्मयं' ससम्भ्रमम् 'उदाहृतः' कथितः, पुंसा ईदृशेन भवितव्यम् इति निदर्शितः ॥ ७२ ॥

Malli. Explained.

1. ननु &c.—Well, the word may be applied to one belonging to a class possessing the property of पुरुषत्व । So, what is the utility of insisting on पुरुषकार [to be possessed by a पुरुष] ?

2. अत्र गम्यमान &c.—The तृया in पुरुषशब्देन is owing to its being the करण with reference to साधनक्रिया to be understood (गम्यमान). This has already been said [viz. in Kiráta, II, 17]. [Also cf. Malli.'s notes on Raghu, II. 34 and XI. 41].

3. कृतमिति-कृतम् is an अव्यय denoting negation and is read under the चादि-group.

N. B. The rule is—'चादयः असत्त्वे' [अव्ययानि].

4. सत्यं &c.—True that the word पुरुष is applied to [one merely belonging to] पुरुषजाति also, but such a पुरुष is not an ideal among men, because he has many attributes in common with beasts, &c. This is the intended sense.

5. य इत्यादिना श्लोकद्वयेन—With the two expressions beginning with यः ; i.e. (i) योऽङ्गीकृतगुणैः &c. and (ii) यसमानमिव &c.

Notes.

This and the next Sloka form a युग्म (for which see Malli. Expl. 3—Sl. 6).

कृतम्—A negative अव्यय meaning अलम् ।

पुरुषशब्देन—तृया in करण of the verb साध्यते to be understood. पुरुषशब्देन कृतम् = पुरुषशब्देन न किञ्चित् साध्यते ।

जातिमात्रावलम्बिना—जातिः एव इति जातिमात्रम्—कर्मधारयः (नित्यः) by the rule 'मयूरव्यंसकादयश्च' । जातिमात्रम् अवलम्बते इति···अव – लम्ब + णिनि—कर्त्तरि । तेन ।

अङ्गीकृतगुणैः—अङ्गीकृताः (= स्वीकृताः) गुणाः यैः—बहुव्रीहिः । तैः । Adj. to जनैः ।

Ch. of Voice.—अङ्गीकृतगुणाः यं श्लाघ्यम्···उदाहृतवन्तः ।

Questions. पुरुषशब्देन—C. अङ्गीकृतगुणैः—M.

and even by his enemies.

असमानमिवौजांसि सदसा गौरवेरितम्।
नाम यस्याभिनन्दन्ति द्विषोऽपि स पुमान् पुमान् ॥७३॥

Eng. Equiv. सदस्—gathering, congregation. ईरित—mentioned.

Prose.—सदसा गौरवेरितं, [श्रृण्वतां जनानाम्] ओजांसि ग्रसमानम् इव यस्य नाम द्विषः अपि अभिनन्दन्ति सः पुमान् पुमान्।

Bengali.—সভায় গৌরবপূর্ব্বক উচ্চারিত, [শ্রোতৃবৃন্দের] তেজোহ্রাস-বিধায়ক যাঁহার নাম শত্রুগণও অনুমোদন করে সেই পুরুষই [প্রকৃত] পুরুষ। ৭৩।

English.—The man whose name is honourably mentioned in a meeting, which (name) eclipses the glory of the audience, and which even the enemies respect, is a [true] man. 73.

Ghantapatha.—असमानमिति। किञ्च, 'सदसा' सभया 'गौरवेण ईरितं' कथाप्रसङ्गेषु गौरवपूर्व्वकम् उच्चारितं सत्, 'ओजांसि' श्रृण्वतां तेजांसि 'ग्रसमानं' गिलत् 'इव' स्थितं 'यस्य' पुंसो 'नाम' 'द्विषोऽपि' अभिनन्दन्ति 'अनुमोदन्ते' किमुत सुहृद इति भावः, 'स पुमान्' 'पुमान्'। पुरुषत्वेन गण्यते इत्यर्थः। प्रथमः पुरुषशब्दो जातिवचनः, द्वितीयो गुणवचनः (1)—स एव श्लाघ्यः। अत्र पुमान् पुमान् इति तात्पर्य्यमात्रभेदभिन्न-शब्दार्थ-पौनरुक्त्यलक्षणो लाटानुप्रासोऽलंकारः। तथाच सूत्रम्—"तात्पर्य्यभेदयुक्तो लाटानुप्रासः" इति (2) ॥७३॥

Malli. Explained.

1. प्रथमः &c.—In the expression सः पुमान् पुमान्, the first पुमान् is जातिवाचक and the second पुमान् is गुणवाचक। The sense is पुरुषत्व-जातिमान् सः एव पुरुषगुणवान्।

2. अत्र पुमान् पुमान् &c.—In the expression पुमान् पुमान् the figure of speech is लाटानुप्रास which consists in a repetition of words used in different senses. The aphorism is—तात्पर्य्यभेदयुक्तः &c. [Cf. "शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्य्यमात्रतः। लाटानुप्रास इत्युक्तः—" इति साहित्यदर्पणः। तात्पर्य्य = meaning].

Notes.

ग्रसमानम्—ग्रस + शानच्—कर्त्तरि। Adj. to नाम।

ओजांसि—२या बहु of ओजस्।

सदसा—३या १व. of सदस्। Here, by लक्षणा, it means सदस्य i. e. सभ्य.

गौरवेरितम्—गौरवेण (हेतुना) ईरितम्—३ तत् । ईर + क्त—कर्म्मणि ।
नाम—Obj. of अभिनन्दन्ति ।

Ch. of Voice.—गौरवेरितं···ग्रसमानं (१मा)···नाम द्विड्भिः अभिनन्द्यते तेन पुंसा पुंसा भूयते ।

Question.—Characterise a true man.

The king (Yudhishthira) relies entirely on me for the proper retribution.

यथाप्रतिज्ञं द्विषतां युधि प्रतिचिकीर्षया ।
ममैवाध्येति नृपतिस्तृष्यन्निव जलाञ्जलेः ॥७४॥

Prose.—नृपतिः यथाप्रतिज्ञं युधि द्विषतां प्रतिचिकीर्षया, तृष्यन् जलाञ्जलेः इव, मम एव अध्येति ।

Bengali.—নৃপতি (যুধিষ্ঠির) [আমাদের] প্রতিজ্ঞানুসারে যুদ্ধে শত্রুজিংঘাসার জন্য, তৃষিত ব্যক্তি যেরূপ জলাঞ্জলির বিষয় আগ্রহ পূর্ব্বক স্মরণ করে সেইরূপ, আমাকেই স্মরণ করিতেছেন ॥ ৭৪ ॥

English.—The king (Yudhishthira), for the retaliation on the enemy in battle according to [our] promise, thinks of me, as a thirsty person does of a palmful of water. 74.

Ghantapatha.—ननु, सत्सु भीमादिषु तव एव अयं कोऽभिनिवेशः (1) इत्यत्र आह—यथेति । 'नृपतिः' युधिष्ठिरो 'यथाप्रतिज्ञ' 'युधि द्विषतां प्रतिचिकीर्षया' द्विषतः प्रतिकर्त्तुम् इच्छया—प्रतिज्ञानुसारेणैव जिघांसया इत्यर्थः, 'तृष्यन्' पिपासुः 'जलाञ्जलेः इव' 'मम एव' 'अध्येति' इच्छति—कार्य्यसिद्धेः मदायत्तत्वात् माम् एव स्मरति, अतोऽयं मम अभिनिवेश इत्यर्थः । "अधीगर्थ—" इत्यादिना कर्म्मणि षष्ठी (2) ॥ ७४ ॥

Malli. Explained.

1. ननु &c.—Well, in spite of the presence of Bhima and others, why is it that you take the task up on yourself ?

2. अधीगर्थ &c.—[In मम] the ६ष्ठी is in the sense of कर्म्म by the rule 'अधीगर्थदयेशां कर्म्मणि' ।

Notes.

यथाप्रतिज्ञम्—प्रतिज्ञाम् अनतिक्रम्य इति अव्ययीभावः । For the promise (of the Pándavas) referred to,

cf. अहं दुर्य्योधनं हन्ता कर्णं हन्ता धनञ्जयः ।
शकुनिं चाक्षकितवं सहदेवो हनिष्यति ॥ &c. &c.

For details, see Mahá-Bhárata, Sabhá, Chap. 77.

युधि—७मी १व of युध् ।

प्रतिचिकीर्षया—प्रति – कृ + सन् + अ + स्त्रियाम् आप् ; ३या १व ।

मम—कर्म्मण: शेषत्वविवक्षायां (in other words—सम्बन्धसामान्ये) ६ष्ठी by the rule 'अधीगर्थदयेशां कर्म्मणि' । [अधि – इक् (धातु:) means स्मरण ।]

अध्येति—अधि – इक् + लट् ति । This root, like इण्, is always preceded by अधि ।—"इणिकौ अध्युपसर्गं न व्यभिचरत:" ।

तृष्यन्—Opt. form—तृषन् । See Malli. Expl. 3—Sl. 66.

जलाञ्जलि:—जलस्य अञ्जलि:—६तत् । कर्म्मणि ६ष्ठी, being the analogue of the word मम ।

Ch. of Voice.—नृपतिना·· तृष्यता इव...अधीयते ।

N. B. मम and जलाञ्जलि: having सम्बन्धे ६ष्ठी are not to be उक्त ।

Questions.—Ch. the voice. मम—C.

He is a curse to the race who neglects the task entrusted to him.

स वंशस्यावदातस्य शशाङ्कस्येव लाञ्छनम् ।
कृच्छ्रेषु व्यर्थया यत्र भूयते भर्त्तुराज्ञया ॥७५॥

Eng. Equiv. अवदात—white ; clear ; renowned. लाञ्छन—stain, कृच्छ्र—danger.

Prose.—स: [पुरुष:] अवदातस्य वंशस्य—शशाङ्कस्य इव लाञ्छनम्, यत्र [पुरुषे] कृच्छ्रेषु भर्त्तु: आज्ञया व्यर्थया भूयते ।

Bengali.—চন্দ্রের যেরূপ কলঙ্ক, সে ব্যক্তি বিশুদ্ধ বংশের সেইরূপ কলঙ্ক—যে ব্যক্তির প্রতি বিপৎকালে ভর্তৃকর্তৃক প্রদত্ত আজ্ঞা ব্যর্থ হয় । ৭৫ ।

English.—Like the stain to the moon, that man is a stain to the renowned race in whom the command reposed by his master in times of danger is allowed to be infructuous. 75.

Ghantapatha.—ननु युधिष्ठिर: स्वार्थं साधयति, त्वया च स्वार्थमावम् अनुसन्धीयताम् इत्यत आह—स इति । 'स:' नर: 'अवदातस्य' स्वच्छस्य 'वंशस्य', 'शशाङ्कस्य इव,' 'लाञ्छनं' कलङ्क:, 'यत्र' यस्मिन् पुरुषे 'कृच्छ्रेषु' व्यसनेषु 'भर्त्तु:' स्वामिन: 'आज्ञया' 'व्यर्थया भूयते'—भावे लट् । आपदि स्वार्थसाधक: कुलघातक: ; तस्मात् स्वार्थनिष्ठकार्यता युक्ता (1) इत्यर्थ: । ॥ ७५ ॥

Malli. Explained.

1. स्वार्थनिष्ठकार्यता—स्वार्थनिष्ठ (=स्वार्थाश्रित) कार्यं यस्य स: स्वार्थनिष्ठकार्य: ; तस्य भाव: ।

Notes.

अवदातस्य—अव – दै + क्त—कर्म्मणि । दै – भ्वादि = परस्मै – to purify.

आज्ञया व्यर्थया भूयते = It is in भाववाच्य । In कर्तृवाच्य it will be—आज्ञा व्यर्था भवति ।

शशाङ्कस्य इव—By virtue of this उपमान (viz. शशाङ्क who is a notorious कलङ्की) the existence of some कलङ्क *already* present might be associated with the उपमेय also, To avoid this we should put the explanation as follows :—Such a man is a stain on the *hitherto pure* family, as the dark spot is a stain on the *hitherto pure* moon.

Ch. of Voice.—तेन...शशाङ्केन इव···लाञ्छनेन [भूयते],...भर्त्तुः आज्ञा व्यर्था भवति ।

Besides, I cannot adopt a hermit's life prematurely.

कथं वादीयतामर्वाङ्मुनिता धर्मरोधिनी ।
आश्रमानुक्रमः पूर्वैः स्मर्यते न व्यतिक्रमः ॥७६॥

Eng. Equiv. आदीयताम्—can be taken up. अर्वाक्—(i) following, succeeding ; (ii) premature. अनुक्रम—due order. व्यतिक्रम—violation of order.

Prose.—कथं वा धर्म्मरोधिनी मुनिता [मया] अर्व्वाक् आदीयताम् ? पूर्व्वैः आश्रमानुक्रमः स्मर्यते, न तु व्यतिक्रमः [स्मर्य्यते] ।

Bengali.—আর আমি ধর্ম্মবিরুদ্ধ (অর্থাৎ অশাস্ত্রীয়) মুনিত্ব বা কিরূপে কালের পূর্ব্বে আশ্রয় করি ? পূর্ব্বাচার্য্যগণ আশ্রম সমূহের অনুক্রমই বলিয়াছেন, ব্যতিক্রম বলেন নাই। ৭৬।

English.—And how can I take up prematurely the life of a hermit against the prescribed rules ? A due order of the four stages of life has been mentioned by the ancients, not their violation. 76.

Elucidation.—Four stages of life have been prescribed by our Shástrakáras,—ब्रह्मचर्य्य, गार्हस्थ्य, वानप्रस्थ and सन्यास । They should be gradual and not abrupt. No double or triple promotion is allowed. I am now just in the second stage (see next sloka). So, I cannot take up the next one or that following the next as advised by you.

Ghantapatha.—यदुक्तम् "विजहीहि रणोत्साहम् (Sl. 31)" इत्यादि' तदोत्तरमाह—कथमिति। 'धर्मरोधिनी' धर्मविरोधिनी 'अर्वाक्' गार्हस्थ्यात् प्राक् एव 'मुनिता' वानप्रस्थत्वं चतुर्थाश्रमो वा (क), (1) वर्णक्रमेण (ख) तस्य विधानात् "त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमाः" इति सूत्रकारवचनात् च क्षत्रियस्य अपि कैश्चित् इष्टत्वात् (2), तदेतत् सम्यग्विवेचितम् अस्माभिः रघुवंशसञ्जीवन्यां "स किलाश्रममन्त्यमाश्रितः" इत्यत्र (3)। 'कथं वा आदीयतां' मया कथं वा अङ्गीक्रियताम्।—सम्प्रश्ने लोट्। तथाहि, 'पूर्वैः' मन्वादिभिः 'आश्रमानुक्रमः अर्थ्यते' 'न तु व्यतिक्रमः'। "ब्रह्मचारी भूत्वा गृही भवेत्, गृही भूत्वा वनी भवेत्, वनी भूत्वा प्रव्रजेत" इति श्रुत्यनुसारात् इत्यर्थः। एतदपि "चत्वार आश्रमाः" इत्येतत्-पक्षम् आश्रित्योक्तम् (4); "यदिवेतरथा (ग) ब्रह्मचर्य्यात् एव प्रव्रजेत्, गृहात् वनाद्वा" इति व्युत्क्रमपक्षस्यापि श्रवणात् (5)। सामान्येन विशेषसमर्थनरूपः अर्थान्तरन्यासः॥ ७६॥

Malli. Explained.

1. मुनिता &c.—मुनिता here means वानप्रस्थत्व (the 3rd आश्रम), or [सन्न्यास] the 4th आश्रम। [Both partake of the nature of a मुनि].

2. वर्णक्रमेण &c.—The 4th आश्रम (viz. सन्न्यास) being prescribed for all the [three] वर्ण's and as the सूत्रकार says—the four आश्रमs are intended for the three वर्ण's after their studying the Veda, the 4th आश्रम is intended by some for क्षत्रियs also.

N. B. The argument is this :—

According to some, the 4th आश्रम (viz. सन्न्यास, otherwise called प्रव्रज्या) is prescribed for ब्राह्मणs only. Others hold that it is prescribed for all the three द्विज-castes (viz. ब्राह्मण, क्षत्रिय and वैश्य). According to the second view, अर्जुन—a क्षत्रिय—was entitled to सन्न्यास। So, मुनिता here may mean either वानप्रस्थ or सन्न्यास।

(क) चतुर्थाश्रमता (चतुर्थाश्रमिता ?) for चतुर्थाश्रमः—All except A. By the side of the word वानप्रस्थत्वं, चतुर्थाश्रमित्व' would be the best reading.

(ख) वर्णप्रक्रमेण for वर्णक्रमेण—B, G.

(ग) All read यदि चेदवैराग्य' तदा, but the श्रुति (जाबालोपनिषद्—४) actually begins as यदिवेतरथा। Indeed, चेत् by the side of यदि is unusual and betrays a corruption.

3. सद्दितत् &c.—All this has been fully discussed by us in the Sanjivani on Raghuvams´a, viz, on the passage 'स किल &c.' —[Canto VIII, 14].

4. एतदपि &c.—This graduality has been mentioned of course on the basis of [the conception of] 4 आश्रमs.

5. यदिवा इतरथा &c.—For, we have also the following श्रुति (Vedic text):—Or, [in case of keen वैराग्य], in a contrary way, one should adopt प्रव्रज्या [abruptly] from ब्रह्मचर्य or from गृह (i. e. गार्हस्थ्य) or from वन (i. e. वानप्रस्थ) which sanctions a violation of the normal order. [यदिवा = Or. For श्रवणात्, see Notes on स्मर्यते].

Notes.

आदीयताम्—आङ् – दा + लोट् ताम्—कर्मवाच्ये। The nom. is—मया to be understood. आङ् – दा would be आत्मनेपदी even in कर्तृवाच्य।

अर्वाक्—अव्ययम्। अवर – अन्च + क्विप्—कर्त्तरि (पृषोदरादित्वात्)। The word means both 'before' and 'after' in accordance with context. Here both the meanings might be applied.

मुनिता—The state of a मुनि, i. e. the state of a वानप्रस्थ or of a सन्न्यासी। See Malli. Expl. 2.

धर्म्मरोधिनी—धर्म्मं रुणद्धि इति धर्म्म – रुध + णिनि—कर्त्तरि।

आश्रमानुक्रमः—६ तत्। For the normal order, see Elucidation.

पूर्व्वैः—It is optionally declined as a सर्व्वनाम in १मा बहु, ५मी १व, and ७मी १व।

स्मर्यते—The root स्मृ is used with reference to the views of the sages, and the root श्रु is used with reference to श्रौत (i. e. Vedic) texts. Thus, मनुः स्मरति or मनुना स्मर्यते, but वेदे श्रूयते। The Veda is the original source, the later sages (viz. मनु, अत्रि, याज्ञवल्क्य &c.] only *remember* the Vedic texts.

व्यतिक्रमः—वि – अति – क्रम + घञ्—भावे।

Rhetoric.—The fig. of speech is अर्थान्तरन्यास। The first half containing a particular case is being supported by the second half containing a general statement.

Ch. of Voice.—...अहम् धर्मरोधिनीं मुनितां आददे । पूर्वे or पूर्वाः आश्रमानुक्रमं चरन्ति, न व्यतिक्रमम् ।

Questions.—Give the simple meaning of the Sloka, and discuss the different views referred to by the commentator.

My गार्हस्थ्य has not yet been finished.

आसक्ता धूरियं रूढा जननी दूरगा च मे ।
तिरस्करोति स्वातन्त्र्यं ज्यायांश्चाचारवान् नृपः ॥७७॥

Eng. Equiv. आसक्त—attached. धुर्—burden. रूढ—well-known ; here, great.

Prose.—आसक्ता रूढा इयं धूः, दूरगा जननी च, ज्यायान् आचारवान् नृपः च मे स्वातन्त्र्यं तिरस्करोति ।

N. B. In his अन्वय, Malli. has repeated the word नृप in order perhaps to set it forth as an additional ground for reverence.

Bengali.—[মস্তকোপরি] সংলগ্ন এই গুরুভার, দূরস্থিতা জননী এবং জ্যেষ্ঠ ও আচারবান্ নৃপতি—যুধিষ্ঠির,—ইঁহারা আমার স্বাধীনতার প্রতিবন্ধকতা করিতেছেন । ৭৭ ।

English.—The heavy burden on [my shoulders), my mother who is now at a distance, and the king who is my eldest brother and is virtuous too—these take away my freedom. 77.

Elucidation.—I am now just in the second stage which has not yet been properly gone through. The task of destroying the enemies entrusted to me has not yet been done. My mother is not present here and so her permission also is not available. And I cannot disobey my king Yudhishthira who is not only my eldest brother but is virtuous to a degree. A disobedience to him will involve a triple sin. Under the circumstances I am not in a position to take up abruptly a higher stage of life as advised by you.

Ghantapatha.—ननु, भवान् गृहस्थ एव, तत्कथम् अर्वाङ्मुनित्वविरोध इति आशङ्क्य, सत्यं गृहस्थोऽस्मि तथापि कृत-निखिलगृहस्थकर्तव्यस्य वानप्रस्थाधिकारो न गृहस्थमात्रस्य, न च अहम् अद्यापि कृतकृत्य इति उत्तरमाह (1)—आसक्तेति । 'आसक्ता' लग्ना—अवश्यकर्तव्या इत्यर्थः, 'रूढा' प्रसिद्धा—महती इत्यर्थः, इयं पूर्वोक्ता 'धूः' वैरिनिर्यातनरूपा (क) । 'दूरगा' दूरवर्तिनी 'जननी च' माता

(क) वैरनिर्यातनभारः—B.

अपि। तथा, 'नृपोऽपि' 'आचारवान्' तपोऽधिक इत्यर्थः। तथापि 'ज्यायान्' ज्येष्ठो (2) 'नृपो' युधिष्ठिरः 'च' मे मम 'स्वातन्त्र्यं' स्वाच्छन्द्यं 'तिरस्करोति' दूरीकरोति—आश्रमान्तरं (ख) प्रतिबध्नातीत्यर्थः। तिरस्करोति इति प्रत्येकम् अभिसम्बध्यते, अन्यथा बहुवचनप्रसङ्गात (3) ॥ ७७ ॥

Malli. Explained.

1. ननु भवान् &c.—"Well, you are already a गृहस्थ ; then how is there an apprehension of premature मुनित्व" ? In anticipation of this he says—"True that I am a गृहस्थ, but a गृहस्थ who has finished all the duties is entitled to [the stage of] वानप्रस्थ and not each and every गृहस्थ. Now, I have not yet performed my duties [as a गृहस्थ]. So, he gives the following reply—

2. 'ज्यायान्' ज्येष्ठः—N. B. युधिष्ठिर was the eldest of all the five brothers. Hence, ज्येष्ठ। For the justification of the use of 'ज्यायान्, see Notes on ज्यायान्—Sl. 53.

3. तिरस्करोति &c.—तिरस्करोति is connected separately with each subject (viz. भूः, जननी and नृपः) ; otherwise, the plural number would have been used.

Notes.

आसक्ता—आङ् – सन्ज + क्त – कर्त्तरि।

रूढ़ा—रूह + क्त – कर्त्तरि। For meaning, see Eng. Equiv.

दूरगा—दूर – गम + ड—कर्त्तरि by the rule 'अन्तात्यन्ताध्व-दूर-पार-सर्व्वानन्तेषु डः'। For the significance of the adjective, see Elucidation.

स्वातन्त्र्यं तिरस्करोति—Cf. 'स्वातन्त्र्यमपकर्षति'—Uttaracharita I.

ज्यायान्—प्रशस्य + ईयसुन्। See ज्यायसी—Sl. 60.

ज्यायान् आचारवान् नृपः—These are triple grounds for special reverence to be shown to Yudhishthira. N. B. युधिष्ठिर was a king even in exile. His kingship confirmed by the Rájasûya had not ceased.

(ख) आश्रमम् for आश्रमान्तरम्—J.

Ch. of Voice—आसक्तया कढ़या अनया धुरा, दूरगया अनन्या च, ज्यायसा आचारवता च नृपेण मे स्वातन्त्र्यं (१मा) तिरस्क्रियते ।

Questions.—Give the purport of the Sloka. दूरगा—significance. तिरस्करोति—How would you defend the singular number with three nominatives ?

A Kshattriya cannot brook the insults done by the enemy.

स्वधर्ममनुरुन्धन्ते नातिक्रममरातिभिः ।
पलायन्ते कृतध्वंसा नाहवान्मानशालिनः ॥७८॥

Eng. Equiv. कृतध्वंस—injured. आहव—battle.

Prose.—मानशालिनः स्वधर्मम् अनुरुन्धन्ते, [स्वधर्मस्य] अतिक्रमं न [अनुरुन्धन्ते] । [अतः] अरातिभिः कृतध्वंसा अपि आहवात् न पलायन्ते ।

N. B. The above prose-order given by Mallinátha is opposed to the sense obtained from the first reading of the sloka and is open to the compositional defect called अर्द्धान्तरैकपदता । A more natural rendering would be to put it as—

..., अरातिभिः अतिक्रमं न (अनुरुन्धन्ते) । कृतध्वंसाः (=विध्वस्ताः) [अपि] आहवात् न पलायन्ते । [For the ३या in अरातिभिः instead of ६ष्ठी, cf. Pánini's own use in the rule—'अन्तर्धौ येन अदर्शनमिच्छति' ।

Bengali.—[ক্ষত্রিয়] মনস্বিগণ স্বধর্ম্ম (অর্থাৎ ক্ষত্রধর্ম্ম) অনুবর্ত্তন করেন, স্বধর্ম্মাতিক্রম অনুবর্ত্তন করেন না । অতএব শত্রুকর্ত্তৃক অপকৃত হইলে (অর্থাৎ শত্রুতা আরব্ধ হইলে) তাঁহারা যুদ্ধ হইতে পলায়ন করেন না । ৭৮ ।

English.—[Kshattriyas] who are conscious of their respectable position, follow their own duty and not its violation. Therefore, when offended by enemies, they do not retreat from the battle-field. 78.

Ghantapatha.—उक्तम् अर्थम् उपसंहरति—स्वधर्ममिति । 'मानशालिनः' 'स्वधर्मं' क्षात्रधर्मम् 'अनुरुन्धन्ते' अनुवर्त्तन्ते, 'अतिक्रमं' स्वधर्मातिक्रमं 'न' अनुरुन्धन्ते । ततः किम् अत आह—अरातिभिरिति । 'अरातिभिः' 'कृतध्वंसाः' कृतापकाराः सन्तः 'आहवात्' न पलायन्ते, अयम् एव स्वधर्मानुरोधः इत्यर्थः । ["उपसर्गस्यायतौ" इति रेफस्य लत्वम्] (1) । अत्र मनुः [७।८७]—"न निवर्त्तेत संग्रामात् क्षात्रं धर्ममनुस्मरन्" इति । अत्र उत्तरवाक्यार्थं प्रति पूर्ववाक्यार्थस्य हेतुत्वात् वाक्यार्थहेतुकं (2) काव्यलिङ्गमलङ्कारः ॥ ७८ ॥

(क) For क्षात्रं धर्मम् all read क्षात्रधर्मम् ।

Malli. Explained.

1. उपसर्गस्य &c —In पलायते (परा – अय + लट् ते) the र (of परा) becomes ल by the rule 'उपसर्गस्य अयतौ'। N. B. अयति stands for the root अय। See Preliminary information—4.

2. वाक्यार्थहेतुकम्—[As distinguished from पदार्थहेतुकम्].

Notes.

अनुरुध्यन्ते—रुध preceded by अनु is also used as दिवादि, आत्मनेपदी। Cf. 'नियतिं लोक इवानुरुध्यते'—II. 12.

पलायन्ते—परा – अय + अन्ते। The र of परा becomes ल by the rule 'उपसर्गस्य अयतौ'।

क्षतध्वंसा:—क्षत: ध्वंस: येषां ते—बहुव्रीहि:।

मानशालिन:—मानेन शालन्ते (= शोभन्ते) ये ते इति मान – शाल + णिनि—कर्त्तरि।

Ch. of Voice.—मानशालिभि: स्वधर्म: अनुरुध्यते ; न अतिक्रम...क्षतध्वंसै:......न पलाय्यते।

Question.—Give the construction and explain the purport of the sloka.

I am determined to take revenge on the enemy by satisfying Indra even at the cost of my life.

विच्छिन्नाभ्रविलायं वा विलीये नगमूर्द्धनि।
आराध्य वा सहस्राक्षमयश:शल्यमुद्धरे॥ ७९॥

Eng. Equiv. विच्छिन्नाभ्रविलायम्—disappearing like scattered pieces of clouds. विलीये—shall disappear. नगमूर्द्धन्—mountain-peak. उद्धरे—shall extract.

Prose.—[अहं] विच्छिन्नाभ्रविलायं नगमूर्द्धनि विलीये वा। वा (= अथवा) सहस्राक्षम् आराध्य अयश:-शल्यम् उद्धरे।

Bengali.—বাতাহত মেঘখণ্ড সমূহ যেরূপ বিলীন হইয়া যায় আমি এই পর্ব্বতশৃঙ্গে সেইরূপ বিলীন হইব। অথবা ইন্দ্রকে সন্তুষ্ট করিয়া অযশঃশল্য উদ্ধৃত করিব। ৭৯।

English.—I shall (allow myself to) disappear on the mountain-peak like scattered pieces of clouds, or shall extract the dart of infamy by satisfying the thousand-eyed god (Indra). 79.

Ghantapatha.—किं बहुना, मम अयं निश्चयः श्रूयताम् इत्याह—विच्छिन्नेति। 'विच्छिन्नं' वाताहतं यत् 'अभ्रं' तदिव विलीय इति 'विच्छिन्नाभ्रविलायं' यथा तथा ["उपमाने कर्मणि च" (1) इति कर्त्तरि उपपदे णमुल्।] 'नगमूर्द्धनि' अस्मिन् गिरिशृङ्गे 'विलीयै' विशीर्य्यै वा ['कषादिषु यथाविध्यनुप्रयोगः' (2)]। यद्वा 'सहस्राक्षम्' इन्द्रम् 'आराध्य' 'अयशः' एव 'शल्यं' तत् 'उद्धरे' उद्धरिष्यामि। न तु गत्यन्तरशङ्का इत्यर्थः। वाशब्दो विकल्पे ॥ ७९ ॥

Malli. Explained.

1. उपमाने कर्मणि च &c.—When an उपमान-word used as कर्म (object) *also* is the उपपद, the root takes the affix णमुल्। [N. B. The word 'also' (च) indicates that when the उपमान-word is used as कर्त्ता also, the root takes णमुल्। The present case is of the latter class.

2. कषादिषु यथाविधि &c.—The roots कष् &c. with the affix णमुल् added to them are followed by the same roots. [Thus, समूलकाषं कषति, समूलघातं न्यवधीत, विच्छिन्नाभ्रविलायं विलीये, &c.

Notes..

विच्छिन्नाभ्रविलायम्—विच्छिन्नानि अभ्राणि—कर्मधा। तानि इव विलीय इति विच्छिन्नाभ्रविलायम्। विच्छिन्नाभ्र – वि – ली + णमुल्—कर्त्तरि। The word अभ्र is variously derived. The one best suiting the context here is—अभ्रति (= गच्छति) इति अभ्रम्। अभ्र + अच्—कर्त्तरि। For other derivations, see Sl. 6.

विलीयै—वि – ली + लट् ए। The root is दिवादि, आत्मनेपदी। This repetition of the root ली here is compulsory for the justification of the affix णमुल् added to the same root in the expression विच्छिन्नाभ्रविलायम्।

नगमूर्द्धनि—नगस्य मूर्द्धा—६तत्। तस्मिन्। नगः—न गच्छति इति नगः or अगः। But when meaning a *person* the form is only अगः। Rule—'नगः अप्राणिषु अन्यतरस्याम्'।

सहस्राक्षम्—सहस्रम् अक्षीणि यस्य सः बहुव्रीहिः with षच् (= अ) as समासान्त by the rule 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्'। As a consequence of his outraging Ahalyá he was cursed by her husband Gautama to bear a thousand marks on his person.

अयशः-शल्यम्—अयशः एव शल्यम्—रूपक-कर्मधा ।

उद्धरे—उत् – हृ + लट् ए । The root धृ also would give the same form, but it would not suit the context here. उत् – हृ = to extract, उत् – धृ = to uphold.

Ch. of Voice.—[मया] · विलीयते...शल्यम् (१मा) उद्ध्रियते ।

Questions. विच्छिन्नाभ्रविलायम्—D and expound.

Indra, satisfied, manifested himself before Arjuna and advised him to satisfy S'iva.

इत्युक्तवन्तं परिरभ्य दोर्भ्यां
तनूजमाविष्कृत-दिव्यमूर्त्तिः ।
अघोपघातं मघवा विभूत्यै
भवोद्भवाराधनमादिदेश ॥ ८० ॥

Prose.—मघवा इति उक्तवन्तं तनूजं आविष्कृत-दिव्यमूर्त्तिः [सन्] दोर्भ्यां परिरभ्य विभूत्यै अघोपघातं भवोद्भवाराधनम् आदिदेश ।

Bengali.—পুত্র (অর্জ্জুন) এইরূপ বলিলে ইন্দ্র নিজ দিব্যরূপ ধারণপূর্ব্বক বাহুদ্বারা তাঁহাকে আলিঙ্গন করিয়া শ্রেয়ঃপ্রাপ্তির জন্য দুঃখনাশক শিবোপাসনা আদেশ করিলেন ।৮০।

English.—The son having said so, Indra manifesting his divine form and embracing him with his arms, advised him the worship of S'iva (lit. the root-cause of this world) which removes misery. 80.

Ghantapatha.—इतीति । 'मघवा' इन्द्रः 'इत्युक्तवन्तं' 'तनूजं' पुत्रम् अर्जुनम् 'आविष्कृता' प्रकटिता 'दिव्यमूर्त्तिः (1) निजरूपं येन स तथोक्तः सन् 'दोर्भ्यां' बाहुभ्यां 'परिरभ्य' 'विभूत्यै' श्रेयसे, उपहन्यते अनेन इति 'उपघातम्'—करणे घञ्-प्रत्ययः । 'अघानां' दुःखानाम् उपघातम 'अघोपघातं' 'भवः' संसारः, तस्य 'उद्भवः' कारणम् इति 'भवोद्भवः' शिवः, तस्य 'आराधनम्' उपासनम् 'आदिदेश'—शिवम् उद्दिश्य तपश्चर इति आज्ञापयामास इत्यर्थः ॥ ८० ॥

Malli. Explained.

1. दिव्यमूर्त्तिः—[दिव्य here means 'divine'. Indra had appeared before Arjuna with a *human* form. He now assumed his own *divine* form].

Notes.

इति—Obj. of उक्तवन्तम् ।

उक्तवन्तम्—ब्रू + क्तवतु, २या १व ।

परिरभ्य—परि - रभ् + ल्यप्।

तनूजम्—गौणकर्म of आदिदेश।

दोर्भ्याम्—३या २व of दोस् which optionally taks the form of दोषन् from ३या बहु by the rule 'पद्दन्नोमास् &c.' [Cf. पादेन or पदा]. So दोषभ्याम् is an optional form here. Some optionally substitute दोषा for दोष्। [Cf. निश् and निशा]. In that case, the form दोषाभ्याम् also is admissible.

आविष्कृत-दिव्यमूर्त्तिः—दिवि (= स्वर्गे) भवा इति दिव्या। दिव् + यत्। दिव्या मूर्त्तिः इति दिव्यमूर्त्तिः—कर्मधा। आविष्कृता दिव्यमूर्त्तिः येन सः—बहुव्रीहिः।

अघौपघातम्—उपहन्यते अनेन इति उपघातम् (neuter, adj. to आराधनम्). उप - हन + घञ्—करणे। अघानाम् उपघातम्—६ तत्। 'दुःखैनोव्यसनेष्वघम्'—इति वैजयन्ती।

मघवा—मह्यते (= पूज्यते) असौ इति मह + कनि—कर्मणि (औणादिकः), Indra. The base is मघवन् which is optionally declined as मघवत् by the rule 'मघवा बहुलम्'। Thus—

(i) मघवा, मघवानौ, मघवानः; मघवानम्, मघवानौ, मघोनः; मघोना, मघवभ्याम्, मघवभिः; &c. &c. श्वन् and युवन् are words similarly declined] ; or,

(ii) मघवान्, मघवन्तौ, मघवन्तः; मघवन्तम्, मघवन्तौ, मघवतः; मघवता, मघवद्भ्याम्; मघवद्भिः; &c. &c.

In fem., the two forms are—(i) मघोनी and (ii) मघवती।

विभूत्यै—तादर्थ्ये ४र्थी।

भवोद्भवाराधनम्—उद्भवति अस्मात् इति उद्भवः = कारणम्। उत् - भू + अप्—अपादानवाच्ये। भवस्य (= संसारस्य) उद्भवः (= कारणम्) इति भवोद्भवः = शिवः। तस्य आराधनम्—६ तत्। मुख्य-कर्म of आदिदेश।

Ch. of Voice.—मघोना··· उक्तवान् तनूजः... आविष्कृतदिव्यमूर्त्तिना [सता] ...अघोपघातं भवोद्भवाराधनम् (२या) आदिदिशे।

Questions. दोर्भ्याम्—Decline. अघोपघातम्—D. मघवा—Decline and cite some other words that are similarly declined. विभूत्यै—C. भवोद्भव—M.

By satisfying S'iva he would be invincible and attain prosperity by ousting his enemies.

प्रीते पिनाकिनि मया सह लोकपालै:
लोकत्रयेऽपि विहिताप्रतिवार्य्यवीर्य्यः ।
लक्ष्मीं समुत्सुकयितासि भृशं परेषाम्
उच्चार्य्य वाचमिति तेन तिरोबभूवे ॥ ८१ ॥

इति श्रीभारविकृतौ किरातार्जुनीये महाकाव्ये
इन्द्रसमागमो नाम एकादशः सर्गः ।

Eng. Equiv. पिनाकिन् = [a name of Mahádeva]. लोकपालाः—the guardians of the quarters. विहित—arranged, i. e. granted. अप्रतिवार्य्य—irresistible. समुत्सुकयितासि—you will make [her] eager. परेषाम्—of the enemies.

Prose.—पिनाकिनि प्रीते [सति], लोकपालै: सह मया लोकत्रयेऽपि विहिताप्रतिवार्य्यवीर्य्यः [सन्] परेषां लक्ष्मीं भृशं समुत्सुकयितासि—इति वाचम् उच्चार्य्य तेन तिरोबभूवे ।

Bengali.—মহাদেব প্রীত হইলে আমি এবং [অন্যান্য] লোকপালগণ তোমাকে সমগ্র ত্রিভুবনে অনিবার্য্য বীর্য্য প্রদান করিব, এবং তাহা হইলে তুমি শত্রুগণের লক্ষ্মী তোমার প্রতি অত্যন্ত অনুরক্ত করিতে পারিবে—এই কথা বলিয়া তিনি (ইন্দ্র) অন্তর্দ্ধান করিলেন । ৮১ ।

English.—'Maha'deva being pleased, you will be endowed, by the [other] guardians of the quarters together with myself, with prowess invincible in all the three worlds and will then [be able to] make the goddess of prosperity of the enemies very much attached to you'—saying these words he vanished. 81.

Ghantapatha.—प्रीत इति । 'पिनाकिनि' शिवे 'प्रीते' सति 'लोकपालै: सह' 'मया' 'लोकत्रयेऽपि' 'विहित' दत्तम् 'अप्रतिवार्य्य'म्' अनिवार्य्यं 'वीर्य्यं' यस्य (1) स तथोक्त: सन् 'परेषां' शत्रूणां 'लक्ष्मीं' भृशं 'समुत्सुकयितासि' 'समुत्सुकां' त्वयि अनुरक्तां करोसि, पुनराहरिष्यसि इत्यर्थः । वीरभोग्या: सम्पद इति भाव: । उत्सुक-शब्दात् "तत्करोति—" इति ण्यन्तात् कर्त्तरि लुट् (2) । 'इति वाचम् उच्चार्य्य' 'तेन' इन्द्रेण 'तिरोबभूवे' अन्तर्दधे,—भावे लिट् ॥ ८१ ॥

इति श्रीमहोपाध्याय-कोलाचल-मल्लिनाथसूरि-विरचितायां
किरातार्ज्जुनीयकाव्य-व्याख्यायां घण्टापथ-समाख्यायाम् एकादशः सर्गः ।

Malli Explained.

1. दत्त···यस्य [This यस्य is an idiomatic use in the sense of यस्मै].

2. उत्सुकयितासि—उत्सुकां करोति इत्यर्थे उत्सुक (शब्द) + णिच् by the rule 'तत् करोति, तत् आचष्टे'। Then, उत्सुकि + लुट्, तासि (i. e. 2nd person, singular).

Notes.

पिनाकिनि—Mahádeva's bow is called पिनाक (also called अजगव)। पिनाकः अस्ति अस्य इति पिनाकी, तस्मिन्। भावे ७मी।

मया सह—मया has सहार्थे ३या, and लोकपालैः has ३या as being the nom. of विहित in the expression विहिताप्रतिवार्य्यवीर्य्यः।

लोकपालाः—लोकान् पालयन्ति इति पालि + अण्—कर्त्तरि by the rule 'कर्म्मण्यण्'। The 8 लोकपालs are the 8 दिक्पालs, viz. इन्द्र, अग्नि, यम, नैर्ऋत, वरुण, वायु, कुबेर and ईशान।

'इन्द्रो वह्निः पितृपति नैर्ऋतो वरुणो मरुत्।
कुबेर ईशः पतयः पूर्व्वादीनां दिशां क्रमात्' ॥—इत्यमरः।

विहिताप्रतिवार्य्यवीर्य्यः—न प्रतिवारयितुं शक्यम् इति अप्रतिवार्य्यम्। (वृ + णिच् + यत्) ; अप्रतिवार्य्यं वीर्य्यम्—कर्म्मधा ; विहितम् (= दत्तम्) अप्रतिवार्य्यं वीर्य्यं यस्य सः—बहुव्रीहिः।

लक्ष्मीम्—This word occurs in the concluding Slokas of all the Cantos of Bhǽravi. This mannerism of Bhǽravi has been imitated by Mǽgha whose conaluding Slokas of the Cantos contain the word श्री।

समुत्सुकयितासि—सम् – उत्सुकि + लुट् तासि (2nd person, singular). We might also take it as समुत्सुकयिता असि—सम् – उत्सुकि + तृन् (साधुकारिणि अर्थे) + असि।

परेषाम् – शत्रूणाम्। 'परः श्रेष्ठादिदूरान्योत्तरे क्लीव' तु केवले' इति मेदिनी। The word is a सर्व्वनाम when 'a relative position (व्यवस्था)' is meant. In the sense of शत्रु also the relativity of position is emphasised and the word is used as a सर्व्वनाम। Cf. 'जेतुः परेषां जयशब्दपूर्व्वम्'—Raghu XVI. 5.

तिरोबभूवे—तिरस् – भू + लिट् ए—भाववाच्ये।

Ch. of Voice.—...वीर्य्येण [त्वया]...लक्ष्मीः...समुत्सुकयिता सः तिरोबभूव ।

Questions. लोकपालैः—C. Who are the लोकपालs ? समुत्सुकयितासि—D. परैषाम्—M.

Poet's Colophon—

भारविकृतौ—क्रियते या सा कृतिः ; कृ + क्तिन्—कर्म्मणि । भारवेः कृतिः—६तत्, तस्याम् ।

इन्द्र-समागमः—इन्द्रस्य समागमः—६तत् । See Sl. 1.

Commentator's Colophon.—

कोलाचल-मल्लिनाथ-सूरि &c.—कोलाचल is probably the name of a country or province with which the name of Mallinátha is associated. Cf. अरुणाचलनाथ—the name of a commentator—anterior to Mallinátha. सूरि means पण्डित ।

घण्टापथ-समाख्यायाम्—घण्टापथः (इति) समाख्या (आख्या = नाम) यस्याः साः—बहुव्रीहिः, तस्याम् । Adj. to व्याख्यायाम् । For the name घण्टापथ, see Mallinátha's general Preface, Sl. 7.

APPENDIX I.

METRE.

पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।

वृत्तमक्षर-संख्यातं जातिर्मात्राकृता भवेत् ॥

In Sanskrit poetry a verse has 4 feet or quarters It is of two kinds—वृत्त and जाति । वृत्त is that in which letters are counted, and जाति is that which is determined by measures (मात्रा) । N. B. In each case the लघुत्व and गुरुत्व of letters are taken into account. In वृत्त—a letter, be it लघु or गुरु, is counted as one. In जाति—a लघु or light vowel is counted as one, and a गुरु or heavy vowel is counted as two. In the present work we are concerned with वृत्त only.

The following is the rule regarding the लघुत्व and गुरुत्व of a letter :—

सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ।

वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि वा ॥

Translation.—A letter with अनुस्वार, a long vowel, and a letter with विसर्ग, are heavy. Also, a letter immediately preceding a conjunct consonant ia heavy. A light letter at the end of a foot is *sometimes* regarded as heavy.

In वृत्त, each quarter has a particular number of letters, but they must be arranged according to लघु and गुरु in each case. For this, rules have been framed by authors of treatises on छन्दः । In those rules certain letters have been adopted each of which technically represents a particular combination of लघु ann गुरु letters. Thus,

मस्त्रिगुरुस्त्रिलघुश्च नकारो

भादिगुरुः पुनरादिलघुर्यः ।

जो गुरुमध्यगतो र-ल-मध्यः

सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥

गुरुरेको गकारस्तु लकारो लघुरेककः ।

A लघु vowel is generally represented as ⌣, and a गुरु vowel as—.

Thus,

म = — — —	ज = ⌣ — ⌣
न = ⌣ ⌣ ⌣	र = — ⌣ —
भ = — ⌣ ⌣	स = ⌣ ⌣ —
य = ⌣ — —	त = — — ⌣
ग = —	ल = ⌣

Canto XI of Kirátárjuniya is in अनुष्टुभ् metre which consits of 4 feet (पाद) of 8 syllables each. The अनुष्टुभ् has many varieties (e. g. पथ्या, चपला, विपुला, &c.) the purest and commonest form called वक्त्र or श्लोक being defined as follows : —

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतु:पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययो: ॥

5th syllable	in every foot		—light
7th	,,	in 2nd and 4th feet	—light
,,	,,	in 1st and 3rd ,,	—heavy
6th	,,	in every foot	—heavy
(Other syllables			—optional)

In compliance with the general definition of अनुष्टुभ् the following two conditions alse should be satisfied .—

(i) 'न प्रथमात् स्नौ' । In every foot either the 2nd or the 3rd must be heavy ; and

(ii) 'द्वितीय-चतुर्थयो: रश्च' । In even feet if the 3rd is light, the 4th also must be light. (According to some, this second condition is not compulsory).

Almost all the apparent violations of this metre come under one or other of the varieties of अनुष्टुभ् । Thus, if in any foot the 5th, 6th and 7th are in भ-measure (i. e.—⌣ ⌣) the metre is called भ-विपुला (e. g. Sl. 12, 71 and 74) ; if they are in म-measure, the metre is म-विपुला (e. g. Sl. 77) ; if they are in न-measure, the metre is न-विपुला (also called चपला) (e. g. Sl. 15, 25, 29) ; and so on.

Different permutations of possible measures give rise to innumerable varieties. The varieties are often found mixed up with one onother.

We now scan the metre in Sl. 1 :—

— — ⏑ — —
अथा मर्षि सर्गा ख
— ⏑ ⏑ ⏑ — ⏑
जि तेन्द्रि य त या त या ।
— ⏑ — —
भा ज गा भा स मं जि श्री:
— — ⏑ — ⏑
प्र ती त: पा क शा स न: ॥

Towards the end of the canto the metre changes in compliance with the dictum—

'एकवृत्तमयै: पद्यैरवसानेऽन्यवृत्तकै:' ।

Sloka 80 is in उपजाति metre which is a mixture of इन्द्रवज्रा and उपेन्द्रवज्रा metre. They have been defined as follows :—

स्यादिन्द्रवज्रा यदि तौ जगौ ग:
उपेन्द्रवज्रा जतजास्ततो गौ ।
अनन्तरोदीरित-लक्ष्मभाजौ
पादौ यदीयावुपजातयस्ता: ॥

इन्द्रवज्रा—त त ज ग ग ; i.e. — — ⏑, — — ⏑, ⏑ — ⏑, —, —
उपेन्द्रवज्रा—ज त ज ग ग ; i.e. ⏑ — ⏑, — — ⏑, ⏑ — ⏑, —, —

— — ⏑ — — ⏑ ⏑ — ⏑ — —
इ त्यु क्ता व न्तं प रि र भ्य दो र्भ्या
⏑ — ⏑ — — ⏑ ⏑ — ⏑ — —
त नू ज मा वि ष्कृ त दि व्य मू र्ति: ।

The concluding sloka (i. e. sl. 81) is in वसन्ततिलक metre which has thus been defined :—'ज्ञेयं वसन्ततिलकं तभजा जगौ ग:' :—
त, भ, ज, ज, ग, ग ; i. e.

— — ⏑ — ⏑ ⏑ ⏑ — ⏑ ⏑ — ⏑ — —
प्री ते पि ना कि नि म या स ह लो क पा लै:

Of the works on Sanskrit Prosody, Pingala's छन्दःसूत्र is the most authoritative, and Kedára-bhatta's वृत्तरत्नाकर from which Mallinátha often quotes, as well as Gangádása's छन्दोमञ्जरी are the most popular. In the last two works the definition of each metre is couched-in its own metre. Thus, the definition of इन्द्रवज्रा is in इन्द्रवज्रा, of उपेन्द्रवज्रा in उपेन्द्रवज्रा, of उपजाति in उपजाति, of मालिनी in मालिनी, and so on. This peculiarity seems to have contributed much to the popularity of the said works. श्रुतबोध (attributted to Kálidása) is another work of the same type, but its definitions are mixed up with various poetic conceites outside the point of Metre (beautiful though they may be).

APPENDIX II

An Index of Slokas in Kirata XI.

THE REFERENCE IS TO SLOKAS.

APPENDIX III

AN INDEX OF THE IMPORTANT MATTERS CONTAINED IN THE FORE-GOING PAGES.

The reference is to Slokas under which the notes are generally to be consulted, unless there is a second figure (after a point) which refers to Malli. Expl.